ISSN : 2454 - 2547/ ISSUE : 4

# Rasikapriya

JOURNAL OF MADRAS SANSKRIT COLLEGE-2017

Published by:
The Madras Sanskrit College

Affiliated to University of Madras
(Aided by Rashtriya Samskritha Samsthanam, H.R.D. Ministry, Govt. of India, New Delhi)
84, Royapettah High Road, Mylapore, Chennai - 600 004. Ph. : 044-24980421
E-mail : mds.sanskritcollege@gmail.com
Website : www.madrassanskritcollege.edu.in

RS. 200/-

विलासः ४


# रसिकप्रिया

JOURNAL OF MADRAS SANSKRIT COLLEGE

सविलासरसोल्लासा सुवृत्ता रसिकप्रिया । सगुणालङ्क्रिया जीयात् पत्रिका सुरगीरिव ॥

प्रधानसंपादकः
आचार्यः ता पे राधाकृष्णन् नम्पूतिरिः

Chief Editor:
Dr. T.P. Radhakrishnan Namboodiri
Principal, The Madras Sanskrit College



# ACTIVITIES OF THE COLLEGE

Sri Rama Navami Celebrations





Sanskrit Day - 07.09.2016








Sanskrit Week - 19.10.2016






Sports Day - 18.02.17








Founder's Day - 04.03.17








Launching of Digital Campus - 07.03.17







ISSN : 2454 - 2547

# JOURNAL OF THE MADRAS SANSKRIT COLLEGE

# रसिकप्रिया

विलासः – ४

# RASIKAPRIYA

ISSUE - 4

संपादकः

**आचार्यः ता.पे. राधाकृष्णन् नम्पूतिरिः**

*Editor :*

**Dr. T.P. Radhakrishnan Nambuthiri**

Principal, The Madras Sanskrit College

*Published by :*

**THE MADRAS SANSKRIT COLLEGE**

(Affiliated to the University of Madras)

(Aided by the Rashtriya Sanskrit Sansthan, New Delhi)

84, Thiru-vi-ka Road (Royapettah High Road), Mylapore, Chennai - 600 004.

Phone : 044-2498 0421 e-mail : mds.sanskritcollege@gmail.com

website : www.madrassanskritcollege.edu.in

**2017**

| | | |
|---|---|---|
| Title of the Book | : | RASIKAPRIYA<br>ANNUAL JOURNAL OF THE MADRAS SANSKRIT COLLEGE |
| First Print | : | March 2017 |

© Madras Sanskrit College. All rights reserved. No material / Article be used in any manner without the permission of the Authors and the Madras Sanskrit College.

| | | |
|---|---|---|
| Copies | : | 300 |
| Price | : | **Rs.200/-** |
| Chief Editor | : | **Dr. T.P. Radhakrishnan Nambuthiri** |
| Editor | : | **Dr. Mani Dravid,** Prof. & HOD., Mimamsa |
| Editorial Board | : | **Dr. S. Arunasundaram,** Prof. & HOD., Vyakarana<br>**Dr. K. Shyamasundara,** Asst. Prof. in Vyakarana<br>**Dr. G. Suresh,** Asst. Prof. in Sahitya |
| Publisher | : | **Dr. T.P. Radhakrishnan Nambuthiri**, Principal<br>The Madras Sanskrit College<br>84, Thiru-vi-ka Road (Royapettah High Road)<br>Mylapore, Chennai - 600 004. |
| Printer | : | Shri Harish Printers<br>Mandaveli, Chennai - 600 028 |

(Printed and Published by the Madras Sanskrit College, Mylapore, Chennai - 600 004 under financial assistance from the Rashtriya Samskritha Samsthanam, New Delhi, Ministry of H.R.D., Govt. of India).

## विषयानुक्रमणिका


| | | |
|---|---|---|
| **संपादकीयम्** | डा. ता. पे. राधाकृष्णन् नम्बूतिरिः, प्राचार्यः | 1 |
| **वेदशास्त्रेषु प्ररोचना** | Dr. R. कृष्णमूर्तिशास्त्री, महामहोपाध्यायः, राष्ट्रपतिसंमानितः | 3 |
| **शब्दसाधुत्वविचारः** | डा. कू. श्यामसुन्दरः, सहायकाचार्यः व्याकरणविभागः | 12 |
| **निगमकल्पतरोर्गलितफलम्** | सु. उमापतिः, सहायकाचार्यः, साहित्यविभागः | 18 |
| **कौस्तुभानुसारेण अभ्यासात् भावनाभेदनिरूपणम्** | L.सौजन्यकुमारः,सहायकाचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः | 23 |
| **भावनावाक्यार्थनिरूपणम्** | C. हरिहरः, सहायकाचार्यः | 29 |
| **तिङन्तप्रयोगे अभेदान्वयबोधप्रकारः** | डा. पि.पि. श्रीधर उपाध्यायः, सहायकाचार्यः, न्यायविभागः | 32 |
| **आध्यानाधिकरणम्** | Dr.V. रामकृष्णः, सहायकाचार्यः, वेदान्तविभागः | 35 |
| **श्रीमन्महाभारते शान्तिपर्वणि सचिवाचरणोपदेशविचारः** | डा. एस्. वेणुगोपालः, Associate Professor | 37 |
| **व्यासमहाभारते शान्तिपर्वणि मातापितृप्रशंसा, कार्याचरणकालक्रमश्च** | डा. सु. श्रीधर स्वामिनाथः, HOD in Sanskrit | 48 |
| **महाभारते शान्तिपर्वणि मोक्षधर्मविचारः - एका विहङ्गमदृष्टिः** | डा. हीरालाल दाशः, Asst.Professor of Sahitya | 52 |
| **दण्ड(राज)नीतिसूत्रम्** | डा. सन्तोषकुमारः जोषि, शोधसहायकः, संस्कृत अकाडमी, | 60 |
| **श्रीमन्महाभारते शान्तिपर्वणि तपसः वैशिष्ट्यम्** | डा. आर्. लक्ष्मीनरसिंहः, Asst.Professor in Nyaya | 70 |
| **श्रीमन्महाभारते शान्तिपर्वणि राजधर्माः** | Dr. र.शेषाद्रिः, Asst professor of Sanskrit, | 75 |
| **पूर्वमीमांसाशास्त्रप्रयोजनम्** | P.R. वासुदेवन् , शिरोमणिः, न्यायविभागः | 79 |
| **मोक्षधर्मपर्वणि योगस्य अन्तरङ्गसाधनानि** | Anuradha S. , Research Scholar, KSRI | 82 |
| **अन्नप्राशनं तद्वैशिष्ट्यं च** | Govindan Embrandiri K., Ph.D. Student | 85 |
| **स राजा राजसत्तमः** | Pushkar P. Deopujari, Research Student | 90 |
| **शान्तिपर्वण्युक्तदण्डव्यवस्था** | K.V. सूर्यप्रकाशः, Research Asst. | 92 |
| **शान्तिपर्वणि राजपुरुषाणां कर्तव्यम्** | H.K. Subrahmanya , Ph.D. Research Scholar | 97 |
| **शान्तिपर्वणि अध्यात्मज्ञानम्** | S. N. कृष्णः, Research Associate, KSRI | 99 |
| **श्रीमहाभारते शान्तिपर्वणि वामदेवगीता** | Prema K., Ph.D. Student, Kannur University | 102 |
| **महाभारते मोक्षधर्मपर्वणि ब्रह्मज्ञानिस्वभावाः** | कृष्णन् शुकवनम् ,शोधच्छात्रः, श्रीचन्द्रशेखरेन्द्रसरस्वतीवि.म.वि. | 105 |
| **महाभारते शान्तिपर्वणि योगविचारः** | Smt. Durgaparameshwari H.K. , Ph.D. Student | 110 |
| **आधुनिकराजनीतिसन्दर्भे शान्तिपर्वस्था विषयाः** | डा. वि. यमुना देवी, सहायकाचार्या, KSRI | 113 |
| **गोरक्षा भवेद् ध्रुवम्** | Dr. H.K. सत्यनारायणः, Asst.Professor in Hindi | 120 |

॥ श्रीवाग्देव्यै नमः ॥

# सम्पादकीयम्

**Dr. ता.पे. राधाकृष्णन् नम्बूतिरिः,**

प्राचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः

**शेषाद्रिनाथविदुषा समारब्धा सतां प्रिया ।**

**शास्त्रार्थसङ्ग्रहपरा राजते रसिकप्रिया ॥**

**गुरून् अज्ञानदोषघ्नान् एकदन्तं सरस्वतीम् ।**

**व्यासं च दक्षिणामूर्तिं प्रणमामि पुनः पुनः ॥**

अस्मद्गुरुभिः दर्शनपारङ्गताद्यनेकबिरुदभूषितैः **डा. के. वि. शेषाद्रिनाथशास्त्रि**महोदयैः बहुकालात् पूर्वं समारब्धा मध्ये नैककारणैः स्तब्धा प्रगतवर्षे प्राक्तनप्राचार्यैः पञ्चभाषाप्रवीणैः **डा. नु. वे. देवीप्रसाद-**महोदयैः सम्पाद्य प्रकाशिता **रसिकप्रिया**ख्या सहृदयहृदयोल्लासदायिनी इदंकलाशालायाः पत्रिकेयम् अध्यापकानां परिश्रमेण निर्वाहकसमितिसहयोगेन राष्ट्रियसंस्कृतसंस्थानाधिकारिणाम् आर्थिकसाहाय्येन च **श्रीकाञ्चीकामकोटिपीठजगद्गुरूणाम्** करुणापूरितानुग्रहविशेषेण नानामठाधीशानां करुणाकटाक्षपातैः तत्तत्संस्थागतानेकविद्वद्वृन्दानाम् अस्मत्कलाशालायाः पूर्वतनप्राचार्याचार्यछात्रगणानाम् अस्मद्धितैषिणां सर्वेषां साहाय्येन च मुहुः प्रकाशनपथमारोहति इति मोमुद्यते मे मनः।

नवदेहलीस्थ राष्ट्रियसंस्कृतसंस्थानस्य आर्थिकसाहाय्येन "महाभारते शान्तिपर्वविचारः" इति शीर्षके अस्मन्महाविद्यालये संवत्सरेऽमुष्मिन् समायोजितायां राष्ट्रियसंस्कृतसंगोष्ठ्यां विविधप्रदेशीयैः विद्वदग्रेसरैः नानाविषयान्क्रोडीकृत्य नानाविषयेषु प्रस्तुताः प्रबन्धाः सङ्गृह्यात्र प्रकाश्यन्ते।

एतदवसरे अस्याः प्रकाशनाय कृतभूरिपरिश्रमेभ्यः अस्मत्कलाशालामीमांसाविभागाध्यक्षेभ्यः महामहोपाध्याय **डा. मणिद्राविड**महोदयेभ्यः, व्याकरणाचार्येभ्यः **डा. एस्. अरुणसुन्दर**महोदयेभ्यः, **डा. श्यामसुन्दर**महोदयेभ्यः साहित्याचार्येभ्यः **डा जि सुरेश**महोदयेभ्यः च मदीयां कृतज्ञतां प्रकटयामि। एवं प्रत्यक्षतया परोक्षतया च ये साहाय्यम् आचारितवन्तः तेभ्यः समेभ्यः धन्यवादाः निवेद्यन्ते।

यथा समुद्रो भगवान् यथा मेरुर्महागिरिः ।

उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते ॥

एवं महत्वाद्भारवत्वाच्च महाभारतमुच्यते -इत्युक्त्या च श्रीवेदव्यासरचितमहाभारतस्य वैशिष्ट्यम् निखिलजनविदितमेव।भारतमिदं न केवलं इतिहासः अपि च समग्रसंस्कृतवाङ्मयसारभूतम् भवति। सर्वलोकप्रियत्वाय निखिलवैदिकलौकिकतत्वविषयः दर्शनसर्वशास्त्रसाराख्याननीतिशास्त्रधर्मशास्त्रविषयाः लोकोपयोगितत्त्वविषयाश्च भारते सङ्गृह्य प्रस्तूयन्ते। अत एव महाभारतमिदं समस्तग्रन्थनिचयमध्ये रत्न रूपेण देदीप्यते।धर्मार्थकाममोक्षपुमर्थविषयकमखिलमपि सारांशेनात्रावाप्यते। अतः न किञ्चिदुच्छिष्यते -तदुक्तम्-

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तद् क्वचित्॥

किञ्च आदिपर्वतः स्वर्गारोहणपर्वपर्यन्तं विद्यमानाष्टादशपर्वसु समेष्वपि सर्वशास्त्रविषयसारः दरीदृश्यते एव तथापि तत्र शान्तिपर्व एव सुबृहत् पर्व रूपेण स्थित्वा राजनीतिधर्मापद्धर्ममोक्षधर्मविचारहितोपदेशाद्यनेकविषयरत्नैः सर्वजनान् विद्वद्वरेण्यांश्च अमन्दानन्दरत्नाकरे निमज्जयति-इत्यत्र न कापि संशीतिः। एतदर्थमेव भारतं पञ्चमो वेदः -इति वेदस्थानं दीयते तद्विषयगाम्भीर्यात्। तस्माद्भारतं सर्वशास्त्रसारभूतं इति जाज्ञायते। एतादृशमहिमगुम्फितं भारतम् सागरीकृत्य बहुभिः पण्डितवरैः बहुधा मथनं कृत्वा पीयूष रूपधर्ममोक्षनीतिहितोपदेशतत्त्वविषयाः प्रबन्धरूपेण बहिरानीतास्सन्ति।अस्मिन् संवत्सरे तान्यप्यत्र क्रोडीकृत्य **रसिकप्रियायां** प्रकाश्यन्ते। तां च **रसिकप्रियां** सहृदयानां विद्वज्जनानां समक्षं प्रणतिपूर्वकं समर्पये॥

पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटम्
नानाऽऽख्यानककेसरं हरिकथासंबोधनाबोधितम्।
लोके सज्जनषड्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे॥

शुभम्

*****

# वेदशास्त्रेषु प्ररोचना

**Dr. R. कृष्णमूर्तिशास्त्री**

महामहोपाध्यायः, राष्ट्रपतिसंमानितः,

प्राचार्यचरः, मद्रपुरीसंस्कृतमहाविद्यालयस्य

**I. उपोद्घातः—**

सर्वेषां जन्तूनां शारीरिकी प्रवृत्तिः मनसः प्रेरणयैव भवति। मनुते, वदति, करोति इत्येव क्रमः। तत्र च मानवस्य श्रेष्ठता तस्य चिन्तनालोचनादिशक्तिरेव। क्रिया द्विविधा— 1. स्वयमेव संस्कारद्वारा प्रवर्तमाना (Through instincts), 2. बुद्धिपूर्वं यत्नेनानुष्ठीयमाना च। प्रथमा तावत् पश्वादिसाधारणी शरीरनेत्रादिरक्षणाय प्रवर्तते यत्नमपि विना। द्वितीया क्रियैव मनसः प्ररोचनमालोचनं चानुसृत्य स्वस्य, स्वपरिवारस्य, समाजस्य, देशस्य चोन्नत्यै गौरवाय च संपाद्यते। सर्वोऽपि जनः अभिलषति— सुखं भवतु, दुःखं मास्तु इति। तादृशस्याभिलाषस्य पूर्तिः - समालोच्य, ज्ञात्वा, सम्यगनुष्ठानेनैव साध्यते। अत एवोक्तं वेदे सूर्यनमस्कारप्रश्ने – **"तस्माद् यत् पुरुषो मनसाऽभिगच्छति, तद् वाचा वदति, तत् कर्मणा करोति"** इति। मनसि सद्भावाः, ततो वाचि सत्यम् , ततः कर्मणि तात्पर्यतो निष्ठा (Dedication for work) क्रमेण भवन्तीति अस्यार्थः। अतः अस्माभिः (Motivation) प्रोत्साहकरणाय अन्येषां मनसि सद्भावनाः उद्भावनीयाः।

अस्माकं तैत्तिरीयोपनिषदि स्नातकोपदेशे (Convocational address) इदमुक्तम्— **"सत्यं वद, धर्मं चर"** इति। अद्यत्वे अस्माकं स्थितिः एवमस्ति—विना परिश्रमं सौख्यलाभो भवतु इत्येव मनोभावः। वयं विस्मरामो यत् विना व्यजनस्य हस्तगतस्य चालनं वातो नोत्पत्स्यते इति। सुखलाभेच्छा अकर्मण्यता अथवा रुचिं विना अनुष्ठानमित्युभयं विरुद्धं समुल्लसति। अत एवोक्तम्— **"पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः। न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः॥"** इति। श्लोकेऽस्मिन् पुण्यपापशब्दौ उचित-विपरीतकर्मपरौ। अस्य विरोधस्य परिहाराय जनानां कर्मसु प्ररोचना (Motivation) संपादयितव्या भवति। इदं कथं क्रियेतेत्येव अद्यत्वे निर्वाहशास्त्रे (Management science) बहुधा विचार्यते।

## II. **प्रोचनायाः मूलकारणम्।**

(1) **सत्यम्**— कर्मणां करणे स्वेच्छा न मानदण्डो भवितुमर्हति। परन्तु शास्त्रवचनान्येव मानदण्डो भवेत्। गीतायामत एवोक्तम्— **"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।"** (16.24)। शास्त्रेषु च सत्यधर्मौ पुरस्कृत्य सर्वं कार्यं कर्तव्यमिति बोधयितुमेव प्रथमतः उपदिष्टम्— **"सत्यं वद , धर्मं चर"** इति। रामस्य राज्ये सर्वेषां जनानां सर्वाणि कर्माणि सम्यक् निर्वर्तितान्यासन्। राज्यं च "रामराज्यम्" आसीदिति रामायणात् ज्ञायते। तत्र कारणं च तत्रैव निर्दिष्टम्—**"आसन् प्रजा धर्मरताः रामे शासति नानृताः"** इति।

अद्यत्वे किं भवति? सर्वे जनाः आवेदनपत्रप्रेषणसमये एवं लिखन्ति— 'यावच्छक्ति अहं संस्थायाः समुन्नत्यै , नियोक्तृणां भवतां तृप्तये च कर्तव्यानि सम्यगनुष्ठास्यामि' इति। प्रतिज्ञामिमां सत्यमेव विस्मृत्य किञ्चित्कालानन्तरमेवमुद्घोषयन्ति—'मदीयाः सौकर्यविषयाः झटिति पूरणीयाः। मया यथेष्टं धनं प्राप्तव्यम्। कर्माणि, कार्यालयो वा न मे लक्ष्यम्' इति। अस्यां दशायां वेदो ज्ञापयति— **"सत्यं वद"** इति। सत्यस्य महिमा चोक्तः— **"सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः।"** इति।

(2) **सद्भावः** — स्वार्थैकपरता राक्षसी सर्वेषां मनसि प्रविष्टा एवं चिन्तनमुत्पादयति— 'अनेन मे किं फलं झटिति' इति। कर्तव्यपालनमस्माकं मुख्यो धर्मः। 'कर्मणां फलं न ममैव योग्यम् , सर्वेषां फलं भवतु' इति भावो यदि शैशवादारभ्य समुत्पाद्येत, तर्हि सा स्वार्थपरता शान्ता भवेत्। अस्माकमकर्मण्यता न केवलम् अस्माकम् , परम्परया सर्वेषां हानिमेव जनयेदिति सद्भावो बोधयितव्यः। 'अन्यो मह्यं किं यच्छति' इति चिन्तनायाः स्थाने 'मया अन्येषां किं फलम्' इति सद्भावः समुत्पाद्यः। एतदर्थमेव उपनिषत्सूक्तस्यापि सत्यादिगुणस्य '**सत्यान्न प्रमदितव्यम् , धर्मान्न प्रमदितव्यम्**' इति पुनरुक्तिः दृश्यते। यदि कस्मिंश्चित् अयं सद्भावः दृढश्चेत् तर्हि तं दृष्ट्वा अन्येषां प्रेरणा स्वयं भवति।

(3) **सौशील्यम्**— कर्मसु उत्कर्ष-निकर्षौ नैव स्तः। कर्मकराः सर्वेऽपि समानाः। सर्वैः साधारणैः सहापि सबहुमानं सप्रेम च संलाप-संव्यवहारौ कर्तव्यौ - इत्येवं निश्चित्य तथैव व्यवहरति येन गुणेन स गुणः सौशील्यमित्युच्यते। श्रीरामः अनेनैव मुख्येन गुणेन सर्वाः प्रजाः प्ररोचितवान् विनैव पृथक् प्रयत्नेन। **'राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम्'** इति ह्युक्तम्। अस्माकं महात्मा गान्धी महोदयोऽपि एतादृशीं भावनां स्वानुष्ठाने समानयन् अति कुत्सितमपि शौचालयशोधनादिकं कर्म स्वयमनुष्ठाय, सामान्यजनैः

निरन्तरं संमिल्य अहिंसामहामन्त्रं समुचितानुष्ठानपूर्वमुपदिशन् सर्वान् भारतीयान् सत्कर्मसु प्रोचितवान् इति नः प्रत्यक्षम्। अत एवाद्यत्वेऽपि गान्धिमहाशयमेवानुकुर्वन्ति सर्वे।

इदमेव सौशील्यं स्वीकार्यत्वेनोपदिशति वेदः—**'मधु मनिष्ये, मधु जनिष्ये'** इति।(a)मधु – सर्वसुखकरं विश्वहितकरं च वस्त्वेव, मनिष्ये – अहं मंस्ये।(I shall think good for Universe.) (b)मधु - सर्वलाभप्रदं कर्म, जनिष्ये - अहं करिष्यामि (I shall do work for others sake also.)

(4) **त्यागः**– ईश्वरीयं कर्मेति भावना (Dedication)

कर्मणा ईश्वरस्य संबन्धो वर्तते। वस्तुतः कर्मैव ईश्वरप्रीतिकरम् , न केवलं स्तोत्रादि। अत एवोक्तम्— **स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः** इति । यद्येवं भावो मनसि उत्पद्येत, तर्हि कर्मणि प्ररोचना अभिवृद्धा भवेत्। कर्मणां प्रवृत्तिसमये ईश्वरस्मरणं किमर्थमिति प्रश्नो न कार्यः। गीतायामेवैवमुक्तम्— **तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च** इति।

**III. वेदेषु प्ररोचना—**

(1) प्रजापतिः विविधं तपः अनुष्ठाय देवानसृजत्। तदा तैः स्वाभिलाषपूर्तिं प्रार्थितः स्वोदाहरणं दत्त्वा 'कर्मणैव सिद्धिः, अतः परिश्रमपूर्वं कर्माणि कृत्वा स्वाभीष्टं प्राप्स्यथ' इत्युक्त्वा कर्मसाधनमग्निं प्रायच्छत्। इत्येवं कथा वेदे श्रूयते—**"सोऽब्रवीत् यथाऽहं युष्मांस्तपसाऽसृक्षि, एवं तपसि प्रजननमिच्छध्वम्"** (7.1.4) इति।

(2) यदि मनुष्यो जीवितुमिच्छेत् तर्हि अवश्यं कर्म कार्यमेव। अकर्मण्यस्य जीवनमपि अप्राप्यं स्यात्। तत्र च कर्मकरणे तत्फलं नैव मनसि धार्यम्। तदात्वे फलचिन्तायां लग्नत्वान्मनसः कर्मसु समृद्धत्वं (Perfection) न स्यात्। कर्मसु च उत्कृष्टत्वनिकृष्टत्वे नैव वर्तेते। सर्वाणि कर्माणि समान्येव। अलसोदाहरणेन अकर्मणि सङ्गश्च नैव कार्यः। कर्मैव सर्वाभीष्टफलप्रदं समनुष्ठितं चेत् – इत्युच्यते ईशावास्योपनिषदि—**"कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः"** इति। मन्त्रेऽस्मिन् एवकारः समत्वं कर्मणां फलसङ्गत्यागम् , अकरणवर्जनं च सूचयति। अत एव गीतायां स्पष्टमुक्तम्—**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि॥"** इति।

(3)विलक्षणफलकं कर्म साधनीयम्। अयमपि विषयः सूचितो वेदे। कर्मफलेषु स्वस्योत्कृष्टत्वं स्वानुष्ठानविशेषेण लब्धुमेष्टव्यम्। तदैव नूतना आविष्काराः भविष्यन्ति। यदि अन्येऽप्यनुसृत्य स्वोन्नतिं

वाञ्छन्ति, तदा अस्माकं करणसामर्थ्यविशेषः (know-how) गोपनीयः इत्यपि आवेदयति श्रुतिः— **"देवा वै यद्यज्ञेऽकुर्वत…अन्यथानूच्यान्यथोपादधत"** (तै.सं.5.3.3)। असुरैरपि कर्मबलेन स्वसमानाभिवृद्धिं प्राप्तां दृष्ट्वा देवाः स्वीयेषु कर्मसु विशेषतः प्रकारविशेषं संपाद्य तानसुरान् अतिशेरते स्म इत्यर्थः।

**IV. उपनिषत्सु प्ररोचना—**

(1) उपनिषत्सु सर्वोत्कृष्टः पुरुषार्थो मोक्षः प्रतिपाद्यते। सोऽपि मोक्षः ज्ञानद्वारा कर्मणामनुष्ठानविशेषे एव संपत्स्यते इति बृहदारण्यकोपनिषदि उद्घोष्यते। **तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन** (4.22)। प्रजाः सर्वाः स्वीयं धर्मं सम्यगनुष्ठायैव आत्मज्ञानप्राप्तियोग्या भूत्वा आत्मज्ञानं लब्ध्वा अमृता भवेयुरित्यर्थः।

(2) कठोपनिषदि मन्दानामलसानां संबोधनपुरःसरमेवमुद्घोषणा वर्तते— **"उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत"**।(1.3.14) इति। वाक्यमिदं स्वामिविवेकानन्दमहाशयैः देशविदेशेषु अस्माकं भारतीयानां (Motto) रूपेण सर्वत्र श्रावितम्। (Awake, arise, and stop not till the goal is reached)

**V. अर्थवादद्वारा प्ररोचना—**

(1) **कर्तृस्तुतिः**— प्रायो जनाः स्वसामर्थ्यं स्वीयां शक्तिं च न जानन्ति। अत एव स्वसामर्थ्यं निकृष्टं मन्वानाः अनुत्साहिनो भवन्ति। अस्यां स्थितौ सर्वान् कर्मचारिणो जनान् स्तुत्या प्रोत्साह्य प्रवर्तना कार्या। अयं विषयः ऋग्वेदे एवं सूच्यते— **"अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः"** इति। सर्वे जनाः वयम् अमृताद् ब्रह्मणः उत्पन्नाः, भ्रातृतुल्याः, देवस्वरूपा एव। वयं मिलित्वा स्वकर्मभिः सुकृतैः अमृतत्वं साधयामः, तदर्था शक्तिः अस्मासु निहिता वर्तते – इत्येवं प्ररोचनाऽत्र मन्त्रे क्रियते।

(2) **कर्मस्तुत्या प्ररोचना—**

(क) यजुर्वेदे बहवो भागाः एवंरूपेण विनियुज्यन्ते। एतेषामेव भागानाम् अर्थवादः इति नाम। अर्थाय – अनुष्ठापनरूपाय प्रयोजनाय, वादः – उक्तिः इति पदार्थः। प्रजापशुसमृद्ध्ये कश्चिद् यागः उक्तः। तत्समीपे एवमुच्यते – 'पूर्वं प्रजापतिरपि इममेव यागमतिश्रमेण कृत्वा फलमिदं लब्धवान् , अतः अस्य फलप्रदत्वं निर्णीतमिति इदं कर्म प्रशस्तम्। अतः निःसंशयं कुरु' इत्येवं **स** (प्रजापतिः)**आत्मनो वपामुदक्खिदत्… प्रजां पशून् प्रजनयति** (तै,सं. 2.1.1) इति।

(ख) दारिद्र्यनिवृत्तये महान् यत्नः कार्यः। तत् पापानां फलमित्यतः महत् पुण्यं चतुर्विंशतिरात्रं कर्म कृत्वा दारिद्र्यं नाशयामः, देवत्वं च लभामहे इत्येवं पूर्वं देवाः संमन्त्र्य तादृशं सत्रयागं कृत्वा अपेक्षाधिकं लाभं प्रापुः। अतः सर्वैरपि इदं कर्मावश्यं कार्यम् — **यथा वै मनुष्या एवं...दैवीं संसदमगच्छन्...श्रीर्हि मनुष्यस्य सुवर्गो लोकः** (7.4.2) ।

(ग) तत्त्वज्ञानायास्माकं तीव्रतमो यत्न आस्थेयः, अन्यथा मोक्षमार्गो नास्ति। ब्रह्मणोऽपि प्रथमं तत्त्वज्ञानं न जातम्। तदा सोऽपि परमात्मा असर्वः सन् तत्त्वज्ञानेनैव सर्वोऽभवत्। मोक्षाय नान्यः पन्था विद्यते। अस्मान् सम्यक् प्ररोचयति बृहदारण्यकश्रुतिः — **तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत् सर्वमभवत् , तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथर्षीणां तथा मनुष्याणाम्** (1.4.10)।

(3) **कर्मनिन्दया निवृत्तौ प्ररोचना—**

यथा कर्तव्ये प्ररोचनं स्तुत्या भवति, एवम् अकर्तव्यात् निवृत्तिरपि निन्दया भवति वेदे। यदि वयं लोभादिभिः अकार्ये प्रवर्तेमहि तर्हि तत् कर्म निन्दित्वा ततो निवर्तनाय प्ररोचना निन्दार्थवादेन क्रियते। यागे रजतं दक्षिणा न देया। यदि तद् वाक्यमविश्वस्य स्वेच्छया रजतं दीयेत, तदा रजतनिन्दा एवं प्रवर्तते। यदि त्वं रजतं यागे दक्षिणां दद्याः, तर्हि तव गृहे नचिरात् रोदनकारणं महद् दुःखं भविष्यति। यतः रजतम् अश्रुजलादुत्पन्नमिति कथा वेदे उच्यते। **यदश्रवशीयत तद् रजतं हिरण्यमभवत् , तस्माद् रजतं हिरण्यमदक्षिण्यमश्रुजं हि** (तै.सं. 1.5.1)

(4) गीतायां पूर्वोक्ता त्रिविधा प्ररोचना वर्तते। कर्तृद्वारा, कर्मद्वारा, निन्दया च। (क) **कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्। अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥...नैतत् त्वय्युपपद्यते॥** (2.2, 3) ,(ख) **धर्म्याद्धि यद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते। यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्। सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्॥** (2.31, 32), (ग) **स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।** (3.35)

**VI. विविधक्षेत्रेषु प्ररोचना**—(Motivation in various fields)

(1) **विद्याभ्यासे**—(क) सर्वैरपि विद्याऽभ्यसनीया। तत्र विकल्प एव नास्ति। विद्यां विना नरो वानरो भवेत्। '**विद्याविहीनः पशुः**' इति सूक्तिः वर्तते। तैत्तिरीयोपनिषदि अत एव वेदविद्याऽभ्यसनीयेति एकादशवारं पुनःपुनः जोघुष्यते— **ऋतं च स्वाध्यायप्रवचने च** (1.6) इत्यत्र। अत्र Learning and spreading of Education उभयं निर्बध्यते एकादशवारम्।

(ख) विद्याभ्यासे वयोनियमो नास्ति। वृद्धत्वेऽपि विद्याऽभ्यसनीया इत्ययं विषयः बृहदारण्यके छान्दोग्ये च श्रूयते। श्वेतकेतोः पिता आरुणिः। श्वेतकेतुः कदाचित् देशान्तरं गत्वा समागतः। आगत्य च पितरं स्वीयां कथामेवमाह— केनचिद् राज्ञा पञ्चाग्निविद्याविषये प्रश्नः कृतः, असमर्थोऽहमुत्तरमनुक्त्वा लज्जितः प्रतिनिवृत्तः इति। तदात्वे पित्रोक्तम् आवां गत्वा तां विद्यामभ्यस्येवेति। पुत्रेण तु स्वगमनं नाङ्गीकृतम्। झटिति तदा वृद्धोऽपि आरुणिः तं देशं प्राप्य पञ्चालेषु जैवलिं राजानं संप्रार्थ्य तां विद्यां स्वीचकारेत्येवं कथायां विद्याभ्यासे Adult education विषयेऽपि प्ररोचना— **तत्र प्रतीत्य ब्रह्मचर्यं वत्स्यावः इति। भवानेव गच्छत्विति।** (बृ.उ. 6.2.4, 5)

(2) **अध्यापने प्ररोचना—**

अयमपि छान्दोग्ये वर्तते इन्द्रविरोचनौ आत्मज्ञानोपदेशं प्राप्तुं प्रजापतिं प्राप्तौ। स चोपदिदेश। उपदेशफलं ज्ञातुं प्रजापतिः तौ दृष्ट्वा तयोरुत्तरेण तद्विपरीतज्ञानं विदित्वाऽपि तयोर्निन्दनं न कृतवान्। निन्दया हि तयोः मनःक्लेशो भवेत्। तेन विद्यारुचिविघातः स्यादिति मत्वा तयोरुक्तिमर्धाङ्गीकारेण स्वीकृत्य एवं प्रोत्साहितवान्— 'एवमेव…तथापि' इत्याकारेण। (8.3.3) अत्र शांकरभाष्ये एवं विवृतम्—'यदि प्रजापतिना विपरीतग्राहिणौ युवामित्युक्तौ स्याताम् , ततस्तयोश्चित्ते दुःखं स्यात्। उत्साहविघातो भवेत्। अतो रक्षणीयौ शिष्याविति मन्यते प्रजापतिः' इति।

(3) **कठिनकार्येषु प्रोत्साहनम्—**

स्वीकृतं कर्म दुष्टमदुष्टं वा नैव त्याज्यम्। सर्वेषु कर्मसु दोषसंबन्धोऽस्ति। कर्मफलस्य संदिग्धत्वेऽपि आरब्धं कर्म नैव मध्ये त्याज्यम्। कर्मणामनुष्ठानेनैव सिद्धिः करस्था भवति। कर्मणामननुष्ठाने शरीरयात्रा ऽपि नैव संभवेदित्यादिकं भगवानुवाच। **सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।** (18.48) **सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ। ततो युद्धाययुज्यस्व नैवं पापमवाप्स्यसि।** (2.38) **तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते।** (5.2)

(4) **राजनीतौ प्ररोचना—**

धर्मात्मा रामः केवलधर्मनिष्ठोऽपि भरतं राजनीतिमुपदिशन् एवं प्ररोचयति— 'धर्मैकप्रवणतया अर्थं कच्चिन्न बाधसे। अर्थेनापि धर्मं न बाधसे वा । कामेनोभौ धर्मार्थौ कच्चिन्न बाधसे। तत् समयानुसारं त्रयाणां प्राधान्यं दातव्यमित्येष एव राजमार्गः अर्थशास्त्रे' इत्याह —

**कच्चिदर्थेन वा धर्मम् अर्थं धर्मेण वा पुनः। उभौ वा प्रीतियोगेन कामेन च न बाधसे॥** (अ.100.63)

**कच्चिदर्थं च धर्मं च कामं च जयतां वर। विभज्य काले कालज्ञ सर्वान् भरत सेवसे॥** इति।

(5)**हठाग्रहे प्ररोचना** — (Motivation on strike)

अद्यत्वे अतीवापेक्षितः अयं विषयः। कर्मचारिणो हठाग्रहम् , बाला रोदनमिव , आश्रयं लभन्ते। प्रचीनभारते अर्जुन एतादृश आसीत्। तदा तं प्ररोचयितुमेव गीताशास्त्रमारब्धम्। कृष्णं चिरात् युद्धाय निर्बध्य, रणभेरीं वादयित्वा, शत्रूणां पुरतो रथमवस्थाप्य, एतत् सर्वं कृतवन्तं कृष्णं प्रति अर्जुन एवमाह — **एतान् न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन। अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ … न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥** ( 1.35,2.9)।

अस्यां दशायां जगद्गुरुः कृष्णः प्ररोचकाग्रेसरः अस्माकमादर्शो भूत्वा तमर्जुनं कर्मणि प्रवर्तयामास प्ररोचनां कथमपि समुत्पाद्य। **'हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्। तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः॥' 'कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्। अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥' 'क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥' 'मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्'** इत्यादिना पुनःपुनः घोरं युद्धं नैव कुर्यामिति हठं कुर्वन्तं क्षमया सदुपदेशैः कृष्णः प्ररोचयामास। इत्यतः सकलं गीताशास्त्रं न केवलम् अध्यात्मशास्त्रम् , निर्वाहशास्त्रमपीति वयं मन्यामहे। अध्यात्ममार्गस्य प्रचारेणैव संपूर्णस्य समृद्धिविशेषस्योपयुक्ता प्ररोचना संपूर्णा भवेदित्यपि ममाशयः।

(6)**शोक-क्रोधयोः प्ररोचना**—

प्रायः अद्यत्वे शोके क्रोधे च जनाः उन्मत्ता इव स्वीयं कर्म त्यक्त्वा अकार्यं हिंस्रं सर्वजनहानिकरं कर्मानुतिष्ठन्ति। तदात्वे अस्माभिः कथं प्ररोचना संपाद्येति विषयः रामायणे उपलभ्यते।

(क) शोके मग्ना कौसल्या सर्वथा रामं वनगमनात् प्रतिषिध्य एवं भीषयति— अहं प्राणान् त्यक्ष्यामीति। तदा धीरोदात्तो रामः धर्मात्मा धर्म्यं वचनमेवमाह ससान्त्वं सानुक्रोशं च—

**नास्ति शक्तिः पितुर्वाक्यं संतिक्रमितुं मम। प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम्॥**

**पितुर्हि वचनं कुर्वन् न कश्चिन्नाम हीयते॥** (अयो. 21.30, 33)

(2) क्रोधे लक्ष्मणः तप्यति। भ्रातृवनगमनमसहमानः क्रोधस्य परां काष्ठामारूढो यदा लक्ष्मणो ज्वलति, वाक्याग्निना रामं दहति च। तदा राम एवैवं वक्तुं प्ररोचयितुं चार्हति—अनार्यां क्रोधबुद्धिं त्यज, धर्मं भजस्व, मातापित्रोः देवबुद्धिः उपदिष्टा खलु वेदे। सतां बुद्धिरनुसरणीया।

**धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्। धर्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम्॥** (21.44)
यतः स्वयं रामः मर्यादापुरुषोत्तमो वर्तते, तस्मादेव मद्बुद्धिरनुगम्यतामित्येवम् आत्मानमुदाहरणतया आदर्शतया स्वीकर्तुमाह। स्वतः उदाहरणतया वर्तनमेव इतरेषां मुख्यतम उपायः इति च सूच्यते।

**VII. प्ररोचनासिद्धान्ताः** (Theories on motivation)

(1) **प्रलोभनपद्धतिः**—

कर्मणां स्वनुष्ठानाय कर्मकरेभ्यः वेतनात् पृथक् प्रलोभनाय लाभविशेषः दातुं शक्यते। अयं विषयः(Correct theory) इत्युच्यते आङ्ग्ले। रामोऽपि भरतमाह– सैनिकानां प्रोत्साहनम् (Bonus) इत्यादिविशेषलाभदानं कार्यम्। कर्मकराणामपि अयमेव मार्गः शीघ्रफलप्रदो भवेत् इत्येवं मनसि निधायोक्तमेवम्— **कच्चित् बलस्य भक्तं च वेतनं च यथोचितम्। संप्राप्तकालं दातव्यं ददासि न विलम्बसे॥** (100.32)

(2) **स्वयमादर्शपद्धतिः** (Setting self example)

अस्योपायस्यैव प्रभावः जनेषु अमोघः सुदृढश्च भवेत्। सर्वसुभिक्षसमृद्धराज्यकामैः रामराज्यमेवेष्यते। तत्र कारणं किम्। रामराज्ये रामः स्वयमादर्शतमो भूत्वा सर्वान् जनान् सन्मार्गे स्थापितवान्। रघुवंशे सर्वत्रापि इयं रीतिरासीत् इति कालिदासः एवमाह– **रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम्। न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥** (1.27) **सर्वं मुदितमेवासीत् सर्वो धर्मपरो ऽभवत्** (युद्ध.131.108)

(3) **नेतॄणां सुनियमपद्धतिः** (By strict discipline of leaders)

उच्चपदेषु वर्तमानाः नेतारश्च स्वयं सुनियमबद्धाः स्वीयं कार्यं सम्यक् प्रथममनुतिष्ठेयुः। अत एव राम एवमाह—**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।**(उत्तररामचरिते)। तदात्वे तेषां नेतॄणां वचनस्य नियमस्य च प्रभावः इतरेषु कर्मकरेषु भवेत्। गीतायामपि इदमुक्तम्—**'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि। यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।' 'न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन। नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥'** (3.20,21,22)

सारथ्यं कर्म स्वयं भगवताऽनुष्ठीयते। कुतः स्वाश्रिताः सर्वेऽपि परिपालनीयाः। कर्मसूच्चावचता नास्ति। सारथिर्भूत्वा गौरवप्रश्नं नैव च वीक्षते भगवान्। सः अर्जुनस्याश्वान् अश्वपाल इव स्वयमेवाभिषिच्य, तेषां कण्डूतिमपि निवारयामास। अहो कृष्णस्य कर्मनिष्ठता ! इत्येवं कश्चित् कविराह।

**'यः पूर्णानन्दमग्नोऽप्यविषयमनसां बल्लवीनां विधेयः यश्चेन्द्रादेर्नियन्ता विजयहयतनूमार्जने सावधानः।'** इति। अद्यत्वे वाहनचालकाः वाहनचालनाय Cleaner अपेक्षन्ते।

(4) **दण्डपद्धतिः** (Stick theory )

सामदानभेददण्डेषु अन्तिमतया यथा मार्गोऽयमुक्तः इतरेषामनुपयुक्तत्वे एव, तथैव त्रयाणां पूर्वेषां यदि मोघता भवति, यदि च गत्यन्तरं ह्यपि नैव दृश्यते, तदात्वे इयं पद्धतिरपि अनुसरणीयैव। परन्तु अस्य फलं न सार्वदिकं भवेत्। अयमपि विषयः शुक्रनीतिग्रन्थे पृथगेवोक्तः दण्डनीतिरिति। रामायणेऽप्युक्तम्— **दण्डं धारयेयुः सुतेष्वपि** इति। कालिदासोऽपि एवमेव— **त्याज्यो दुष्टः प्रियोऽप्यासीत् अङ्गुलीवोरगक्षता।** इति। अत्र तु निष्पक्षपातता संपूर्णमवलम्बनीयेति ध्येयम्।

**उपसंहारः** (Conclusion)

प्ररोचना सर्वाऽपीयं संस्कृतिमवलम्ब्यैव पूर्णं साफल्यमावहति। संस्कृतिर्नाम आत्मवत् परस्यापि दर्शनभावनैवेति संग्रहेण वक्तुं शक्यते। संस्कृतिः मूलतः मनुष्यं स्वार्थैकपरतायाः निवर्तयति। सद्भावनां सच्चरित्रतां च तस्य समुल्लासयति। गुणैकग्राहित्वमपि संस्कृतेः महान् गुणो भवति। एवं दोषदर्शनमन्येषु शमयति। एतदर्थं गुणत्रयं सर्वेषु यत्नतः उत्पाद्यम् , स्मरणीयं च पुनः पुनः। ते च गुणाः दानम् , दमः, दया चेति। विविधानां नराणां देवासुरमानुषभावयुक्तानाम् इदं त्रयमावश्यकम्। अत एव बृहदारण्यके, छान्दोग्ये च सर्वशास्त्रसारत्वेनेदं त्रयमुपदिष्टं प्रजापतिनेति कथा श्रूयते।

(1) तैत्तिरीयोपनिषदि च दानविषये **श्रिया देयम्** इत्यादि वर्णितम्। दानं च न केवलं धनस्यैव, अपितु स्वसामर्थ्यस्य शक्तेश्च स्वीकृते कर्मणि वञ्चनामकृत्वा संपूर्णतया ससंतोषं समर्पणमपि मुख्यं दानं भवितुमर्हतीति म आशयः। अत एव 'श्रमदानम्' इत्येवास्य प्रसिद्धिः।

(2) इन्द्रियाणां दशानामश्वरूपाणां नियमनं दमरूपमवश्यमाश्रयणीयम्। ते न नियम्यन्ते चेत् नायं लोकोऽस्ति, न परश्च। अत एव कठोपनिषदि उक्तम्— **यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥**

(3) दया नाम परदुःखनिवारणे प्रवर्तको भावः। इयमेव परार्थे प्रेरयति। इयमपि आवश्यकी। एतैस्त्रिभिः गुणैः क्रमेण दोषत्रयस्य नरकद्वारस्य नाशो भवेत् , self motivation च भवेत्।

दानं लोभम् , दमः कामम् , दया क्रोधं च नाशयति। दोषत्रयमेतदेव कर्तव्येषु कर्मसु निरुणद्धि। एतैर्विमुक्तश्चेत् यथाशक्ति सर्वजनसुखाय सर्वजनहिताय स्वयं प्रवृत्तो भवेल्लोकः। इति प्रेरणातत्त्वमुपदिशति भगवान्— **एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥**

# शब्दसाधुत्वविचारः

डा० कू० श्यामसुन्दरभट्टः

सहायकाचार्यः, व्याकरणविभागः,

मद्रपुरीसंस्कृतमहाविद्यालयः , मयूरपुरी , चेन्नै–४.

मौनिश्रीकृष्णभट्टेन स्वकृतवृत्तिदीपिकाग्रन्थे शब्दसाधुत्वविषये अस्ति कश्चन विचारः प्रवर्त्तितः। तेन हि तत्र नैयायिकमतखण्डनपूर्वकं वैयाकरणसिद्धान्तः सम्यक् न्यरूपि । तदिदमत्र यथामति विचार्यते।

**श्रीकृष्णभट्टमतम्**

साधुशब्दः कः इत्यत्र आह वृत्तिदीपिकाग्रन्थकारः - " यः शब्दः यत्रार्थे व्याकरणव्युत्पन्नः सः तत्रार्थे साधुः" [1]इति । तेन तत्तदर्थे व्याकरणव्युत्पाद्यत्वं शब्दनिष्ठं साधुत्वम् इति लभ्यते । कस्य शब्दस्य कस्मिन्नर्थे व्याकरणव्युत्पन्नत्वम् अस्ति इति कथं ज्ञातुं शक्यते इत्यत्र उच्यते - क्वचित् स्पष्टोपलभ्यमानव्याकरणात् स्पष्टं ज्ञातुं शक्यते। यथा गोणीशब्दस्य आवपनार्थे । तथाहि - गुणधातोः घञ् प्रत्ययेन निष्पन्नात् गोणप्रातिपदिकात् स्त्रियाम् आवपनार्थे "जानपदकुण्डगोण.. " [पा.सू.४.१.४२.] इत्यादिसूत्रेण ङीषि सिद्धः गोणीशब्दः। तथा च सः आवपनार्थे शक्तः। अत्र आवपनशब्दः ओप्यते = निक्षिप्यते अस्मिन् इति आङ्-पूर्वकात् वपेः अधिकरणल्युटा निष्पन्नः। अतः आवपनं नाम भाजनविशेषः यत्र धान्यादि निक्षिप्य नीयते। एवञ्च गोणीशब्दः आवपनार्थे साधुः इति स्पष्टं ज्ञायते व्याकरणात् । क्वचिच्च शिष्टप्रयोगेण, कोशादिभिश्च तदनुमीयते । तथा अनुमितस्यापि व्याकरणे सङ्ग्रहः दृश्यते बाहुलकादिना। उक्तं च बहुलग्रहणविषये-

**"क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**
**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥**[2]" इति।

अत्रेयं शङ्का– शक्तशब्दविषये उक्तपूर्वं साधुत्वं सङ्गच्छेत, तज्ज्ञानमपि उक्तरीत्या संपाद्येत, परन्तु लाक्षणिके उक्तरूपं साधुत्वं कथं संभवति इति । तत्रोच्यते – लाक्षणिकेऽपि संभवत्येव साधुत्वम्। तच्च

---

[1] वृत्तिदीपिका३.पृ..

[2] मध्यसिद्धान्तकौमुदी. पृ.३४१.

व्याकरणेन स्पष्टं ज्ञातुं न शक्यते चेदपि शिष्टप्रयोगादिना अनुमातुं शक्यते एव। अत एव तात्पर्यानुपपत्तिः, तात्स्थ्यं, ताद्धर्म्यम् इत्यादयः हेतवः लक्षणायां पण्डितैः प्रदर्शिताः[3]।

यद्वा लक्षणास्थले प्रथमं शक्यार्थबोधस्यावश्यकत्वात् तमर्थमादाय साधुत्वं वक्तुं शक्यं, तत्र व्याकरणव्युत्पाद्यत्वस्य सत्त्वात् । एवं लाक्षणिकस्थले शक्यार्थमादाय साधुत्वाङ्गीकारादेव " गङ्गायां घोषः" इत्यादौ गङ्गाव्यवहितसमीपस्थघोषविषयके प्रयोगे गङ्गापदस्य तीरपरत्वेऽपि स्त्रीप्रत्ययादिः सङ्गच्छते। तट इति पुंलिङ्गशब्देन, तटी इति स्त्रीलिङ्गशब्देन, तटम् इति नपुंसकलिङ्गशब्देन बोध्यमानत्वात् तीरस्य लिङ्गत्रयविशिष्टत्वेऽपि तत्परत्वे गङ्गापदस्य पुं-नपुंसकयोः प्रयोगः अत एव कदापि न भवति । न च गङ्गापदस्य नित्यस्त्रीलिङ्गत्वादेव तथा प्रयोगः इति वाच्यम्। यतो हि त्रिलिङ्गः तटशब्दः यदा तट्यां विद्यमानः पुरुषः इत्यर्थं तात्स्थ्यात् लक्षणया बोधयितुं प्रयुज्यते, तदा तटी आगच्छति इत्येवं स्त्रीलिङ्ग एव प्रयुज्यते, न तु तटः इति पुंस्त्वेन विपरिणमय्य प्रयुज्यते।

एतादृशसाधुत्वज्ञानस्य न शाब्दबोधं प्रति कारणत्वं, यः साधुशब्दं साधुत्वेन न जानाति, तस्यापि बोधसंभवात्। एवम् असाधुत्वनिश्चयस्य शाब्दबोधप्रतिबन्धकत्वमपि न, असाधुत्वनिश्चयस्य सत्त्वेऽपि विदुषामपि प्राकृतात् अन्यभाषादितश्च बोधसंभवात् । संस्कृतम् अविदुषां तु अन्यभाषात एव बोधस्य सर्वानुभवसिद्धत्वाच्च। एवञ्चात्र अयं संशयः उदेति यत् एतादृशसाधुत्वविचारस्य किं फलम् ? कुत्र चास्य साधुत्वस्य उपयोगः इति । तत्रोच्यते-- साधुत्वज्ञानमेव साधुत्वविचारस्य फलम्। साधुत्वज्ञानस्य च पुण्यजननं प्रति उपयोगः इति । अत्र च विषये " एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति "[4] "साधूनेव प्रयुञ्जीत" इत्यादिश्रुतिरेव प्रमाणम्। अत्र हि 'कामधुग् भवति' इत्यनेन साधुशब्दज्ञानस्य सकलकामनावाप्तिः फलम् उक्तम्। सकलकामनावाप्तेश्च विना पुण्यम् असंभवात् साधुशब्दज्ञानस्य पुण्यजनकत्वम् अङ्गीक्रियते। अत्र यद्यपि तज्ज्ञानस्य पुण्यजनकतोक्ता तथापि ज्ञानविषयत्वात् साधुत्वस्यापि तत्संभवति इति ज्ञेयम्। एवञ्च पुण्यजनकतावच्छेदकं तत्तदर्थे व्याकरणव्युत्पाद्यत्वं साधुत्वमिति फलितम्। यद्वा व्याकरणव्यङ्ग्यः अर्थविशिष्टशब्दनिष्ठः पुण्य-

---

[3] लघुमञ्जूषा प्रथमभागः१९१.पृ.,२१८ , महाभाष्यम् .४.४८.१.

4 महाभाष्यम्८४.१.६..

जनकतावच्छेदको जातिविशेषः साधुत्वम्। अत्र व्याकरणशब्दः शिष्टप्रयोगकोशादीनाम् अप्युपलक्षणम् इति तेषाम् आशयः॥

**नैयायिकमतम् , तन्निरासश्च**

नैयायिकास्तु , सङ्केतितत्वम् साधुत्वम् अर्थात् 'अस्मात्पदादयमर्थो बोद्धव्यः' इत्याकारकेश्वर-सङ्केतविषयत्वं साधुत्वम् इत्याहुः[5]। केचित्तु वृत्तिमत्त्वं साधुत्वम् इत्याहुः[6]। तदयुक्तम् । यतो हि – नैयायिकाः कृत्तद्धितसमासादिषु वृत्तिषु पृथक् शक्तिम् अर्थात् समुदायशक्तिं नाङ्गीकुर्वन्ति, अवयवशक्त्यैव अन्वयद्वारा अर्थवर्णनं कुर्वन्ति । यत्र च अन्वयेनापि विवक्षितार्थलाभो न स्यात् तत्र लक्षणाम् आश्रयन्ति । एवञ्च तन्मते समासादिवृत्तिषु कुत्रापि शक्त्यभावात्= सङ्केताभावात् तेषां साधुत्वं न स्यात् । एवमेव अन्यत्रापि प्रकृतिप्रत्ययसमुदाये शक्त्यभावात् तन्मते साधुशब्दा एव दुर्लभाः स्युः, प्रायः सर्वेषामपि शब्दानां प्रकृतिप्रत्ययसमुदायरूपत्वात्। यद्यपि अत्र प्रकृतेः प्रत्ययस्य च तत्तदर्थे प्रत्येकं शक्तिरस्ति। परन्तु तामादाय समुदायस्य साधुत्वं नैव वक्तुं शक्यम्। यदि प्रत्येकशक्तिम् आदाय समुदायस्य साधुत्वम् उच्येत, तर्हि 'बाधते' इत्यादिवत् 'बाधति' इत्यादेरपि साधुत्वापत्तिः 'बाध् ' इति धातुभागस्य लोडने = प्रतिघाते, प्रत्ययस्य 'ति' इत्यस्य कर्त्रादौ च शक्तेः सत्त्वात् । एवञ्च प्रत्येकशक्तिमादाय समुदायस्य शक्तिमत्त्वं, साधुत्वं च नैव वक्तुं शक्यम्।

तथैव द्योतकानामपि कुत्रापि शक्त्यभावात् असाधुतापत्तिः। न च द्योतना नाम औपसन्दानिकी शक्तिरेव इत्यतः तेषामपि शक्तिमत्त्वम् अस्त्येव इति वाच्यम् , उपसन्दीयते इत्युपसन्दानं=समभिव्याहृत-पदम् , तद्वृत्तिशक्त्युद्बोधकत्वम् इति तदर्थात् , शक्त्युद्बोधकत्वस्य शक्तित्वाभावाच्च।

अपि च लाक्षणिकानामपि पदानां लक्षणावृत्तेः सत्त्वेऽपि लक्ष्यार्थे शक्त्यभावात् साधुत्वं न स्यात्। न च तेषां लक्ष्यार्थे शक्त्यभावेऽपि, शक्यसम्बन्धस्यैव लक्षणात्वात् , अवश्यं क्वचित् शक्तिः अङ्गीकार्या। एवञ्च तयैव तेषां शक्तत्वात् साधुत्वमपि सिद्ध्यत्येव इति वाच्यम् , गोणी इत्यादीनामपि गवाद्यर्थे साधुतापत्तेः। तथाहि– पूर्वोक्तरीत्या गोणीशब्दः आवपनार्थे साधुः। प्राकृतादिषु तु गोणीशब्दोऽयं गवि प्रयुज्यते। परन्तु तदा सः न साधुत्वेन गण्यते । त्वन्मतेऽपि तस्य गवि ईश्वरसङ्केताभावेन शक्तिमत्वाभावात्

---

[5] वृत्तिदीपिका.पृ.२., न्यायसिद्धान्तमञ्जरी-बृहत्तर्कप्रकाशः पृ.१६३. ।

[6] शब्दशक्तिप्रकाशिका१३८.पृ., वृत्तिदीपिका२.पृ..

न साधुत्वम् । उक्तं च महाभाष्येऽपि तस्यापभ्रंशत्वम् – "गौरित्यस्य गावी गोणी गोता गोपोतलिका इत्येवमादयोऽपभ्रंशाः" [7] इति। यदि लाक्षणिकानां क्वचिच्छक्तत्वं पुरस्कृत्य साधुत्वम् उच्येत, तर्हि गोण्यादीनामपि आवपनाद्यर्थे शक्तत्वात् गवादिष्वपि साधुता स्यात्। एवञ्च सङ्केतितत्वं साधुत्वम् इत्यादिमतम् अयुक्तम्[8] इति तदभिमतम् ।

**विमर्शः**

अत्र वृत्तिदीपिकाग्रन्थकारैः शक्तिमत्त्वं साधुत्वमिति नैयायिकमतखण्डनावसरे लाक्षणिकस्थले शक्यार्थम् आदाय साधुत्वं यद्युच्येत तर्हि अपभ्रंशानामपि साधुता स्यात् इत्युक्तम्। परन्तु स्वमतप्रतिपादनावसरे लक्षणास्थले शक्यार्थमादायैव साधुत्वम् उक्तम्। तत्कथं सङ्गच्छते ? ग्रन्थकृन्मते मतान्तरोक्तदोषः किमिति न भवति ? इति संभवत्यत्राकाङ्क्षा। तत्रैवं विचार्यते – अपभ्रंशोऽनेकविधः। कस्मिंश्चिदर्थे व्याकरणेन व्युत्पादितः शब्दः अर्थान्तरे प्रयोगेण अपभ्रंशः संभवति। अयमेकः अपभ्रंशः। अपरश्च - कश्चन शब्दः न कस्मिन्नप्यर्थे व्याकरणेन व्युत्पादितः, परन्तु लोके कस्मिंश्चिदर्थे प्रयुज्यते इत्येतादृशः। एवमन्येऽपि। तत्र प्रथमस्योदाहरणं गोणीशब्दः। अयञ्च आवपनार्थे व्याकरणेन व्युत्पादितः। परन्तु कैश्चित् गवि प्रयुज्यते[9]। अतः तदा अयम् अपभ्रंशत्वेन गण्यते। द्वितीयस्य उदाहरणं गगरीशब्दः। नायं कस्मिन्नप्यर्थे व्याकरणेन व्युत्पादितः, परन्तु कैश्चित् घटे प्रयुज्यते[10]। तत्र पूर्वोक्तसाधुतापत्तिशङ्का प्रथमापभ्रंशविषये एव संभवति न द्वितीयापभ्रंशविषये , तस्य कुत्रापि शक्त्यभावात्।

न च– अर्थभेदात् शब्दभेदः इति न्यायेन आवपनार्थकगोणीशब्दात् गवि प्रयुज्यमानः गोणीशब्दः भिन्नः। अतः तस्य कुत्राप्यर्थे व्याकरणव्युत्पादितत्वाभावात् साधुत्वं नैव संभवति इति– वाच्यम् , लाक्षणिकस्यापि शक्तात् भिन्नत्वेन असाधुतापत्तेः। अथ शक्यसम्बन्धस्यैव लक्षणात्वेन लाक्षणिकस्थले व्याकरणव्युत्पादितशक्यार्थस्य नियमेनोपस्थितेः सत्त्वात् तमर्थम् आदाय साधुत्वं वक्तुं शक्यम्। गोणी इत्यादयः आवपनाद्यर्थे यद्यपि व्याकरणेन व्युत्पादिताः तथापि तेषां गवादिषु प्रयुज्यमाने, तेभ्यः

---

7 महाभाष्यम्पस्प.६३.पृ.शाह्निकम्।

8 वृत्तिदीपिका३.पृ..

9 महाभाष्यम् पृपस्पशाह्निकम् .६३.।

10 लघुमञ्जूषा प्रथमभागः १२७.पृ..

लाक्षणिकस्थले इव नियमेन आवपनाद्यर्थोपस्थितेः कदापि अभावात् न तेन अर्थेन तेषां साधुत्वापत्तिः कर्तुं शक्या इति चेत् न नैयायिकमतेऽपि तुल्यत्वात् । उक्तं हि श्लोकवार्त्तिके –

**"तस्माद्यत्रोभयोर्दोषः परिहारोऽपि वा समः।**

**नैकः पर्यनुयोक्तव्यः तादृगर्थविचारणे॥ "**[11]

इति। एवञ्च ग्रन्थकृतः नैयायिकमते उक्तरीत्या दोषापादनं न युक्तमिति भाति ।

वस्तुतस्तु विचारोऽयं मतान्तराभिप्रायेण । स्वमते अर्थात् वैयाकरणमते लाक्षणिके असाधुत्वशङ्कावसर एव न । तथा हि – वैयाकरणानां शक्यतावच्छेदकारोपे लक्षणाव्यवहारः[12]। ग्रन्थकृतोऽप्यत्र नास्ति विप्रतिपत्तिः। एवञ्च लाक्षणिकादपि शक्यतावच्छेदकप्रकारक एव बोधः इत्यतः लक्ष्यार्थोऽपि शक्यार्थाभिन्नः इति तेनैव तस्य साधुत्वसंभवात् न तत्र असाधुत्वशङ्कावसरः। लक्षणा न पृथग्वृत्तिः, अपि तु शक्तेः प्रभेदः एव इति परमसिद्धान्ते तु सुतराम्। एवञ्च ग्रन्थकृन्मते उक्तरीत्या शक्यार्थेन लाक्षणिकस्य साधुत्वसंभवात् ग्रन्थकृदुक्तौ पूर्वोक्तायुक्ततादोषः नास्त्येवेति बोध्यम्।

अपभ्रंशेऽपि शक्तिरस्ति। तथापि तस्य न साधुत्वम् । पुण्यजनकतावच्छेदकं तत्तदर्थे व्याकरणव्युत्पाद्यत्वं , व्याकरणव्यङ्ग्यः शब्दनिष्ठः पुण्यजनकतावच्छेदको जातिविशेषो वा साधुत्वम् । अपभ्रंशे तदभावात् न तस्य साधुत्वम्। शक्तत्वं साधुत्वम् इति तु न युक्तम् । साधुत्वज्ञानस्य च पुण्यजनने उपयोगः। इत्यादिविषये प्रायः सर्वेषां वैयाकरणानाम् ऐकमत्यमेव[13]। उक्तञ्च भाष्येऽपि -"समानायाम् अर्थावगतौ शब्देन च अपशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयः नापशब्देनेति। एवं क्रियमाणम् अभ्युदयकारि भवति इति"[14] इति । शब्दसाधुत्वे हि व्याकरणमेव प्रमाणम् इति मीमांसकैरपि सिद्धान्तितं व्याकरणाधिकरणे[15]॥

**॥इति शम् ॥**

---

11 श्लोकवार्त्तिकम्, शून्यवादः.२५२.श्लो.

12 लघुमञ्जूषा प्रथमभागः२१७.पृ.

13 वैयाकरणभूषणसारः.२८८.२८४.पृ., लघुमञ्जूषा प्रथमभागः१७४.१२४.पृ..

14 महाभाष्यम् पृपस्पशाह्निकम् .५८.।

15 भाट्टदीपिका ८.३.१.

## परिशीलितग्रन्थाः

**महाभाष्यम् -** प्रदीपोद्योतसहितम् । गुरुप्रसादशास्त्रिग्रन्थमाला १-। वाणीविलासप्रकाशनम् । वाराणसी.१९८७ -

**महाभाष्यम् -** प्रथमनवाह्निकम् । प्रदीपोद्योताभिनवराजलक्ष्मी शब्दकौस्तुभसहितम् । गुरुप्रसादशास्त्रिग्रन्थमाला १- वाणीविलासप्रकाशनम् । वाराणसी.१९८८-

**वैयाकरणसिद्धान्तलघुमञ्जूषा-** कलाकुञ्जिकासरलाटीकासहिता। संपूर्णानन्दसंस्कृतविश्वविद्यालयः। वराणसी .१९९०-

**न्यायसिद्धान्तमञ्जरी** - बृहत्तर्कप्रकाशसहिता । श्रीमदम्बिकाचरणचट्टोपाध्यायद्वारा काश्यां मुद्रिता ।१९४३ .

**शब्दशक्तिप्रकाशिका -** कृष्णकान्ती-प्रबोधिनी-टीकाद्वयोपेता। चौखम्बासंस्कृतसंस्थानम्। वाराणसी।

**श्लोकवार्त्तिकम् -** श्रीपार्थसारथिमिश्रकृतन्यायरत्नाकरटीकासहितम् । रत्नभारतीग्रन्थमाला-४। रत्ना पब्लिकेशन्स् । वाराणसी- १९९३.

**वैयाकरणभूषणसारः** - दर्पण) सुबोधिनी-हिन्दी व्याख्योपेतः (। व्रजजीवन प्राच्य भारती ग्रन्थमाला –४२ । चौखम्बासंस्कृतप्रतिष्ठानम्।

**भाट्टदीपिका -** शम्भुभट्टकृतप्रभावलीटीकासहिता। गरीबदास प्राच्यविद्याप्रकाशन् -५१-५२। श्रीसद्गुरुप्रकाशनम्। देहली।

**वृत्तिदीपिका-** मौनिश्रीकृष्णभट्टविरचिता। सरस्वतीभवनप्रकाशनम्। १९३०. [PRINCESS OF WALES, SARASVATI BHAVANA TEXTS , NO 29]

**मध्यसिद्धान्तकौमुदी –** मध्यमनोरमा-मध्यमनोरमापूरणीटीकासहितः। सरस्वती संस्कृत सीरिज़-१। जगदीश संस्कृत पुस्तकालयः, जयपुर।

# निगमकल्पतरोर्गलितफलम्

सु. उमापतिः

साहित्यविभागाध्यक्षः

मद्रपुरीसंस्कृतकलाशाला , चेन्नै-४

निखिलविद्वज्जनविदितमेवैतत् यदिदं श्रीमद्भागवतपुराणं परमहंससंहितात्वेन निगमकल्पतरुगलितफलत्वेन च प्रसिद्धमिति । हेतुनानेन ज्ञायते यदत्र विद्यमाना विषया वेदान्तसम्बद्धा भवेयुरिति, तथापि महर्षिणा व्यासेन यद्रचितं ब्रह्मसूत्राख्यं ग्रन्थरत्नं, तत्रत्यानाम् अधिकरणानां सारभूताः, अथवा अनुवादका विषयाः पुराणेऽस्मिन् विविधस्थलेषु राराजति। तेषां 'स्थालीपुलाकन्यायेन' अध्यायचतुष्टयात् कानिचन अधिकरणानि स्वीकृत्य भागवतपद्यरत्नैः समन्वयीकृत्य प्रदर्श्यतेऽधुना।

तत्रादौ ब्रह्मसूत्रप्रथमाध्यायप्रथमपादे द्वितीयमधिकरणं भवति 'जन्माद्यधिकरणम्' इति। इदं चाधिकरणं 'जन्माद्यस्य यतः' इत्येकसूत्रघटितम्। अधिकरणस्यास्य विषयो वर्तते पूर्वाधिकरणप्रस्तुतब्रह्मजिज्ञासाया लक्ष्यभूतस्य ब्रह्मणः स्वरूपकथनमिति। तत्र च तटस्थलक्षणप्रतिपादकमधिकरणम् । अत्र हि 'यतो वा इमानि भूतानि जायन्ते , येन जातानि जीवन्ति , यत्प्रयन्त्यभिसंविशन्ति' इति विषयवाक्यम् । एतदाधारेण 'यस्मादस्य जगतः सृष्टिस्थितिसंहारादयः, तदेव ब्रह्मेति' तटस्थलक्षणं प्रोक्तम्। यावल्लक्ष्यकालमनवस्थितत्वेन स्वरूपानन्तर्गतं सत् यल्लक्ष्येतरव्यावृत्तिं बोधयति तत्तटस्थलक्षणम् । इत्थं जगत्सृष्ट्यादिकारणभूतं यत्तदेव ब्रह्मेति तटस्थलक्षणं प्रोक्तं ब्रह्मणोऽस्मिन्नधिकरणे ।

निगमसारभूते श्रीमद्भागवतेऽपि आदावेव विषयोऽयं प्रतिपादितो वर्तते - (१.१.१)

**जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्**
**तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।**
**तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा**
**धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥**

श्लोकेऽमुष्मिन् ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणञ्चेति द्विविधमप्यापादयति भगवान् व्यासः स्वस्य इतरग्रन्थविषयसारम् । इह हि ' **धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परम्** ' इत्यादिना स्वप्रकाशत्वेन

निरस्तमायालक्षणं सत् सत्यभूतं नित्यबुद्धशुद्धस्वरूपम् ' इति स्वरूपलक्षणं ब्रह्मणो निरूप्य ' जन्माद्यस्य यतोऽन्वयादितरतश्च ' इत्यादिमपाद एव अधिकरणविषयमारभत महर्षिः । तत्रापि पूर्वपक्षरूपेण यो वादः कृतो भाष्ये तदनुगुणमत्रापि इतरव्यावृत्यर्थं विशेषणान्तराणि दत्तानि 'अर्थेष्वभिज्ञः' 'स्वराट्' इत्यादीनि । तत्र जगत्कारणत्वेन प्रधानं न भवितुमर्हतीति अभिज्ञपदेन प्रोच्यते । एवं चेतनः जीवो वा इत्यस्य ' स्वराट्' इति स्वतः सिद्धज्ञानत्वेन तद्व्यावृत्तिः क्रियते । इत्येवं जन्माद्यधिकरणस्थविषयाः सूपपादिता ह्यत्र पद्ये ।

प्रथमाध्यायद्वितीयपादेऽधिकरणमस्ति ' अत्त्रधिकरणम् ' इति । कठवल्लीषु पठितः-

**यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनः ।**

**मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥**

इति मन्त्रः अत्र विषयवाक्यत्वेन वर्तते । अत्र ओदनोपसेचनसूचितः अत्ता प्रतीयत इति कृत्वा सूत्रमारचितं व्यासाचार्येण ' **अत्ता चराचरग्रहणात्** ' इति । अत्र ' **अग्निरन्नादः** ' इति श्रुतिप्रसिद्धिभ्याम् अग्निर्वा, '**तयोरन्यः पिप्पलं स्वाद्वत्ति**' इति श्रुत्या जीवो वा इति पूर्वपक्षे, ओदनोपसेचनप्रतीतम् अत्तृत्वं अर्थात् संहारकत्वम् ईश्वरस्यैव सिध्यति , मृत्युपदेन लक्षितचराचरग्रहणादिति समाधीयते ।

श्रीमद्भागवतेऽपि ब्रह्मप्रतिपादकप्रसङ्गे एवं वक्ति स एवायं व्यासाचार्यः - (१.३.३६)

**स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।**

**भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥** इति ।

अत्र लीलया संसृष्टलोकः यः स एव लोकमिमं पालयति , **अत्ति च** इति ईश्वरस्य अत्तृत्वञ्चोक्तं संहारार्थे। तथा चोपनिषदि लक्षणया कथितस्य अत्तृत्वस्य साक्षात्सङ्कीर्तनमत्रात्तीत्यनेन। तदपि भोजनार्थे न, अपितु संहारार्थे इति यदुक्तं , तच्च चराचरग्राहकविश्वपदेन प्रतिपादितमिति, अत्त्रधिकरणसारः सुतरां समन्वेति।

एवमेव प्रथमाध्यायतुरीयपादे कारणत्वाधिकरणे भिन्नभिन्नोत्पत्तिक्रमवर्णनेन ब्रह्मणः जगत्कारणत्ववत् सांख्योक्तस्य प्रधानस्यापि कारणत्वं सम्पन्नमेवेति पूर्वपक्षः ' **असद्वा इदमग्र आसीत्** ' इत्यादिश्रुतिभिः । किन्तु सृज्येषु भेददर्शनेऽपि स्रष्टुः क्वापि भेदः वेदान्ते नोपनिबद्ध इति '**कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः** ' इति सूत्रेण आकाशादिषु कारणत्वेन यद्ब्रह्म यथानिर्दिष्टमेकत्र , तथैव इतरोपनिषत्स्वपि उक्तमस्तीति सिद्धान्तः । '**समाकर्षादि**'ति सूत्रेण च मन्त्रे ' असत् ' इति पदस्य ' अव्याकृतस्य ब्रह्मणो निर्देश ' इति समाधानं दत्तम् "असदिवासीत् इत्युपचर्यते " इति भाष्ये ।

पुराणोत्तमे च भागवते अधिकरणस्यास्य सारांशः मैत्रेयमुखाद्दत्तो विद्यते - (३.५.२४)

**स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् ।**

**मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्** ॥ इति ।

पद्येऽस्मिन् सृष्ट्यादौ भगवान् द्रष्टा सन् दृश्यं सृष्ट्यर्थं प्रधानं नापश्यत् , एकराडेवासीदिति हेतोः। अतः आत्मानं असन्तमिव मेने अर्थात् उत्पत्स्यमानमात्मानं समष्टिविराजं स्वस्मिन् सूक्ष्मरूपेण सन्तमपि असन्तमेव मेने, प्रकृतीक्षणं विना तस्य प्राकट्यसंभवात् । अथवा सुप्ता मायाद्याः शक्तयो यस्य, सः चिच्छक्तियुतःसन् आत्मानम् असन्तमिव मेने इति निगद्यते । सैव सुप्ता शक्तिः मायेति वेदान्ते कीर्त्यते, नतु कापिलं किञ्चित् स्वतन्त्रं प्रधानमिति अधिकरणसारः दृश्यते ।

द्वितीयाध्यायप्रथमे पादे अस्तीदं भोक्त्रापत्त्यधिकरणम् । अत्र हि ब्रह्मणो द्विविधकारणत्वे श्रुतिसंमतेऽपि भोक्तृभोग्यविभागस्य विरोधो दृश्यते इत्याक्षेपः, समुद्रतरङ्गन्यायेन अविरोध इति सिद्धान्तः। यथा समुद्रे जायमानतरङ्गे समुद्राद्भिन्नत्वमभिन्नत्वञ्च दृश्यते तथैव भोक्तृभोग्यभावोऽपीति राद्धान्तः कृतः व्यासाचार्येणास्मिन्नधिकरणे '**भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्** ' इति ।

विषयमिमं भागवते दशमे स्कन्धे रासपञ्चाध्याय्या अन्ते श्रीशुको वदति - (१०.३३.१७)

**एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ।**

**रेमे रमेशो व्रजसुन्दरीभिर्यथार्भकः स्वप्रतिबिम्बविभ्रमः** ॥ इति ।

अत्र निर्गुणस्य परमात्मन एव बिम्बप्रतिबिम्बवत् श्रीकृष्णव्रजसुन्दरीरूपेण भोक्तृभोग्यत्वमुक्तम् दृश्यते। यथा बिम्बप्रतिबिम्बयोरभेदेऽपि भेदो दृश्यते तद्वदेव भोक्तुः श्रीकृष्णस्य गोपिकारूपजीवजातस्य भेदेऽप्यभेदः प्रत्यपादि श्रीशुकाचार्येण ।

द्वितीयाध्यायतृतीयपादे स्थूलसूक्ष्माणामुत्पत्तिं निरूप्य जीवस्योत्पत्तिं परिहरति चराचरव्यपाश्रयाधिकरणेन । पूर्वमीमांसायां वैश्वानराधिकरणे 'पुत्रे जाते एतामिष्टिं निर्वपेत् ' इत्युक्तत्वात् ,' मम पुत्रो जातः ' इति लोकव्यवहाराच्च उत्पत्तिनाशौ जीवस्य भवेतामिति पूर्वपक्षे , '**जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते** ' इत्यादिश्रुतिभिः शरीरस्यैव जन्ममरणे उच्येते, न तु जीवात्मनः । उच्यते हि आत्मनि उपचारेण इति कथयति सूत्रमिदं , ' **चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्** ' इति ।

विषयोऽयं वेदान्तसारभूते भागवते एवमुच्यते - (७.७.१८)

**जन्माद्या षडिमे भावा दृष्टा देहस्य नात्मनः ।**

**फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना** ॥ इति ।

यथा वृक्षे स्थिते एव फलस्य उत्पत्तिः, सत्ता , वृद्धिः , विपरिणामः, अपक्षयः, नाश इति षड्विकाराः संभवन्ति , तथैव जीवात्मयुतस्य शरीरस्यैव जन्माद्याः भावा भवन्ति, न तु जीवस्येति ।

तृतीयाध्यायस्य प्रथमपादे इष्टादिकारिणश्चन्द्रमसमारुह्य यावत् संपातं तत्रोषित्वा पुनरवरोहन्तीति प्रोच्यते छान्दोग्ये ' **अथ एतम् एवाध्वानं पुनः निवर्तते यथेतमाकाशं , आकाशाद्वायुं वायुर्भूत्वा धूमो भवति , धूमो भूत्वा अभ्रं भवति , अभ्रं भूत्वा मेघो भवति , मेघो भूत्वा प्रवर्षति** ' इति । अत्र वायुर्भूत्वा , अभ्रं भूत्वा , मेघो भूत्वा इत्यादिना तत्स्वरूपमेव प्राप्नोतीति पूर्वपक्षः । परं ' **साभाव्यापत्तिः उपपत्तेः** ' इति सूत्रेण उपपत्त्या समानत्वमथवा वश्यत्वं वा विवक्ष्यते इति सिद्धान्तः कृतः। तेन आकाशभूतस्य जीवस्य वायुत्वप्राप्त्यनुपपत्त्या , तस्मादन्यत्प्राप्तिविरोधाच्च आकाशवत् सूक्ष्मरूपं , वायुवत् अथवा वायुना , धूमेन सह स्थित्वा इति लक्ष्यार्थ एव ग्राह्य इति ।

अयञ्च विषयस्तथैवानूदितो भवति भागवते - (७.१५.५०,५१)

**द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः ।**
**अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥**
**अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः ।**
**एकैकश्येनानुपूर्वं भूत्वा भूत्वा प्रजायते ॥** इति ।

सोमलोकं प्राप्तः जीवः तद्भोगावसाने विलीनदेहः वृष्टिद्वारेण ओषधिवीरुधादिसाम्यापत्तिक्रमेण पुनः जायते। तत्र क्रमेण भूत्वा भूत्वा इत्यस्य स्थित्वा स्थित्वेत्यर्थः स्वीकार्यः, प्रजायते इत्युत्तरपदा-भिधानात् । इत्थं साभाव्याधिकरणविषयविशेषः प्रतिपादितः ।

तृतीयाध्यायद्वितीयपादे तृतीयमधिकरणं भवति कर्मानुस्मृतिशब्दविध्यधिकरणम्। अत्र च विचारितो विषयोऽयं भवति यत् सुषुप्तौ सत्संपन्नत्वं जीवस्योक्तम् , तर्हि पुनरुत्थानं तस्यैव वा उत अन्यस्येति। तत्रायं पूर्वपक्षः यथा जले सिक्तं जलं पुनर्विवेक्तुं न शक्यते। तथा सत्संपन्नः पुरुषः सदेव भवति। अतः तस्य पुनरुत्थानमसंभवमिति। अस्योत्तरं दीयते सूत्रेणानेन ' **स एव तु कर्मानुस्मृतिशब्द-विधिभ्यः** ' इति । अर्थात् यः सुषुप्तः स एवोत्तिष्ठति इति। यतः अध्ययनादि कर्म , पूर्वदिवसभोजनादि अनुस्मृतिः, प्रतिन्यायमित्यादि शब्दः, ज्योतिष्टोमादि विधिः इत्याद्याः पूर्वं सुषुप्तस्य भवन्त्येव इति ।

अधिकरणस्यास्य सारभूतमिदं पद्यं भागवते पठ्यते स्वयं भगवतैव – (११.१३.३१)

**यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्**

**भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ।**

**स्वप्ने सुषुप्त उपसंहरते स एकः**

**स्मृत्यन्वयात् त्रिगुणवृत्तिदृगिन्द्रियेशः** ॥ इति ।

अत्र यः जागरे अर्थान् भुङ्क्ते, सुषुप्तौ तानुपसंहरति यः, उभावपि एक एव । कुत इति चेत् त्रिगुणवृत्तिदृक् = अवस्थात्रयद्रष्टा स भवति । किञ्च स्मृत्यन्वयादिति सूत्रोदितं कारणमप्यत्र दृश्यते । इत्थम् अवस्थाभेदेन विश्वतैजसप्राज्ञा भवन्तीति सारांशः प्रदत्तः ।

ब्रह्मसूत्रग्रन्थरत्नस्यान्तिमाध्यायान्तिमपादस्यान्तिमाधिकरणस्य विचारविषयोऽयं भवति यदीश्वर-सायुज्यं प्राप्तानां यदैश्वर्यमुक्तं तन्निरवधिकमुत सावधिकमिति। तत्रेदमुच्यते '**जगद्व्यापारवर्जं प्रकरणाद-सन्निहितत्वाच्च** ' इत्यारभ्य नानाकारणैः भोगमात्रसाम्यमीश्वरेण , न तु सृष्ट्यादिकं भवतीति निश्चीयते । परन्तु पुनर्जन्म न भवतीति सिद्धान्तः ।

विषयोऽयं श्रीमद्भागवते रूपान्तरेण सूचितो वर्तते । भगवत्पार्श्ववर्तिभिः सायुज्यं प्राप्तैरपि ध्येयः भगवानित्युक्त्वा , तेषां भगवदपेक्षया किञ्चिन्न्यूनत्वं , पुनरावृत्तिराहित्यञ्च प्रतिपादितमस्ति ।

मुक्तानामैश्वर्यस्य सावधिकत्वमुच्यते श्रीमद्भागवते - (६.९.२९)

**आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ।**

**पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम्** ॥ इति ।

श्रीवत्सेन श्रियःपतित्वं , कौस्तुभेन सकलजीवेश्वरत्वञ्च सूच्यते। **प्रकृतिं विकृतिं विद्याम्** इति प्रकृत्यधिष्ठानदेवता श्रीः । **कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः** इति वचनात् सर्वजीवसमष्टितत्त्वमेव कौस्तुभम् । एवमुभयोरीश्वरत्वं सर्वेश्वरस्यैवेति सिद्धत्वात् , विना श्रीवत्सकौस्तुभौ मुक्तानां पार्षदानां परमात्मतुल्यत्वं गीयते - आत्मतुल्यैरिति ।

तेषां परमपदात् पुनरावृत्तिरहितत्वमुच्यते - (२.२.३१)

**तेनात्मनाऽऽत्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ।**

**एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग** ॥ इति ।

इत्थं वेदान्तसारभूते श्रीमद्भागवतपुराणे केषाञ्चन अधिकरणानां सारांशाः ईषदिव स्पृष्टाः ॥

# कौस्तुभानुसारेण अभ्यासात् भावनाभेदनिरूपणम्

**L. सौजन्यकुमारः**

सहायकाचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः ,

मयूरपुरी , चेन्नै–४.

पूर्वमीमांसायां द्वितीयाध्याये शब्दान्तरादिभिः षड्भिः प्रमाणैः भावनाभेदः निरूप्यते। तत्र अनन्यपरविधिपुनश्श्रवणरूपात् अभ्यासात् भावनाभेदे निरूपणीये अवान्तररूपेण “समिधो यजति” इत्यादीनां पञ्चानाम् अपि वाक्यानां विधित्वं वर्तते उत अन्यतमस्य एव इति विचार्यते। विचारस्य अस्य प्रयोजनं किम्? इत्युक्ते यद्यत्र अन्यतमस्य एव विधित्वं, तर्हि विशेष्यस्य विधिपुनश्श्रवणस्य अभावात् एव विशिष्टस्य अनन्यपरविधिपुनश्श्रवणस्य सुतराम् अभावः भवति इति कृत्वा प्रकृतस्थले अभ्यासात् भावनाभेदः न भवति। तत्रैव यदि सर्वेषां वाक्यानां विधित्वम् उच्यते, तर्हि अनन्यपरविधिपुनश्श्रवणात् भावनाभेदः सेत्स्यति इति विचारस्य अस्य प्रयोजनं वर्तते।

**पूर्वपक्षः :-**

समिदादिवाक्येषु विधेः पुनः श्रवणमेव नास्ति । तथाहि “समिधो यजति” इत्यादिषु वाक्येषु “यजति” इति लट् एव श्रूयते। अतः एतेषु विधिरेव न श्रूयते चेत् किमुत विधिपुनःश्रवणम्।

परन्तु वेदे लेट्लकारः प्रायशः लट्लकारवत् भवति इति पक्षम् अङ्गीकृत्य अधुना समाधानम् उच्यते। “समिधो यजति” इत्यत्र उपक्रमस्थवाक्ये एव यागः विधीयते। अर्थात् तस्मिन् एव वाक्ये लेट्-त्वम् अङ्गीक्रियते। तदन्तरम् “तनूनपातं यजति”, “इडो यजति” , “बर्हिर् यजति”, “स्वाहाकारं यजति” इति यानि वाक्यानि सन्ति तेषु लेट्-त्वम् नोच्यते। प्रत्युत लट्-त्वम् एव उच्यते। तथा च एतानि “तनूनपातं यजति” इत्यादीनि वाक्यानि अर्थवादाः भवन्ति । अतः अत्र विधिपुनःश्रवणमेव नास्ति इति।

**“तनूनपातम् यजति” इत्यादीनामपि विधित्वाङ्गीकारपक्षः**

पूर्वं “समिधो यजति” इत्यत्र लेट् श्रूयते, “तनूनपातम् यजति” इत्यादिषु तु लट् एव श्रूयते, तस्मात् “समिधो यजति” इत्यत्र विधिः अन्यत्र तु अर्थवादः इत्युक्तम् । परन्तु तन्न सम्भवति। यतः सर्वेषु अपि “समिधो यजति” इत्यादिषु वाक्येषु “यजति” इत्येव दृश्यते। तथा च “समिधो यजति” इत्यत्रैव लेट्-त्वम् अन्यत्र तु लट्-त्वम् इत्यत्र किम् अस्ति विनिगमकम्? अतः विनिगमनाविरहात् सर्वत्रापि लेट्-त्वम् एव वक्तुं शक्यते। परन्तु अत्र उपक्रमस्थत्वात् “समिधो यजति” इत्यत्र धात्वर्थविशिष्टभावनाविधिः

अङ्गीक्रियते। अन्यत्र "तनूनपातम् यजति" इत्यादिषु तु "अग्निहोत्रं जुहुयात् स्वर्गकामः"[16] इत्यनेन प्राप्तहोमोद्देशेन "दध्ना जुहोति"[17] इत्यत्र गुणमात्रं यथा विधीयते तथा "तनूनपातं यजति" इत्यादिषु वाक्येषु "समिधो यजति" इत्यनेन प्राप्तयागोद्देशेन देवताः विधीयन्ते ।

किञ्च पूर्वस्मिन् पक्षे "तनूनपातं यजति" इत्यादीनां वाक्यानाम् अर्थवादत्वम् उक्तम्। परन्तु तन्न अपेक्ष्यते, यतः "समिधो यजति" इत्यत्रैव "वसन्तमेवर्तूनामवरुन्धे" इत्येवं पृथगेव अर्थवादश्रवणात् । तथा च विधेः अभ्यासश्रवणे अपि "तनूनपातं यजति" इत्यादिषु तस्य विधेः गुणसङ्क्रान्तशक्तिकत्वात् धात्वर्थ-विशिष्टभावनाविषयत्वं नास्ति। अतः न विधेः अभ्यासेन भावानावैजात्यसिद्धिः अत्र सम्भवति ।

न च – "तनूनपातं यजति" इत्यादिषु "तनूनपातम्" इति द्वितीया विभक्तिः एव श्रूयते। द्वितीया विभक्तिश्च उद्देश्यत्वमेव गमयति। तर्हि कथम् अत्र देवताविधित्वमिति – वाच्यम् , "विष्णुं यजति" इत्यत्र द्वितीयान्तस्यापि देवतापरत्वं यथा अङ्गीकृतम् , तथैव अत्रापि भवतु ।

न च – द्वितीयान्तत्वात् "अग्निहोत्रं जुहोति" इत्यत्र अग्निहोत्रशब्दस्य नामधेयत्ववत् समिदादि-पदानाम् अस्तु नामधेयत्वम्। तदानीम् एतेषु देवतायाः अविधेयत्वेन परिशेषात् धात्वर्थविशिष्टभावनाविधिः स्यात् । तेन भावनावैजात्यसिद्धिः इति – वाच्यम्। यतः तेषां समिदादिपदानाम् अग्निशब्दवत् उभयत्र अर्थात् देवतादिगुणे कर्मणि च तुल्यवद्वृत्तिकत्वं नास्ति। अतः "तनूनपातं यजति" इत्यादिषु वाक्येषु "समिधो यजति" इत्यनेन प्राप्तयागोद्देशेन देवताः विधीयन्ते ।

### समिदादिशब्दानाम् तत्प्रख्यशास्त्रेण नामधेयत्वपक्षः

"अग्निहोत्रम् जुहोति" इत्यत्र अग्निहोत्रशब्दस्य कर्मनामधेयत्वम् अङ्गीकृतम् । अर्थात् "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा" [18] इति मन्त्रबलादेव अग्निदेवतायाः प्राप्तिः अस्ति । अतः अग्निहोत्रशब्दः कर्मनामधेयं भवतु इत्युक्तम्। तद्वत् अत्रापि "स्वाहाग्निम्" "स्वाहा सोमम्"[19] इत्यादयः याज्यामन्त्रवर्णाः श्रूयन्ते। अतः मन्त्रवर्णप्राप्तदेवताबलात् तनूनपादादिशब्दानां कर्मनामधेयत्वम् अस्तु इति चेत् , न । यतः मन्त्रवर्णात् नियमेन यत्र देवतायाः प्राप्तिः तत्रैव तत्प्रख्यायेन कर्मनामधेयत्वम् भवति। यथा "अग्निहोत्रं जुहोति" इत्यत्र अग्निहोत्रशब्दस्य। परन्तु प्रकृतस्थले अर्थात् समिदादिदेवतानां प्रापकस्य शास्त्रद्वयस्य

---

[16] तै.सं १-५-९-६

[17] मै.सं ४-७-७

[18] तै.ब्रा २-१-९-२

[19] तै.ब्रा ३-५-५-५

सत्त्वात् नियमेन समिदादिदेवतानामेव प्राप्तिः इति नियमः नास्ति। तथाहि "समिधः समिधो अग्न आज्यस्य वियन्तु"[20] इत्यादयः समिदादिदेवताप्रापकाः याज्यामन्त्राः वर्तन्ते। एवमेव "वसन्तमृतूनाम् प्रीणामि"[21] इत्यादयः वसन्तादिदेवतप्रापकाः च अनुमन्त्रणमन्त्राः सन्ति। तथाच प्रकृते कर्मणि समिदादिदेवतानाम् , वसन्तादिदेवतानां वा पक्षे एव प्राप्तिः, न तु नियमेन। तथा च समिदादिशब्दानां न कर्मनामधेयत्वं सिद्ध्यति।

किञ्च "समिधो यजति" इत्यत्र वसन्तादिवाक्यप्राप्तदेवताव्यावृत्त्यर्थम् नियमविधित्वम् अपि अङ्गीक्रियते। तथा च अत्र विधेः गुणसङ्क्रान्तशक्तिकत्वेन न भावनान्तरविधिः इति सिद्धम्।

अत्र कश्चन प्रश्नः स्यात् यत् "तप्ते पयसि दध्यानयति सा वैश्वदेवी आमिक्षा"[22] इत्यनेन यत्कर्म विहितम् तदुद्देशेन "वाजिभ्यो वाजिनम्"[23] इति वाक्येन गुणविधानमस्तु इति आशङ्क्य ततः उत्पत्तिशिष्ट-आमिक्षारूप-द्रव्यानुरोधेन उत्पन्नशिष्टवाजिनद्रव्यस्य पूर्वत्र अनिविशमानत्वात् कर्मान्तरत्वम् अङ्गीकृतम् [24] वैश्वदेवाधिकरणे। तथा च एतादृशस्थले पूर्वत्र अनिविशमानेन गुणेन कर्मान्तरत्वम् सिद्ध्यति इति अविवादम्। तथैव प्रकृतस्थले अपि "समिधो यजति" इत्यत्र या देवता श्रूयते सा उत्पत्तिशिष्टा भवति। एवमेव "तनूनपातं यजति" इत्यादिषु वाक्येषु या या देवता विधीयते सा सर्वा अपि उत्पन्नशिष्टा भवति। तस्मात् वैश्वदेवाधिकरणन्यायेन पूर्वत्र अनिविशमानगुणात् अत्र कर्मभेदः सिद्ध्यति खलु ? इति।

तत्रोच्यते – एतादृशदोषवारणाय एव अस्माभिः "समिधो यजति" इत्यत्र समित्पदस्य देवताप्रापकत्वम् नोच्यते, किन्तु कर्मनामधेयत्वमेव।"तनूनपादादिवाक्येषु" तु प्राप्तकर्मोद्देशेन देवताः विधीयन्ते। सर्वासां देवतानाम् उत्पन्नशिष्टत्वेन प्राबल्यदौर्बल्य विचारः अपि अत्र न भवति।

### "समिधो यजति" इत्यत्र कर्मविधाननिरासपक्षः

"समिधो यजति" इत्यत्र समित्पदस्य कर्मनामधेयत्वं भवता पूर्वपक्षिणा उच्यते। परन्तु क्लृप्तेषु नामधेयत्वबोधकप्रमाणेषु वाक्यभेदेन, तद्व्यपदेशेन वा आहोस्वित् मत्वर्थलक्षणाभयात् वा तन्न संभवति। किन्तु तत्प्रख्यशास्त्रेण एव नामधेयत्वं भवता प्रतिपादनीयम्। परन्तु "समिधो यजति" इत्यत्र यथा गुणस्य प्रापकं शास्त्रं वर्तते, तथैव "तनूनपातं यजति" इत्यादिष्वप्यस्ति। अतः प्रापकस्य शास्त्रस्य सर्वत्र

---

20 तै.ब्रा. ३-५-५-१

21 तै.सं. १-६-२

22 बो.सू. ५-१

23 शत.ब्रा. २-४-४-२२

24 पू.मी.शा. १-४-११

समानत्वात् समित् शब्दस्यैव कर्मनामधेयत्वम् , तनूनपादादीनां तु नेत्यत्र किं विनिगमकम् इति प्रश्नः भवत्येव।

तत्रोच्यते – उक्तदोषवारणाय "स्वाहाकारं यजति" इत्यत्र एव कर्मविधानम् अङ्गीकुर्मः। "स्वाहाकारं यजति" इत्यस्मिन् वाक्ये "स्वाहाकारं " इति पदम् न देवताबोधकं भवति। यतो हि णमुलन्तेऽपि "स्वाहाकारं" इति रूपं सिद्ध्यति। तथाच "स्वाहाकारम्" इत्यस्य शब्दस्य द्वितीयान्तत्वे अत्र नियामकम् किञ्चित् नास्ति एव ।

**उपांशुयाजानुवादेन समिदादिवाक्येषु देवताविधानपक्षः**

एतावता "स्वाहाकारं यजति" इत्यत्र कर्मविधिः, अन्यत्र तदुद्देशेन देवताविधिः इति उक्तम्। परन्तु अस्मिन् पक्षे किञ्चित् गौरवम् अस्ति इति कृत्वा त्यज्यते। तथाहि अस्मिन् पक्षे देवताप्राप्तिः "स्वाहाग्निम् स्वाहा सोमम्" इत्यादिमन्त्रैः भवति इत्युक्तम्। परन्तु एतेषु मन्त्रेषु नानादेवताप्रकाशनात् महाप्रकरणसहकृतेन लिङ्गप्रमाणेन प्रधानार्थत्वम् अवगम्यते। तर्हि कथं स्वाहारूपदेवताप्राप्तिः इति प्रश्ने उच्यते "स्वाहा देवान् आज्यपान्"[25] इति मन्त्रेण भवति इति वक्तव्यम्। यद्यपि अस्य मन्त्रस्यापि उक्तप्रमाणेन प्रधानङ्गत्वमेव सिद्ध्यति तथापि अस्य प्रयाजीयदेवताप्रकाशकत्वमपि अस्ति इति कारणात् देवताप्रापकशास्त्रं किञ्चित् अस्त्येव इति वक्तव्यम् इति आयासेन साध्यं भवतीति गौरवम्।

किञ्च अस्मिन् पक्षे समिदादिवाक्येषु देवताविधानम् , "स्वाहाकारं यजति"इति वाक्ये केवलं कर्मविधानम् इति उच्यते। तथाच प्रायपाठभङ्गोऽपि भवति इत्यापत्तिः। अतः पक्षान्तरम् आश्रीयते। तथा हि "उपाशुयाजमन्तरा यजति" इति वाक्येन उपांशुयाजः विहितो भवति। तत्र च उत्पत्तिवाक्ये देवता न श्रूयते। अतः तत्र देवतायाः आकाङ्क्षा अस्ति। तस्मात् "उपांशुयाजमन्तरा यजति" इति वाक्येन प्राप्तयागोद्देशेन समिदादिवाक्यैः विकल्पेन देवताः विधीयन्ते इति। अयमेव पक्षः भवदेवेन प्रोक्तो भवति इति ग्रन्थकृता निर्दिश्यते[26] ।

**समिदादिवाक्येषु कर्मविधानस्य अङ्गीकारपक्षः**

पूर्वोक्तभवदेवपक्षे अपि किञ्चित् गौरवमस्ति। तद्यथा - क्रमेण प्राप्तस्य याज्यायुगलस्य समाख्यासहकृतलिङ्गेन उपांशुयागे उत्कर्षः वक्तव्यः। तदपेक्षया सिद्धान्तिवत् वयमपि समिदादिषु वाक्येषु समिदादिपदानां नामधेयत्वम् अङ्गीकुर्मः। परन्तु न समिदादिवाक्येषु कर्मभेदो भवति इति। तथाहि

---

[25] तै.ब्रा ३-५-५-५

[26] मी.कौ. अभ्यासाधिकरणे

ज्योतिष्टोमे दक्षिणादानात् प्राक् बहिष्पवमानप्राप्त्यर्थम् प्रसर्पणं विहितम्। तस्मिन् प्रसर्पणसमये उद्गातृ-प्रस्तोतृ-प्रतिहर्त्रादीनां परस्परं कच्छधारणं विहितम्। तत्र यदि अत्र उद्गातृकर्तृकः कच्छधारणस्य अपच्छेदो भवति, तदा तं यज्ञं दक्षिणां विना समाप्य, अनन्तरं पुनः स यज्ञः अनुष्ठेयः इति विधीयते अनेन "यद्युद्गातापच्छिन्द्यात् अदक्षिणं तं यज्ञम् इष्ट्वा, तेन पुनर्यजेत"[27] इति वाक्येन। अत्र द्वितीयवारम् यो यागः क्रियते सः किम् पूर्वस्मात् कर्मणो भिन्नः उत स एव वा इति विचार्य पूर्वस्मात् कर्मणः अयं न भिद्यते प्रत्युत प्रयोगभेदःएव इति सिद्धान्तितम् ।तद्वत् अत्रापि "समिधो यजति" इत्यत्र कर्मविधिः, तनूनपादादिषु तु प्रयोगभेदः केवलमस्ति इति वयम् अङ्गीकुर्मः। अस्मिन् पक्षे च "चतुर्दश पौर्णमास्याम् आहुतयः" इत्यस्मिन् वाक्ये प्रतिपादितम् आहुतीनाम् चतुर्दशत्वं युक्तं भवति । अन्यथा समिदादिवाक्यानाम् उपांशुयागोद्देशेन देवताविधित्वपक्षे चतुर्दशत्वं न युज्यते। तस्मात् सिद्धम् "समिधो यजति" इत्यादिषु वाक्येषु अभ्यासात् कर्मभेदः नास्ति इति।

**सिद्धान्तः**

"समिधो यजति", "तनूनपातम् यजति" इत्यादिषु वाक्येषु यजति इत्यत्र लट्-त्वं, लेट्-त्वं वा इति संशीतिरस्तीति उक्तम्। वस्तुतस्तु तत्र लेट्-त्वमेव अस्ति। तथाहि यजति इत्यस्य लट्-त्वे अनुवादकत्वम् वक्तव्यम्। अनुवादकत्वं च तदा एव सम्भवति यदा विध्येकवाक्यता उच्यते। प्रकृतस्थले केन विधिना सह समिदादिवाक्यानाम् एकवाक्यता अस्तीति वक्तुम् न शक्यते। स्वतन्त्रतया अनुवादत्वे तु आनर्थक्यापत्तिः। तस्मात् समिदादिवाक्येषु लेट्-त्वं निश्चीयते ।

किञ्च "समिधो यजति" इति वाक्यस्य अव्यविहितोत्तरत्वेन "तनूनपातं यजति"इत्यादीनि वाक्यानि न पठितानि। किन्तु मध्ये " चतुर्जुह्वाम् गृह्णाति प्रयाजेभ्यः तत्" इत्यादीनि गुणविधायकत्वेनैव प्रमितानि वाक्यानि सन्ति। ततः "तनूनपातं यजति" इत्यादीनि वाक्यानि सन्ति। अतः एतेषाम् वाक्यानां मध्ये एकस्य विधित्वम् अपरस्य तु तदनुवादकत्वम् इति न युज्यते। तस्मात् सर्वेऽपि विधयः एव भवन्ति । तत्र च भावार्थाधिकरणन्यायेन समानपदश्रुत्या विधिशक्तिः धात्वर्थे उपसङ्क्रामति । अयं च नियमः उत्सर्गो भवति। यतो हि "दध्ना जुहोति" इत्यादिषु प्राप्तधात्वर्थस्थलेषु अनन्यगत्या विधिशक्तिः उपपदार्थे उपसङ्क्रामति इति अङ्गीक्रियते एव।

**समिदादिदेवतानाम् अनियमेन प्राप्तिः इति पक्षस्य निरासः**

---

[27] पू.मी ६-५-१९

यत्तु भवता याज्यामन्त्रवर्णैः समिदादिदेवताप्राप्तिः “वसन्तमृतूनां प्रीणामि” इत्यादि-अनुमन्त्रण-मन्त्रैश्च वसन्तादिदेवताप्रप्तिः इति अनियमेन देवताप्राप्तौ “समिधो यजति” इत्यादिषु वाक्येषु नियमः क्रियते। तस्मात् विधेः अत्र अन्यपरत्वमेव अस्ति, न तु अनन्यपरत्वम् इति उक्तम् ,

तन्न युक्तं भवति। यतो हि याज्यामन्त्र-अनुमन्त्रणमन्त्रयोः याज्यामन्त्रस्य एव प्राबल्यं वर्तते। तथाहि याज्यामन्त्रः त्यागस्य प्राक्कालीनः भवति। अतः मन्त्रेषु अवश्यं कां देवतां प्रकशयेयम् ? इति भवति साध्याकाङ्क्षा। एवमेव आर्थीभावनायाः अपि यागीयदेवताप्रकाशकः मन्त्रः कः? इति भवति इतिकर्तव्यताकाङ्क्षा। तथा च अत्र उभयाकाङ्क्षा अस्ति इति सिद्धम् ।

अनुमन्त्रणमन्त्रस्तु त्यागस्य अनन्तरमेव उच्चार्यते। अतः एव तस्य मन्त्रस्य अनु = पश्चात् अर्थात् त्यागानन्तरं पठ्यमानः मन्त्रः इति व्युत्पत्त्या अनुमन्त्रणमन्त्रः इति नाम अपि युज्यते। तथा च अनुमन्त्रणकाले यागस्य इतिकर्तव्यताकाङ्क्षा न भवति। तस्य यागस्य एव समाप्तत्वात्। अतः केवलम् अनुमन्त्रणमन्त्रस्यैव भवति साध्याकाङ्क्षा। तथा च अन्यतराकाङ्क्षापेक्षया उभयाकाङ्क्षायाः प्राबल्यम् इति नियमः अन्यत्र अर्थात् तृतीयाधिकरणे प्रकरणस्थानप्रमाणयोः विषये दृष्टः अस्ति। तन्न्यायेन अत्रापि याज्यामन्त्रवर्णानामेव प्राबल्यं सिध्यति। तस्मात् प्रबलप्रमाणेन दुर्बलप्रमाणस्य अत्र बाधः इति सिद्धम् ।

किञ्च अत्रस्थानाम् अनुमन्त्रणमन्त्राणां “प्रयाजानुमन्त्रणम्” इति समाख्या अस्ति। तस्मात् कारणात् एव पूषानुमन्त्रणमन्त्रवत् न उपांशुयागादौ उत्कर्षः अपि भवति। किन्तु मनोतामन्त्रवत् लक्षणया प्रकृतदेवतापरत्वम् अङ्गीक्रियते। तत्र हि अग्नीषोमदेवताके यागे “त्वं हि अग्ने प्रथमा मनोता”[28] इति मन्त्रः पठितो भवति। यागे अग्नीषोमौ देवते। मन्त्रे परम् अग्निः केवलं प्रकाश्यते। अतः अस्य मन्त्रस्य केवल-अग्निदेवताके यागे उत्कर्षः भवतु इति विचिन्त्य तदनन्तरं मन्त्रे विद्यमान-अग्निशब्दस्य एव लक्षणया अग्नीषोमदेवताप्रकाशकत्वम् भवतु इत्यङ्गीकृतम् । तस्मात् न अस्य मन्त्रस्य उत्कर्षः इत्यपि सिद्धान्तितम् । तद्वदेव प्रकृतस्थले अपि वसन्तादिशब्दैः लक्षणया प्रयाजीयदेवताप्रकाशकत्वस्य एव अङ्गीकारात् न उत्कर्षापत्तिः भवति ।

अपि च समिदादिपदानां तत्प्रख्यशास्त्रात् नामधेयत्वपक्षे “समिन्नामकेन यागेन इष्टं भावायेत्” इत्येवं प्रथमविधिप्रकारः भवति इति लाघवं भवति । अन्यथा तनूनपादादिवाक्यानां “दध्ना जुहोति” इतिवत् तृतीयविधिप्रकारता एव भवति इति गौरवम् आपद्येत। तस्मात् “समिधो यजति” इत्यादिषु पञ्चसु वाक्येषु अपि विधित्वमस्ति इति उररीक्रियते येन अनन्यपरविधिपुनश्श्रवणात् अभ्यासात् भावनाभेदः सिध्यति।

---

[28] तै.ब्रा ३-६-१०-१

# भावनावाक्यार्थनिरूपणम्

**C. हरिहरः**

सहायकाचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः ,

मयूरपुरी , चेन्नै–४.

अर्थभावना एव सर्वस्य वाक्यस्य मीमांसकमते कारकविशिष्टरूपेण वाक्यार्थः, न नैयायिकवत् संसर्गः।

अत्र अनेक – विशेषणविशिष्टः [29]मुख्यविशेष्यभूतः कश्चन पदार्थः एव वाक्यार्थः इति उच्यते। स च पदार्थः मीमांसकमतानुसारम् अर्थभावना एव। अन्ये पदार्थाः तत्र विशेषणम् । अर्थभावना नाम कृतिः।

उदाहरणतया "गामानयति" इति वाक्यं स्वीकुर्मः चेत् , "गो" पदेन गोत्वं शक्त्या उपस्थितं भवति। लक्षणया च गौः उपस्थिता भवति। "अम्" – पदेन कर्मत्वम् उपस्थितं भवति। आङ् – पूर्वक – नी धातोः आनयनम् उपस्थितं भवति। "ति" इति आख्यातांशेन कृतिः उपस्थिता भवति। इयं कृतिः एव "अर्थभावना" इति उच्यते। कृतिः एव च मुख्यविशेष्यविधया शाब्दबोधे भासते। अतः इयं अर्थभावना एव "वाक्यार्थः" इति शब्देन व्यपदिश्यते।

नैयायिकानां मते तु संसर्गः वाक्यार्थः इति उच्यते। तथा हि "गाम् आनय" इत्यादि वाक्ये गोपदेन गौः, अं–पदेन कर्मत्वम् इत्येवं तत्तत्पदैः तस्य तस्य पदार्थस्य उपस्थितिः जायते। तदनन्तरं "कर्मत्वं गोसंबन्धि" इत्याद्याकारकः संसर्गबोधः जायते। अयं एव वाक्यार्थः इति शाब्दबोधे नूतनतया विषयीक्रियमाणः अर्थः। न तु पदार्थः। पदार्थानां उपस्थितेः तत्तद्गवादिपदैः एव जायमानत्वात्।

किन्तु मीमांसकमते संसर्गविषयकः बोधः यद्यपि नूतनतया जायते, तथापि तस्य वाक्यार्थत्वं नास्ति। तस्य मुख्यविशेष्यत्वाभावात्। वाक्यार्थत्वं तु अर्थभावनायाः एव।

किञ्च संसर्गबोधः यः नूतनतया जायते, सः अपि पदार्थः एव इति मीमांसकैः उच्यते। तथा हि तन्मते "गामानयति" इत्यादिवाक्ये कर्मत्वस्य गवि विशेषणविधया भानम् लक्षणया एव जायते इति कृत्वा

[29]मुख्यविशेष्यत्वं नाम प्रकारतानवच्छिन्न विशेष्यत्वम्।

संसर्गः अपि पदार्थलक्ष्यः पदार्थः एव, न तु वाक्यार्थः। तथा च अर्थभावना एव शाब्दबोधे मुख्यविशेष्यविधया भासमाना वाक्यार्थः इति मीमांसकमतं स्थितम्।

तदुक्तं तद्भूताधिकरणे,

**भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया।**

**अनेकगुण – जात्यादिकारकैः अनुरञ्जिता॥** इति।

एवम् , सूत्रेऽपि "[30]अर्थैकत्वात् एकं वाक्यम्" इति उच्यते। अत्र "अर्थैकत्वात्" इति सूत्रकाराणां प्रयोगेण इदं ज्ञायते यत् यत्र एकमुख्यविशेष्यकः इतरकारकविशेषणकः च बोधः जायते तत्र एव एकं वाक्यम् इति ज्ञायते। तेन एकमुख्यविशेष्यकत्वम् एव वाक्यार्थत्वं सूत्रकारैः अपि विवक्षितम् इति ज्ञायते।"अर्थैकत्वात् एकं वाक्यं साकाङ्क्षं चेत् विभागे स्यात्" इति पूर्णं सूत्रम्। सूत्रस्य अर्थः , अर्थैकत्वं = भिन्नप्रतीतिविषय – नानामुख्यविशेष्य – राहित्यम् । इदं यत्र अस्ति तत्र एव "इदम् एकम् वाक्यम्" इति प्रतीतिः जायते। साकाङ्क्षं चेत् विभागे स्यात् = अन्वीयमानयोः पदार्थयोः अनन्वये पूर्ण (निवृत्ताकाङ्क्ष) शाब्दबोध – अजनकत्वम्।

अख्यातातिरक्तस्य वस्तुद्वयस्य वाक्यार्थत्वं शङ्कितुं शक्यते । तत्र प्रथमं पूर्वोक्तरीत्या संसर्गः, द्वितीयं भेदः। अनयोः द्वयोः अपि वाक्यार्थत्वं नास्ति इति खण्डनं "अर्थैकत्वात् एकं वाक्यम्" इति सूत्रानुसारेण क्रियते।

भेदः संसर्गो वा वाक्यार्थः यदि उच्यते, तथाप्येकार्थता न स्यात् । बहुषु पदेषु भेदानां संसर्गानां च बहुत्वात् इति।

## संसर्गस्य वाक्यार्थत्व खण्डनम्

भगवतः जैमिनेः सूत्रानुसारं अर्थैकत्वं यत्र तत्रैव वाक्यत्वं स्वीकुर्मः चेत् संसर्गस्य तु वाक्यार्थत्वं सुतरां न संभवति। यतः संसर्गः नाम अन्वयः। सः च "गामानय" इत्यादिवाक्ये गोपदार्थस्य कर्मत्वेन, तथा कर्मत्वस्य च क्रियया सह , एवम् आङ्पूर्वक नी धात्वर्थस्य कृतौ इति तत्तत्पदार्थनिरूपितः अन्यः अन्यः भवति। एकत्वं तु नास्ति, अतः अर्थैकत्वाभावात् संसर्गस्य न वाक्यार्थत्वम्।

---

[30]पू.मी.2-1-15

मीमांसकमते जातिप्रवृत्तिनिमित्तकानां गवादिपदानां गोत्वादिजातौ एव शक्तिः। किन्तु नैयायिकानां मते जातिविशिष्टव्यक्तौ शक्तिः। उभयथा अपि संसर्गस्य भेदस्य वा वाक्यार्थत्वं नास्ति इति इदानीं निरूप्यते।

**व्यक्तिपदार्थपक्षे संसर्गस्य भेदस्य वा वाक्यार्थत्वखण्डनम्**

अस्मिन् पक्षे "शुक्लां गामानय" इति उच्यते चेत् गोपदेन सर्वाः गोव्यक्तयः उपस्थिताः भवन्ति। तथा अश्वादिव्यावृत्तिः अपि ज्ञायते। अर्थात् एकैकमपि पदं स्वान्यव्यावर्तकं भवति। अतः शाब्दबोधे प्रत्येकं पदेन स्वान्यभेदः अवश्यं भासते इति वक्तव्यम्। सर्वासु गोव्यक्तिषु गोपदेन उपस्थितासु तद्विशेषबोधेच्छया शुक्लादिशब्दः प्रयुज्यते। तेन कृष्णादिव्यवच्छेदः जायते। तथा च शुक्लत्वस्य संसर्गः यः एतद्वाक्योपात्ते गवि भासते सः शक्त्या वा लक्षणया वा पदार्थः एव भवति, न वाक्यार्थः। तथैव शुक्लत्व–संसर्गविशिष्टायां गवि कृष्णगोभेदः ज्ञायते । एवम् गोपदसंसृष्टे शुक्लपदे कृष्ण–अश्वादिव्यावृत्तिः अपि ज्ञायते । अयं भेदः यद्यपि पदार्थान्तर्गतो न। अर्थात् भेदबोधकं पदम् अत्र किमपि नास्ति, तथा संसर्गबोधकं पदं च नास्ति इति वाक्यार्थत्वशङ्का उदियात् , तथापि एषाम् एकत्वाभावात् सूत्रानुरोधेन वाक्यार्थत्वं वक्तुं न शक्यते।ननु एकैकः भेदः एकैकेन पदेन गृह्यते चेदेव अर्थैकत्वाभावात् वाक्यार्थत्वं न उपपद्यते ? तदपेक्षया भेदसामान्यं वाक्यार्थः भवतु इति चेत् , न। तथा सति सर्ववाक्यार्थानाम् एकत्वप्रसङ्गः । भेदत्वेन रूपेण भेदः एव सर्वस्य अपि वाक्यस्य अर्थः इति तदानीं अन्यवाक्यार्थेन सह भेदः दुर्निरूप्यः भवेत्।

**आकृतिपदार्थपक्षे संसर्गस्य भेदस्य वा वाक्यार्थत्वखण्डनम्**

आकृतिः = जातिः सः पदस्य वाच्यार्थः इति मीमांसकमतम् आदायापि संसर्गः, भेदः वा न वाक्यार्थः इति उच्यते। अत्रापि "शुक्लां गाम् आनय" इति वाक्यं स्वीकृत्यैव आलोचयामः। शुक्लपदेन शुक्लत्वम् इति अर्थः उपस्थाप्यते। गोपदेन च गौः इति अर्थः उपस्थाप्यते । इदानीं द्वयोः पदयोः सामानाधिकरण्यात् शुक्लत्वाश्रयः गौः एव, न अश्वादयः इति अश्वादिव्यावृत्तिः, तथा गोत्वाधिकरणं गौः शुक्ला एव, न कृष्णा इति कृष्णगोव्यावृत्तिः इति भेदद्वयम् अपि अन्यत्र अन्यत्र भासते इति नानात्वं, न अर्थैकत्वम्। तथा पूर्वोक्ता द्विविधा अपि व्यावृत्तिः अर्थसिद्धा एव लभ्यते इति न वाक्यार्थत्वं कल्पनीयम्।

तथा च "अर्थैकत्वात् एकं वाक्यम्" इति सूत्रानुसारेण अर्थभावना एव शाब्दबोधे मुख्यविशेष्यविधया भासते इति सा एव वाक्यार्थः इति सिद्ध्यति।

# तिङन्तप्रयोगे अभेदान्वयबोधप्रकारः

**Dr. P.P.Sridhara Upadhyaya, M.A., Ph.D.**

Nyaya, Vedanta Shiromani
Asst. Prof of Nyaya, Madras Sanskrit College,
Chennai-4.

‘शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते’ इति गदाधराचार्याणाम् आशयः। पदार्थद्वयस्य यः संसर्गः सः शाब्दबोधे आकाङ्क्षाबलेन भासते। सः सम्बन्धः द्विविधः अभेदः भेदश्चेति। तत्र अभेदसम्बन्धश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते । यथा ‘नीलो घटः’ ‘नीलघटमानय’ इत्यादौ । न तु विरुद्धविभक्तिमत्पदार्थस्य ‘नीलस्य घटः’ इत्यादौ। तथा च ‘नीलो घटः’ इति सुबन्तप्रयोगे विशेष्यविशेषणवाचकपदयोः विरुद्धविभक्त्यन्तत्वे अभेदान्वयबोधः न भवति । परं तु ‘स्तोकं पचति’ इति तिङन्तप्रयोगे विशेष्य-विशेषणवाचकपदयोः विरुद्धविभक्त्यन्तत्वेऽपि अभेदान्वयबोधः भवति । तत्र पचतीति तिङ्विभक्त्यपेक्षया स्तोकमिति विरुद्धद्वितीया विभक्तिरस्ति । तथापि तादृश ‘स्तोकं’ इति पदेन उपस्थापितस्य स्तोकपदार्थस्य धात्वर्थीभूतपाकादौ अभेदेन अन्वयः भवति । तथा च ‘स्तोकाभिन्नः पाकः’ इति शाब्दबोधः भवति । तादृशबोधानुसारेण यथा ‘नीलो घटः’ इत्यत्र अभेदान्वये प्रथमान्तनीलघटपदयोः समभिव्याहारस्य आकाङ्क्षात्वम् अङ्गीक्रियते, तथा ‘स्तोकं पचति’ इत्यत्रापि द्वितीयान्तविशेषणवाचकस्तोकपदधातुपदयोः समभिव्याहारस्य आकाङ्क्षात्वम् अङ्गीकर्तव्यम् ।

ननु क्रियाजन्यफलाश्रयत्वमेव कर्मत्वम् । एतादृशकर्मवाचकपदादेव द्वितीया भवति । परं तु यदि स्तोकपदार्थस्य धात्वर्थपाके अभेदेन अन्वयः अङ्गीक्रियते, तर्हि स्तोकपदार्थस्य पाकक्रियाजन्य-फलाश्रयत्वमेव नास्तीति कथं ‘स्तोकं’ इति स्तोकपदात् द्वितीया इति चेत् न, ‘क्रियाविशेषणानां क्लीबत्वं कर्मत्वं च’ इत्यनुशासनेन क्रियाविशेषणस्थले द्वितीयातिरिक्तविभक्तिः

न उत्पद्यते । तथा च 'स्तोकं पचति' इत्यत्र स्तोकपदार्थे कर्मत्वोपचारः भवति । अतः औपचारिकं यत् कर्मत्वं, तदाश्रित्य द्वितीया भवतीति 'स्तोकं पचति' इति साधुप्रयोगः ।

ननु 'स्तोकः पाकः' इत्यत्रापि स्तोकपदार्थस्य धात्वर्थेन पाकेन अभेदान्वयस्वीकारात्, स्तोकपदात् द्वितीया भवेदेव । तथा च 'स्तोकं पाकः' इति प्रयोगो भवेदेव । न च यत्र क्रियाविशेषणस्य साक्षादेव धात्वर्थे अभेदान्वयः, तत्रैव क्रियाविशेषणवाचकपदात् द्वितीया भवति, परं तु 'स्तोकः पाकः' इत्यत्र पच् धातोः घञ् प्रत्यये सति 'पाकः' इति रूपं भवति । तत्र प्रययार्थस्य प्राधान्येन तत्रैव स्तोकपदार्थान्वयः भविष्यति, न तु धात्वर्थे । अतः स्तोकपदात् द्वितीया न भवति इति वाच्यम् । तत्र एवं वक्तव्यम् - पाकः इत्यत्र पच् धातुना पाकक्रियैव प्रतिपाद्यते । भावार्थक घञ् प्रत्ययेनापि पाकक्रियैव प्रतिपादनीया । परं तु 'उक्तार्थानामप्रयोगः' इति न्यायेन एकस्यैव पाकस्य द्विरभिधानं न संभवति । अतः धातुनैव पाकः प्रतिपाद्यते, प्रत्ययस्य च साधुत्वार्थकत्वमेव स्वीक्रियते इति वक्तव्यम् । तत्रापि विनिगमनाविरहात् प्रत्ययेनैव पाकः प्रतिपाद्यते, न धातुनेति न वक्तव्यम् । भावार्थकप्रत्ययानां अनेकत्वात् तेषां प्रत्ययानां प्रकृतिभूतधात्वर्थक्रियायां शक्तिकल्पने गौरवं भवति । धातोस्तु अगत्या क्रियायां शक्तिः स्वीकार्यैव । तथा च भावार्थकप्रत्ययस्थलेऽपि धातोरेव पाकादिक्रियाबोधकत्वं, न तु प्रत्ययस्य । इत्येवं 'स्तोकः पाकः' इत्यत्रापि स्तोकपदार्थस्य धात्वर्थे एव अभेदान्वयात् स्तोकपदाद् द्वितीया भवत्येव इति चेन्न -

'क्रियाविशेषणानां क्लीबत्वं कर्मत्वं च' इति अनुशासने क्रियापदं न यत्किञ्चित्-क्रियापरम्। परं तु सार्थकप्रत्ययान्तधातूपस्थाप्यक्रियापरम् । 'स्तोकः पाकः' इत्यत्र च घञः साधुत्वमात्रार्थकत्वेन सार्थकत्वं नास्ति । अतः सार्थकप्रययान्तधातूपस्थाप्यपाकक्रियायां स्तोकपदार्थस्य विशेषणत्वेऽपि न स्तोकपदात् द्वितीया भवति । 'स्तोकं पचति' इत्यत्र तु तिप्-प्रत्ययस्य सार्थकत्वेन तादृश प्रत्ययान्तधातूपस्थाप्य-पाकक्रियायां स्तोकपदार्थस्य विशेषणत्वेन स्तोकपदात् द्वितीया भवति ।

अत्र केचित् एवं वदन्ति । यथा धातोः पाकादौ शक्तिः स्वीक्रियते, तथा 'पाकः' इत्यत्र घञन्तस्यापि पाके शक्तिः स्वीकार्यैव । यदि च घञन्तपाकपदस्य पाके शक्तिः न स्वीक्रियते, तर्हि 'पाकः' इति घञन्तप्रयोगे पाकादौ सुप्विभक्त्यर्थभूतसंख्याकर्मत्वादीनां अन्वयः न स्यात् ।

कुत इति चेत्? 'प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्' इति नियमानुसारेण प्रत्ययानां स्वप्रकृत्यर्थविशिष्ट-स्वार्थबोधकत्वमेव अस्ति । यथा 'घटं कुरु' इत्यत्र द्वितीयायाः स्वप्रकृत्यर्थघटविशिष्टकर्मत्वबोधकत्वम् अस्ति । न तु घटानन्वितकर्मत्वबोधकत्वम् । तथा च यदि घञन्तपाकपदस्य पाके शक्तिः न स्यात् , किन्तु घञः साधुत्वमात्रार्थकत्वं स्यात् , केवलस्य धातोरेव पाके शक्तिः स्यात् , तर्हि सुप्विभक्त्यर्थसंख्याकर्मत्वादीनां पाकेन अन्वयः न स्यात् । यतः एतादृशनियमानुसारेण सुप्प्रत्ययेनापि स्वप्रकृत्यर्थान्वितानामेव स्वार्थभूतसंख्याकर्मत्वादीनां बोधनं कर्तव्यम् । प्रकृतित्वञ्च अव्यवधानेन पूर्ववर्तित्वम् । परन्तु 'पाकः' इत्यत्र पच् + घञ् + सु इति घञादीनां व्यवधानात् पच् धातोः सुप्विभक्तिप्रकृतित्वं नास्ति । यस्य च घञः सुप्विभक्तिप्रकृतित्वं तस्य च निरर्थकत्वमिति घञन्तप्रयोगे पाकादौ कर्मत्वादीनां अन्वयः न स्यात् । अतः धातोरिव घञन्तस्यापि पाकादौ शक्तिः स्वीकार्यैव ।

ननु प्रत्ययानां प्रकृतितदेकदेशार्थान्यतरान्वितस्वार्थबोधकत्वं कल्पयामः । तथा च 'पाकः' इत्यत्र सुप्विभक्तिप्रकृत्येकदेशार्थभूते धात्वर्थे पाके संख्याकर्मत्वादीनामन्वयः भवत्येव इति घञन्तस्य पाके शक्तिः नाङ्गीकार्या इति चेत् , न । तथा सति 'पचन्तं पश्यति' इत्यत्रापि पच् + अत् + अम् इति विवक्षासत्त्वे प्रकृत्येकदेशार्थे पाके द्वितीयार्थकर्मत्वस्य अन्वयः स्यात् न तु प्रत्ययार्थे पाककर्तरि । अतः 'पचन्तं पश्यति' इत्यत्र पाककर्मकमेव दर्शनं स्यात् , न तु पाककर्तृकर्मकम् । न चैतदिष्टम् । अतः प्रकृत्येकदेशार्थे प्रत्ययार्थान्वयः न भवति । तथा च 'पाकः' इत्यत्रापि धात्वर्थपाके कर्मत्वाद्यन्वयः अनुपपन्नः इति तदन्वयार्थं घञन्तस्य पाके शक्तिः स्वीकार्या । एवं च यत्र 'स्तोकं पाकः' इत्यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं तत्र धात्वर्थविशेषणवाचकस्तोकपदात् द्वितीया भवति । यत्र च कृदन्तसमुदायस्य 'पाकः' इत्यादिपदस्य पाकादौ तात्पर्यं (पाकोपस्थापकत्वं) तत्र तादृश-विशेषणवाचकस्तोकादिपदं पाकाद्यर्थोपस्थापककृदन्तसमुदायसमानविभक्तिकमेव भवतीति 'स्तोकः पाकः' इति प्रयोगः । अत्र च प्रमाणं 'कातन्त्रपरिशिष्टव्याकरणशास्त्रमेव' । कथं 'स्तोकः पाकः' इति, तत्र स्तोकपदस्य कृदन्तपाकपदविशेषणत्वात् 'स्तोकः' इति प्रथमान्तप्रयोगः । धात्वर्थीभूतपाकादि-विशेषणत्वे तु 'स्तोकं पाकः' इति केचित् वदन्ति ।

॥ ओं शम् ओं ॥

# आध्यानाधिकरणम्

Dr. V. **रामकृष्णः**

सहायकाचार्यः, वेदान्तविभागः,

मद्रपुरीसंस्कृतमहाविद्यालयः, मयूरपुरी, चेन्नै- 4

साधनाख्याध्याये तृतीयपादे सप्तमम् अधिकरणम् आध्यानाधिकरणम्। सूत्रद्वयात्मकमिदमधिकरणम् "आध्यानाय प्रयोजनाभावात्" (३.३.१४) "आत्मशब्दाच्च " (३.३.१५) इति। अत्र **"इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥ महतःपरमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥**"(१.३.१०-११) इति कठोपनिषद्वाक्यं विषयः। तत्र इमानि वाक्यानि अर्थादीनां परत्वं प्रदिपादयितुं न प्रवृत्तानि, किन्तु मन्त्रद्वयमात्मनः एव परत्वप्रतिपादनाय एकवाक्यत्वेन प्रवृत्तमिति निर्णयायैव विचारस्योपक्रमः क्रियते। इन्द्रियेभ्यः अर्थादीनां परत्वम् , अर्थेभ्यः मनसः परत्वं , मनसः बुद्धेः परत्वं , बुद्धेः परत्वम् आत्मनः, आत्मनः परत्वं महतः, महतः परत्वम् अव्यक्तस्य, अव्यक्तात् परत्वं पुरुषस्य , पुरुषात् परत्वं न कस्यचित् । सा एव परा काष्ठा परा गतिश्च इत्युक्तत्वात् , प्रत्येकमप्येतेषां परत्वप्रतिपादने तात्पर्यम् उत पुरुषस्य परत्वप्रतिपादने वा इति संशीतिः। पूर्वम् आनन्दाद्यधिकरणे सङ्गृहीताः सत्यत्व-अनन्तत्व-आत्मत्वादयो गुणाः ब्रह्मस्वरूपप्रतिपादनपरत्वेन उक्ताः। अत्र असङ्ग्राह्यस्य इन्द्रिय-अर्थादीनां परत्वस्य आत्मप्रतिपत्त्युपायत्वेन कथनमिति पूर्वाधिकरणेन सह अस्य कार्यैकत्वं सङ्गतिः। उच्यते च नैयायिकैः - षोढा सङ्गतिरिति । इन्द्रिय-अर्थादीनामिति भवति धीः, इदमस्मात्परमिदमस्मात्परमिति श्रूयमाणत्वात्। अत्र मीमांसकः पृच्छति – बहूनामेतेषां परत्व-प्रतिपादने वाक्यबहुत्वं स्यात् इति चेत् , नैष दोषः। इष्टापत्तिरेव । परत्वोपेताः विषयाः बहवः प्रतिपादनीयाश्चेत् अपेक्ष्यन्ते एव वाक्यानि बहूनि तत्प्रतिपादनाय। तथा च भाष्यवाक्यम् – " बहून्येव हि एतानि वाक्यानि बहून् विषयान् परत्वोपेतान् प्रतिपादयितुं प्रभवन्ति" इति । अतः प्रत्येकमप्येतेषां परत्वप्रतिपादने एव तात्पर्यम् इति ।

अत्र एवं प्राप्ते सिद्धान्तिना उच्यते– एतेभ्यः सर्वेभ्यः विषयेभ्यः पुरुषः एव परत्वेन प्रतिपाद्यते इत्येतद् युक्तम् । इन्द्रियादीनां विषयाणामेव, एकस्मात् एकैकस्य परत्वम् इति कथनं तु अयुक्तमेव प्रयोजनाभावात्।

ननु प्रयोजनभावात् असम्भवः। प्रत्येकं सर्वेषामेव परत्वाभिधानस्य आध्यानप्रयोजनत्वात् , तत्तदाध्यानानां च प्रयोजनवत्त्वस्मृतेः। तथा हि स्मृतिः :-

**"दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णं सहस्त्रं त्वाभिमानिकाः॥**

**बौद्धाः दश सहस्त्राणि तिष्ठन्ति विगतज्वराः । पूर्णं शतसहस्त्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः ॥**

**पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते।** इति।

प्रामाणिकस्य वाक्यभेदस्याभ्युपेयत्वात् प्रत्येकमर्थादीनां परत्वपराण्येतानि वाक्यानीति।

अत्रोच्यते – "इन्द्रियेभ्यः परा ह्यर्थाः " इत्येष तावत् सन्दर्भः वस्तुतत्त्वप्रतिपादनपरः प्रतीयते, नाध्यानपरः, तदश्रुतेः । तथाच सूत्रार्थस्तु एवम् :- आध्यानाय ध्यानपूर्वकसम्यग्ज्ञानाय पुरुष एव अर्थादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते, न तु अर्थादयोऽपि, पूर्वोक्तरीत्या प्रयोजनाभावात्। इन्द्रियाद्यर्थैः परत्वेन प्रतिपन्नैः निरवद्यनित्यफलं न जन्यते। सकल-अनर्थव्रातातीतः (दुःखलेशरहितः) एतेभ्यः विषयेभ्यः परः पुरुषः एव इति ज्ञानवतः एव निरतिशयसुखात्मकः मोक्षः सिद्ध्यति इति दृष्टं प्रयोजनमस्ति। तथाच श्रुतिः " **निचाय्य तं मृत्युमुखात् प्रमुच्यते"** (कठ.3.15) इति । **पुरुषात्परं न किञ्चिदस्ति** इति प्रतिषेधेन, काष्ठाशब्देन च पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिः इति। पुरुषविषयमादरं प्रदर्शयन्ती श्रुतिः सम्यग्दर्शनं पुरस्कृत्यैव ध्यानोपदेशे प्रवर्तते, न तु केवलध्यानार्थं , ध्यानस्य अत्र प्राधान्याभावात्।

पुरुषप्रतिपत्त्यर्थमेव परप्रवाहोक्तिः उक्ता इत्यत्र हेत्वन्तरम् उच्यते **"आत्मशब्दाच्च"** इति। सकलप्राणिषु उत्पन्नेषु पदार्थेषु च सूक्ष्मत्वात् , न प्रकाशते अयम् आत्मा। प्रकृते पुरुषः एव आत्मशब्देन प्रतिपाद्यते (आत्मशब्दश्रवणात्)। परं तीक्ष्णमतिभिः तत्त्वदर्शिभिः अयं दृश्यते इति अन्येषाम् इन्द्रियाणाम् अनात्मत्वं विवक्षितम् इति गम्यते। तथाच श्रुतिः :- **"एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः"** इति (कठ.1.3.12) इति।

तत्र एतादृशस्य पुरुषस्य अवगमनं न सुलभम् इति दुर्विज्ञेयत्वं, संस्कृतमतिभिः ज्ञेयत्वं च प्रतिपाद्यते। एतदवगत्यर्थमेव आध्यानं विधीयते – **"यच्छेद्वाङ्मनसी प्राज्ञः"** इति (कठ.1.3.13)। अयं विषयः पूर्वमेव **"आनुमानिकमप्येकेषाम्"** (ब्र.सू.1.4.1) इत्यत्र व्याख्यातः। पुरुषविषये एव श्रुतेः आशया-तिशयो लक्ष्यते, नेतरेषु। अपि च **"विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥** इति (कठ.1.3.9) अध्वनः पारं व्यापकस्य ब्रह्मणः परमं पदं किमिति जिज्ञासायाम् इन्द्रियादिकथनद्वारा अयमेव पुरुषः सर्वोत्कृष्टः परशब्दवाच्यः इति ज्ञानप्राप्त्यर्थमेव अयं प्रयत्नः इति पर्यवस्यति।

# श्रीमन्महाभारते शान्तिपर्वणि सचिवाचरणोपदेशविचारः

**Dr. S. Venugopalan,**
Associate Professor,
SCSVMV University, Kanhchipuram.

राजानः सर्वदा ससहायाः एव भवितुमर्हन्ति, सहार्थः, भजमानः सहजः कृत्रिमः चेति। तत्र सहार्थो नाम समानप्रयोजनः इत्यर्थः। भजमानो नाम पितृपितामहादिकालात् सहायकृत् यः सः। सहजो नाम नैसर्गिकं मित्रं बन्धुवत् व्यवहारवान्। कृत्रिमो नाम – उपकारकरणेन सम्पादितं मित्रम्। एतैश्चतुर्भिः साकं राज्ञा कस्मिंश्चिदपि विषये पक्षपातरहितो धर्मनिष्ठः पुरुषः पञ्चमं मित्रं सम्पाद्येत। सः पञ्चमः कुत्रापि निष्कपटः धर्मपक्षपाती अथवा विषयेषु उदासीनो वा भवितुमर्हति। राजा तस्यापि मैत्रीं सम्यादयेत्। परं तस्य अप्रियेषु विषयेषु तेन सह मन्त्रः अकार्यः। धर्माधर्मौ उभौ अपि राज्ञाऽऽदरणीयौ। वस्तुतः राज्ञः दृष्ट्या कोऽपि वास्तविकं मित्रं न भवितुमर्हति।

**मित्राणां प्रकृतिर्नास्ति त्वमित्राणां च भारत। उपकाराद्भवेन्मित्रम् अपकारात् भवेदरिः॥** (शा.प.74.5)

**यस्यैव हि मनुष्यस्य नरो मरणमिच्छति। तस्य पर्यागते काले पुनर्जीवितमिच्छति॥** (शा.प.74.6)

धर्माधर्मेण राजानः चरन्ति विजिगीषवः। चतुर्णां मध्यमौ श्रेष्ठौ, तन्नाम भजमान-सहजौ बहुशः विश्वसनीयौ, अन्यौ द्वौ (सहार्थः, कृत्रिमश्च) सर्वदा शङ्कनीयौ एव। वस्तुतः स्वेनैव करणीयेषु कार्येषु एते पञ्चापि शङ्क्या एव। मित्राणां रक्षणे राजा सर्वदा श्रद्दध्यात्। तादृशं मित्रेषु अश्रद्दधानं राजानं प्रजाः उपेक्षेरन्। असाधुरपि जनः क्वचित् साधु आचरति, तथैव साधुरिति ज्ञातोऽपि असाधुकार्यं भजते इति मनुष्यस्य मानसिकी स्थितिः सर्वदा चञ्चला चपला च। अतः स्वार्थपरो राजा सामान्यतः कमपि जनं 100% विश्वसितुं नार्हति। अतश्च अतिमुख्येषु कार्येषु स्वयं राजा प्रवर्तेत। नान्यं तत्र नियोजयेत्। कस्मिन्नपि क्रियमाणः पूर्णविश्वासः राजघातकः भवति।

**एकान्तेन हि विश्वासः कृत्स्नो धर्मार्थनाशकः। अविश्वासश्च सर्वत्र मृत्युर्नापि विशिष्यते॥** (शा.प.74.12)

कुत्रापि अविश्वासोऽपि मृत्योः अधिकं हानिकारकं सम्पद्येत। अतश्च मित्रेषु अपि राजा सर्वदा मध्यस्थः तिष्ठेत्। विश्वासो वा अविश्वासो वा पूर्णतया न कार्यः। अतः राजनीतौ अयमेकः पाठः सर्वैरपि राजभिः अवश्यं ज्ञातव्यो भवति। वस्तुतः राज्ञः यशसि अनसूयावान् एव मित्रेषु अग्रगण्यः पूज्यः भवितुमर्हति। स एव सन्मित्रमपि उच्यते।

**यस्समृद्ध्या न तृप्येत, क्षये दीनतरो भवेत्। एतदुत्तममित्रस्य निमित्तमभिचक्षते॥** (शा.प.74.17)

वस्तुतः यः मित्रं, ममाऽभावेन राज्ञोऽभावो भविष्यतीति मनुते, तस्मिन् जने विश्वासः विधेयः।

**यन्मन्येत ममाभावात् अस्याभावो भवेदिति। तस्मिन्कुर्वीत विश्वासं यथा पितरि वै तथा॥**

**तं शक्त्या वर्धमानं च सर्वतः परिबृंहयेत्।** (शा.प.74.19-20) इति।

एवमेव -

**नित्यं क्षतात् धारयति यो धर्मेष्वपि कर्मसु। क्षयाद्भीतं विजानीयात् उत्तमं मित्रलक्षणम्॥**

इति सन्मित्रलक्षणं निरूप्यते। तथैव -

**ये यस्य क्षयमिच्छन्ति ते तस्य रिपवः स्मृताः। व्यसनात् नित्यभीतो वै समृद्ध्या न च तृप्यति॥**

**यत्स्यादेवंविधं मित्रं तदात्मसममुच्यते।** (शा.प.74.21.22)

इति सदसन्मित्रयोः लक्षणानि परिचाय्य, कः मन्त्रित्वेन नियोजने योग्यतरः इति निश्चिनोति भीष्माचार्यः इत्थम्–

**रूपवर्णस्वरोपेतः तितिक्षुरनसूयकः। कुलीनःशीलसम्पन्नः स ते स्यात् प्रत्यनन्तरः॥**

**मेधावी स्मृतिमान्दक्षः प्रकृत्या चानृशंस्यवान्। यो मानितोऽमानितो वा न सन्तुष्येत् कथञ्चन॥**

**ऋत्विग्वा यदि वाऽचार्यः सखा वाऽत्यन्तसत्कृतः। गृहे वसेदमात्यस्ते स स्यात् परमपूजितः॥**

**संविद्याः परमं मित्रं प्रकृतिं चार्थधर्मयोः। विश्वासस्ते भवेत् तत्र यथा पितरि वै तथा॥**

(शा.प.74.23 -26)

अत्र श्लोके किञ्चित् वैशिष्ट्यं वर्तते। तथा च प्रकृतिः इति प्रधानहेतुः। इयं द्रव्याणां, धर्माणाम् , उभयेषामिति त्रिविधा स्मर्यते। तत्र कृषिः, वाणिज्यम् , दुर्गः, सेतुः, गजग्रहस्थानम् , स्वर्णरत्नादीनां खनिभूमिः, करग्रहणशाला, अनाथं स्थानमिति इमानि अष्टौ द्रव्यसम्बन्धिनी प्रकृतिः इत्युच्यते। धर्माधिकारी धर्मप्रकृतिरित्युच्यते। दुर्गाधिपः, सेनापतिः, राजा, पुरोहितः, वैद्यः, ज्योतिश्शास्त्रविदिति षड् जनाः उभयोरपि तन्नाम द्रव्यधर्मयोः द्वयोः अपि प्रकृतिरित्युच्यन्ते। सन्दर्भेऽस्मिन् याज्ञवल्क्यस्मृतौ राज्ञां प्रकृतिः इत्थं निरूप्यते।

**पुरोधाश्च प्रतिनिधिः प्रधानः सचिवस्तथा। मन्त्री च प्राड्विवाकश्च पण्डितश्च सुमन्त्रकः॥**

**अमात्यो दूत इत्येताः राज्ञः प्रकृतयो दश। दशमांशाधिकाः पूर्वं दूतान्ताः क्रमशस्स्मृताः॥**

(शुक्रनीतिपरिशिष्टम्) इति दूतादारभ्य प्रतिनिधिपर्यन्तं वेतनं दशांशतोऽधिकं भवेदित्यपि दृश्यते।

**स मन्त्रिणः प्रकुर्वीत प्राज्ञान् मौलान् स्थिरान् शुचीन्।**

**तैस्सार्धं चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयम्॥** (याज्ञवल्क्यस्मृतिः 1.312)

इति मन्त्रिलक्षणमुच्यते। अमुमेव विषयं अन्तिमे महाभारतमुखादपि श्रोष्यामः। तत्र मन्त्री, अमात्यः, सचिवः, प्रतिनिधिः, दूतः, सुमन्त्रः इत्येवमादयो बहवः शब्दाः श्रूयन्ते। तत्र एकैकस्य किञ्चिद्वैशिष्ट्यमस्ति। तद्यथा याज्ञवल्क्ये दृश्यते इति परिशीलयेम, तत्र -

**मन्त्री तु नीतिकुशलः पण्डितो धर्मतत्ववित्। लोकशास्त्रनयज्ञस्तु प्राड्विवाकः स्मृतः सदा॥**

**देशकालप्रविज्ञाता अमात्य इति कथ्यते। आयव्यय प्रविज्ञाता सुमन्त्रः स च कीर्तितः॥**

**इङ्गिताकारचेष्टाज्ञः स्मृतिमान् देशकालवित्। षाड्गुण्यमन्त्रविद् वाग्मी वीतभीः दूत इष्यते॥**

**अहितश्चापि यत्कार्यं सद्यः कर्तुं यदोचितम्। अकर्तुं यद्धितमपि राज्ञः प्रतिनिधिः सदा॥**

**बोधयेत् कारयेत् कुर्यात् न कुर्यान्न प्रबोधयेत्।** (शुक्रनीतिः2.52-56)

एवं च –

**कीर्तिप्रधानो यश्च स्यात् यश्च स्यात् समये स्थितः। समर्थोऽन्यांश्च न द्वेष्टि समर्थान् कुरुते च यः॥**

**यो न कामात् भयात् क्रोधात् लोभाद्वा धर्ममुत्सृजेत्। दक्षः पर्याप्तवचनः स ते स्यात् प्रत्यनन्तरः॥**

**कुलीनः शीलसम्पन्नः तितिक्षुरनसूयकः। स्थिरश्चार्यश्च विद्वांश्च प्रतिपत्तिविशारदः॥**

**एते अमात्याः कर्तव्याः सर्वकर्मस्ववस्थिताः।** (शा.प.74.28 -30)

इति अमात्यत्वेन नियुक्तौ अर्हान् जनान् परिचाययति भीष्माचार्यः। इत्थं श्रद्धापूर्वकं जागरूकतया चिताः अमात्याः राज्ञः सर्वार्थसाधकाः भवेयुरिति।

**पूजिताः संविभक्ताश्च सुसहायाः स्वनुष्ठिताः। कृत्स्नमेते विनिक्षिप्ताः प्रतिरूपेषु कर्मसु॥**

**युक्ता महत्सु कार्येषु श्रेयांस्युत्पादयन्त्युत। एते कर्माणि कुर्वन्ति स्पर्धमाना मिथस्सदा॥**

**अनुतिष्ठन्ति चैवार्थान् आतिष्ठन्तः परस्परम्।** (शा.प.74.31 -33)

एतावदुक्त्वा ज्ञातीनां विषये जागरूको भव। तेषु विश्वासः नैव कार्यः। तेभ्यो बिभीयात् मृत्योः सकाशात् यथा तथा। राज्ञः वृद्धिं सामन्त इव ज्ञातयः नैव सहेरन् असूयेयुश्च। अतः ते सन्देह्या भवन्ति। तदर्थं ज्ञातीनां परित्यागोऽपि न कार्यः। क्वचित् ज्ञातिभिन्ना अपि जनाः श्रामयेयुः। ज्ञातिजनाः अपि सुसहायाः भवेयुः इति इदमपि स्वाभाविकं दृश्यं भवितुमर्हति। तथा च ज्ञातिषु गुणाः तथैव दोषा अपि दृश्यन्ते एव। अतश्च वचसा ज्ञातीन् सर्वदा प्रशंसेत् राजा। क्रिययाऽपि सभाजनीयाः ज्ञातयः वर्तन्ते। तेषामप्रियं कार्यं राज्ञा नैव करणीयम्। तेषु अविश्वस्तोऽपि विश्वस्त इव व्यवहरेत् राजा।

**विश्वस्तवदविश्वस्तः तेषु वर्तेत सर्वदा। न हि दोषो गुणो वेह निस्पृहः स्वेषु दृश्यते॥**

**तस्यैवं वर्तमानस्य पुरुषस्याप्रमादिनः। अमित्रास्सम्प्रसीदन्ति ततो मित्रं भवत्युत॥** (शा.प.74.41-42) एवं को वाऽमात्यो भवितुमर्हतीति निरूप्य एकेन सम्पूर्णेन अध्यायेन ज्ञातीनां विषये अवधेयान् व्यवहारविशेषान् प्रबोध्य तस्मिन् विषये ततोऽप्यधिकं अग्रिमाध्यायेन ब्रूते। तत्र राज्यभरणे सप्ताङ्गानि प्रथितानि।

**स्वामी, अमात्य, सुहृत् , कोष, राष्ट्र, दुर्ग, बलानि च। राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च॥**
इत्यमरः।

तदनुसारमेव राजानमुपासीनो भीष्मः युधिष्ठिराय अमात्यलक्षणं ब्रुवाणः कोशविषयकं द्वितीयं विधिं ब्रूते। तथा च राजा कोशवर्धकान् सर्वान् जनान् प्रजाश्च करदातॄन् सर्वथा रक्षेत्। तत्र प्रधानतया राज्यकोशम् अपहरतः अमात्यान् विदित्वा राज्ञे ये केचित् निवेदयितारः स्युः तान् अप्रकाशयन्नेव रक्षेत्। स भृत्यश्चेत् अपि अन्यश्चेदपि तद्वचनं रहसि श्रुत्वा रक्षणीयम्। यदि तादृशं जनम् अमात्याः जानीयुः तर्हि तादृशं रहस्यवेत्तारं जनं ते हन्युः। ते अपहर्तारः सर्वेऽपि सम्भूय तद्विरुद्धाचारिणं जनं महत्या विपदा योजयेयुः।

**ह्रियमाणममात्येन भृत्यो वा यदि वा हृतः। यो राजकोशं नश्यन्तम् आचक्षीत युधिष्ठिर॥**

**श्रोतव्यं तस्य च रहो रक्ष्यश्चामात्यतो भवेत्। अमात्याश्चोपहर्तारं भूयिष्ठं घ्नन्ति भारत॥**

**राजकोशस्य गोप्तारं राजकोशविलोपकाः। समेत्य सर्वे बाधन्ते स विनश्यत्यरक्षितः॥** (शा.प.76. 2-4) इति ब्रुवन् कालकवृष्णीयोपाख्यानम् (कोसलराज्ये कालकवृष्णियनाम्ना मुनिना राज्ञे निवेदितं प्राक्तनं वृत्तान्तम्) अधुना भीष्माचार्यः युधिष्ठिराय विवृणुते।

तथा च कालकवृक्षीयो नाम मुनिः कोसलदेशराजं क्षेमदर्शिनं द्रष्टुं तद्राज्यं कदाचिज्जगाम। सः तदातनस्य राज्ञः क्षेमदर्शिनः पितृपितामहकालादेव राजकुटुम्बेन सह सम्बद्धः तत्क्षेमाकाङ्क्षी आसीत्। सः काकं कञ्चित् पञ्जरबद्धं कृत्वा आदौ कोसलराजस्य राज्ये सर्वत्र अटित्वा तत्र तत्र राजकीयपुरुषाणां दुर्व्यवहारं सर्वं विदित्वा, विशिष्य मन्त्रिवर्गेण स्वयं कृतान् धनविषयकान् राजकोशशोषकान् व्यवहारान् संविद्य राज्ञे निवेदयितुम् इष्टवान्, सः इत्थम् उवाच।

**अधीये वायसीं विद्यां शंसन्ति मम वायसाः। अनागतमतिक्रान्तं यच्च सम्प्रति वर्तते॥**

**सर्वज्ञोऽस्मीति वचनं बुवाणस्संशितव्रतः। स स्म कौसल्यमागम्य राजामात्यैरलङ्कृतम्॥**

**प्राह काकस्य वचनात् अमुत्रेदं त्वया कृतम्। असौ च सम्यग्जानीते राजकोशस्त्वयाहृतः॥**

**एवमाख्याति काकोऽयं तच्छीघ्रमनुगम्यताम्। अथान्यानपि स प्राह राजकोशहृतान्सदा॥**

**न चास्य किञ्चिदनृतं वचनं श्रूयते क्वचित्॥** (शा.प.76.08 -14)

इत्येवमादिरूपेण तत्रत्यान् अमात्यान् सर्वानपि दोषयुक्तान् निरूपितवान्। दिग्भ्रान्ताः सर्वेऽपि ते सङ्क्रुद्धाः तद्दिने निशायां पञ्जरस्थं काकं बाणैः अघ्नन्। तेन चकितः सः मुनिः रहसि राजानं दृष्ट्वा एवं अवोचत्।

**वायसं तु विनिर्भिन्नं दृष्ट्वा बाणेन पञ्जरे। पूर्वाह्णे ब्राह्मणो वाक्यं क्षेमदर्शिनमब्रवीत्॥**

**राजानमभयं याचे प्रभुं प्राणधनेश्वरम्। अनुज्ञातस्त्वया ब्रूयां वचनं भवतो हितम्॥**

**मित्रार्थमुपसन्तप्तः भक्त्या सर्वात्मनाऽऽगतः। ह्रियते हि महार्थश्च पुरुषो विक्रमीत्यपि॥**

**सम्बुबोधयिषुर्मित्रं सदश्वमिव सारथिः। अपि मन्युप्रसक्तो हि प्रसज्येतेति कारणम्॥**

**तथा विभज्य सुहृदा क्षन्तव्यं संविजानता। ऐश्वर्यमिच्छता नित्यं पुरुषेण बुभूषता॥** (शा.प.76.16 -20)

इत्येवं दैन्यभावमुपगत्य राजानं प्रति सर्वमपि दृष्टं यथातथं निरूपयितुम् अनुमतिं ययाचे। राजाऽपि, कुतो वा अनुमतिः न स्यात्? अवश्यं मद्धितैषिभिः उच्यमानं सर्वमपि श्रद्धया सुश्रोष्यते एव मया। श्रुत्वा त्वन्मार्गदर्शनेनैव अग्रे अहं यास्यामि इत्यप्यवोचत्। तेन वचनेन सान्त्वितः मुनिः सः राजानमेवमब्रवीत् , हे राजन् ,

**विद्वान् नयानपायांश्च भयख्यातॄन् भयानि च।**

**भक्त्या वृत्तिं समाख्यातुं भवतोऽन्तिकमागतः॥** (शा.प.76.23)

इत्यारभ्य बहुविधान् उपायान् राज्यरक्षणविधौ, विशिष्य अमात्यव्यवहाराणां विषये कथममात्याः प्रवर्तनीयाः? तेषां दोषाः कथं ज्ञातव्याः? ते कथं दण्डनीयाः? इति अधुनातनशासकेभ्यः बोधयितुम् अनेकविषयान् राज्ञे निवेदितवान्। तत्र प्रमुखान् अंशान् एव वयमधुना किञ्चिदिव अत्र चिन्तयेम।

आदौ सामान्याः अमात्या वा राज्ञा सह कथं व्यवहरेयुरिति ब्रूते।

**प्रागेवोक्तं तु दोषाय आचार्यैर्नृपसेवनम्। आगतेः कुगतिर्ह्येषा या राज्ञा सह जीविका॥**

**आशीविषैश्च तस्याहुः सङ्गमं यस्य राजभिः। बहुमित्राश्च राजानः बह्वमित्रास्तथैव च॥**

**तेभ्यः सर्वेभ्य एवाहुः भयं राजोपसेविनाम्। तथास्य राजतो राजन् मुहूर्तादागतं भयम्॥**

**नैकान्तेनाप्रमादो हि शक्यं कर्तुं महीपतौ। न तु प्रमादः कर्तव्यः कथञ्चिद्भूतिमिच्छता॥**

(शा.प.76.24 -27) इत्येवंप्रकारेण राज्ञाम् अधृष्यत्वाभिगम्यत्वं विवृणुते। स ततोऽपि ब्रूते।

**प्रमादात् स्खलते बुद्धिः स्खलतो नास्ति जीवितम्। अग्निं दीप्तमुपासीत राजानमुपशिक्षितः॥**

**आशीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरम्। यत्नेनोपचरेन्नित्यं नाहमस्मीति मानवः॥**

**देवतेव हि सर्वार्थान् कुर्याद्राजा प्रसादितः। वैश्वानर इव क्रुद्धः समूलमपि निर्दहेत्॥** (शा.प.76.28 - 31) इति राज्ञां स्वभावं निरूप्य, स्वस्य विषयेऽपि किञ्चिदिव ब्रवीति,

**अथ भूयांसमेवार्थं करिष्यामि पुनःपुनः। ददात्यस्मद्विधोऽमात्यः बुद्धिसाहाय्यमापदि।**

**वायसस्त्वेव मे राजन्नन्तकायाभिसंहितः॥ न च मेऽत्र भवान् भक्तः न च येषां भवान् प्रियः।**

**हिताऽहितांस्तु बुध्येथाः मा परोक्षमतिर्भव॥ ये त्वादानपरा ये च वसन्ति भवतो गृहे।**

**अभूतिकामा भूतानां तादृशैर्मेऽतिसंहितः॥ यो वा तव विनाशेन राज्यमिच्छत्यनन्तरम्।**

**आन्तरैरभिसन्धाय राज्ञःसिध्यन्ति चान्यथा॥** (शा.प.76.32 - 36)

अनेन अन्तिमोपदेशेन अमात्यानां मध्ये परस्परं कलहमुत्पाद्य अन्यद्वारा अन्यस्य विदलनं राजनीतिरिति सन्यङ्ग्यरूपि तेन मुनिना। तेन इदमपि चोक्तम् ,

**गहनं भवतो राज्यम् अन्धकारं तमोवृतम्। नेह विश्वसितुं शक्यं भवताऽपि कुतो मया॥**

**अतो नायं शुभो वासः तुल्ये सदसती त्विह। वधो ह्येवेह सुकृते दुष्कृते नैव संशयः॥**

**न्यायतो दुष्कृते घातः सुकृते स्यात् कथं वधः। नेह युक्तं स्थिरं स्थातुं जवेनोत नशेद्बुधः॥**

(शा.प.76.42 -44) इत्येवंरीत्या तस्य राज्ञः तद्गृहे एव दृश्यमानां दुःस्थितिं तं सविस्तरं निरूपयामास।

**यथाश्रित्य महावृक्षं कक्षस्संवर्धते महान्। ततस्तं संवृणोत्येव तमतीत्य च वर्धते॥**

**तेनैवोपेन्धनेनेमं दावो दहति दारुणः। तथोपमा ह्यमात्यास्ते राजंस्तान् परिशोधय॥**

**भवतैव कृता राजन् भवता परिपालिताः। भवन्तं पर्यवज्ञाय जिघांसन्ति भवत्प्रियान्॥**

(शा.प.76.49 -51) इति अमात्याः कथं नेतव्याः राज्ञा इति विषये अपेक्षितं ज्ञानं राज्ञे न्यवेदयत् च। मुनिना सम्प्रबोधितः राज्यनिर्वहणे अवहितश्चासौ कोसलराजः मुनिमेवमभाषत,

**ये त्वां ब्राह्मण नेच्छन्ति, न मे वत्स्यन्ति ते गृहे। भवतैव हि तज्ज्ञेयं यदिदानीमनन्तरम्॥**

**यथा स्यात् सुधृतो दण्डः यथा च सुकृतो भवेत्। तथा समीक्ष्य भगवन् श्रेयसे विनियुङ्क्ष्व माम्॥**

(शा.प.76.59 - 60) इति महाराजस्य सान्त्वनवचनानि आकर्ण्य मुनिः उपदिष्टवान् एवम् –

**अदर्शयन्निमम् दोषं एकैकं दुर्बलम् कुरु। ततः कारणमाज्ञाय पुरुषं जहि साधु च।**

**एकदोषा हि बहवः मृद्नीयुरपि कण्टकान्। अर्थे सर्वं जगद्बद्धम् अर्थेनैव निबध्यते।**

**अर्थे दर्पो मनुष्याणां तस्मादर्थं विरेचय। एकेनैकस्य दोषेण तद्विरुद्धं प्रचोदय।**

**स तस्य दोषानुद्भाव्य तस्यार्थं ग्राहयिष्यति। सामपूर्वं च केषाञ्चित् भेदेन च परस्परम्।**

**वैरं कारय भूपाल पश्चाद्दण्डं प्रचोदय। बिल्वेन च यथा बिल्वमाकारं छाद्य बुद्धिमान्।**

**अशुद्धं सचिवं राजन्नशुद्धेनैव नाशय। मन्त्रभेदभयाद्राजंस्तस्मादेवं ब्रवीमि ते।** (शा.प.76.61 - 66)

इत्येवमादिभिः वचनैः मुनिः अमात्यनिर्वहणकलां राज्ञे सम्यङ्निरूप्य स्वयं तस्य पितृपितामहकालात् तत्परिवारहिताभिलाषी भवामीति निवेद्य राजपालितः राज्यहिताय प्रजाहिताय च उपदेशं कृत्वा राजानं सन्मार्गे यापयति स्मेति। ततश्च युधिष्ठिरेण –

**सभासदः सहायाश्च सुहृदश्च विशांपते।**

**परिच्छदाः तथाऽमात्याः कीदृशाः स्युः पितामह॥** (शा.प.77.01)

इति पृष्टः सन् भीष्माचार्याः मन्त्रिलक्षणानि, इतरेषां सभासदाञ्च लक्षणानि समुपदिशति इत्थम् –

**ह्रीनिषेधास्सदाऽऽसन्नास्सत्यलज्जासमन्विताः। शक्ताः कथयितुं दान्ताः ते तव स्युः सभासदः॥**

**अमात्याश्चातिशूराश्च ब्रह्मण्याश्च बहुश्रुताः। सन्तुष्टाश्चापि कौन्तेय महोत्साहाश्च कर्मसु॥**

**एतान् सहायान् लिप्सेथाः सर्वास्वापत्सु भारत। कुलीनः पूजितो नित्यं न हि शक्तिं निगूहते॥**

**प्रसन्नमप्रसन्नं वा पीडितं हृतमेव वा। आवर्तयति भूयिष्ठं तदेकोऽप्यनुपालितः।** (स्निग्धलक्षणमिदम्) (शा.प.77.02 - 05)

ततः सेनान्यः कथं स्युः इति ब्रूते –

**कुलीना देशजाः प्राज्ञाः कृपावन्तो बहुश्रुताः। प्रगल्भास्त्वनुरक्ताश्च ते तव स्युः परिच्छदाः॥**

**दौष्कुलेयाश्च लुब्धाश्च नृशंसा निरपत्रपाः। ते त्वां जातु न सेवेयुः यावत्ते खड्गपाणयः॥**

**अर्थ्यमानैश्च सत्कारैर्भोगैरुच्चावचैः प्रियान्। यानर्थभाजो मन्येथाः ते ते स्युः सुखभागिनः॥**

**अभिन्नवृत्ता विद्वांसः सद्वृत्ताश्चरितव्रताः। न त्वां नित्यार्थिनो जह्युः अक्षुद्राः सत्यवादिनः॥**

**अनार्या ये न जानन्ति समयं मन्दचेतसः। तेभ्यः परिजुगुप्सेथाः ज्ञायेथाः समयच्युतान्॥**

(शा.प.77.06 - 10) इत्येवं प्रकारेण सामान्यतया के मन्त्रिस्थाने नियोक्तव्याः, के न योक्तव्या इति निरूप्य तत्रस्थान् निगूढानंशान् निरूपयितुं प्रारभते।

**नैकमिच्छेत् गणं हित्वा स्याच्चेदन्यतरग्रहः। यस्त्वेको बहुभिः श्रेयान् कामं तेन गणं त्यजेत्॥**

**श्रेयसो लक्षणञ्चैतद् विक्रमो यस्य दृश्यते। कीर्तिप्रधानो यश्च स्यात् समये यश्च तिष्ठति॥**

**समर्थान् पूजयेद्यस्तु समृद्धे स्पर्धते न यः। न च कामाद्भयात् क्रोधात् लोभाद्वा धर्ममुत्सृजेत्॥**

**अमानी सत्यवाक् शक्तः जितात्मा मान्यमानिता। स ते मन्त्रसहायः स्यात् सर्वावस्थं परीक्षितः॥**

**कुलीनः कुलसम्पन्नः तितिक्षुः दक्ष आत्मवान्। शूरः कृतज्ञः सत्यज्ञः श्रेयसः पार्थ लक्षणम्॥**

**तस्यैवं वर्तमानस्य पुरुषस्य विजानतः। अमित्रास्सम्प्रसीदन्ति तथा मित्रीभवन्त्यपि॥**

(शा.प.77.11 - 16) इत्येवंरूपेण अमात्यानां लक्षणानि निरूप्य, तेषां गुणागुणानां परीक्षा कथं करणीया? इति निरूपयति।

अधुनातने कालेऽपि विद्यालयेषु अध्यापकत्वेन चयनात्पूर्वं अभ्यर्थिनां साक्षात्कारः क्रियते, तेषां विद्यायोग्यता परिशील्यते। उद्योगदानात्परमपि, योग्यतानुसारं किं सः नियुक्तः स्वीयां समग्रां शक्तिं सामर्थ्यञ्च छात्रोन्नतिविषये तदध्यापनविषये च प्रयुङ्क्ते वा इति प्रतिवर्षं 'annual performance appraisal' APA Scores क्रियते यथा तथा पूर्वं मन्त्रिस्थाने अमात्यस्थाने वा नियुक्तानामपि व्यवहारः राजभिः असकृत् भिन्नभिन्नप्रकारेण परीक्षणीय एवेति धिया पुनः परीक्षा विधीयते भीष्माचार्येण।

**अत ऊर्ध्वममात्यानां परीक्षेत गुणागुणान्। संयतात्मा कृतज्ञश्च भूतिकामश्च भूमिपः।**

**सम्बद्धः पुरुषैरार्यैः अभिजातैः स्वदेशजैः। आगतैस्स्वव्यतीहारैः सर्वतः सुपरीक्षितैः।**

**यौना ध्रौवास्तथा मौलाः तथा चाप्यनुपस्कृताः। कर्तव्या भूतिकामेन पुरुषेण बुभूषता।** (शा.प.77.17 - 19) तन्नाम ऐश्वर्यकामेन आत्मनः, स्वहितैषिणा राज्ञा उत्तमकुले जातान् वेदमार्गानुयायिनः परम्पराप्राप्तान् अनहङ्कृतान् विदुषः एव मन्त्रिस्थाने नियुञ्जीत। त इमे मन्त्रिस्थाने नियुक्ताः, विनम्रमतयः मृदुस्वभावाः धैर्यपराक्रमशीलाः क्षमावन्तः अन्तःशुद्धियुक्ताः स्वामिभक्ताः शुद्धान्तरङ्गबहिरङ्गाः कार्यकरणपटवः क्रियाशीलाश्च भवेयुः। तदुच्यते –

**परीक्षितगुणान् नित्यं प्रौढभावान् धुरन्धरान्। पञ्चोपधाव्यतीतांश्च कुर्याद्राजाऽर्थकारिणः॥**

**पर्याप्तवचनान् धीरान् प्रतिपत्तिविशारदान्। कुलीनान् सत्यसम्पन्नान् इङ्गितज्ञान् अनिष्ठुरान्॥**

**देशकालविधानज्ञान् भर्तृकार्यहितैषिणः। नित्यमर्थेषु सर्वेषु राजन् कुर्वीत मन्त्रिणः॥** (शा.प.77.21 - 23) इत्येवंप्रकारेण पूर्वोक्तगुणयुक्तान् पञ्च जनान् मन्त्रिणः कुर्यात् राजा, ये च सर्वेषु कर्मसु विषयेषु महाराजस्य हितवक्तारः भवेयुरिति। एतद्विरुद्धतया हीनैः कृतः सम्बन्धः राज्ञः विनाशाय कल्पेतेति –

**हीनतेजोभिसम्पृक्तो नैव जातु व्यवस्यति। अवश्यं जनयत्येव सर्वकार्येषु संशयान्॥** (शा.प.77.24) एवमेव यः अल्पज्ञः भवति मन्त्री सः मन्त्रालोचनाविषये भागं ग्रहीतुम् अनर्हः एव भवतीति तिरस्क्रियते।

**एवमल्पश्रुतो मन्त्री कल्याणाभिजनोऽप्युत। धर्मकामार्थसंयुक्तं नालं मन्त्रं परीक्षितुम्॥** (शा.प.77.26)
एवमेव यः अन्यराज्ये जातः सः पण्डितश्चेदपि मन्त्रालोचनायां भागग्राही न भवितुमर्हति, इति

**तथैवानभिजातोऽपि काममस्तु बहुश्रुतः। अनायक इवाचक्षुर्मुह्यत्यूह्येषु कर्मसु॥**

**यो वाऽप्यस्थिरसंकल्पो बुद्धिमानागतागमः। उपायज्ञोऽपि नालं स कर्म यापयितुं चिरम्॥**

**केवलात्पुनराचारात्कर्मणो नोपपद्यते। परामर्शो विशेषणामश्रुतस्येह दुर्मतेः॥** (शा.प.77.27 - 29)

एवमादिभिः श्लोकैः के वा मन्त्रिपदे न नियोक्तव्या इति विविच्य राजानं प्रबोधयति। राज्ञि अननुरक्तः जनः मन्त्रिस्थानं नैव प्राप्तुमर्हति इति बोधयति।

**मन्त्रिण्यननुरक्ते तु विश्वासो नेह विद्यते। तस्मादननुरक्ताय नैव मन्त्रं प्रकाशयेत्॥** (शा.प.77.30)
तथा क्वचित् अनधिकारिणे मन्त्रिस्थानं दत्तं चेत् सः धूर्तः कथं भविष्यतीति स्पष्टतरं ब्रवीति भीष्मः –

**व्यथयेद्धि स राजानं मन्त्रिभिः सहितोऽनृजुः। मारुतोपहितैः छिद्रैः प्रविश्याग्निरिव द्रुमम्।**
तथा च सन्मन्त्री कथम् वा स्यात्?

**सङ्क्रुध्यत्येकदा स्वामी स्थानाच्चैवापकर्षति। वाचा क्षिपति संरब्धः पुनः पश्चात् प्रसीदति।** (शा.प.77.31 - 32) तन्नाम राजा क्वचित् मन्त्रिणं दूषयेत् , तस्मै क्रुद्ध्येत् , क्वचित् स्थानादपि अपसारयेत् , द्विष्यादपि, परन्तु किञ्चित्कालानन्तरं पुनः प्रसीदेत् अमुष्मिन्। ईदृशेषु सन्दर्भेषु सन्मन्त्री क्षमां भजेत्। राज्ञो विरुद्धं नैव किञ्चित् कुर्यात्। राजनिन्दा परैस्सह नैव कृता स्यात्। राजकृपां प्रतीक्षमाण एव स्यात् अयमिति। क्वचित् मन्त्रिणोऽपि क्रुद्धाः स्युः राजनिन्दामसहमानाः,

**"न तान्यनुरक्तेन शक्यानीह तितिक्षितुम्। मन्त्रिणां च भवेत्क्रोधः विस्फूर्जितमिवाशनेः॥"**

परन्तु - **"यस्तु संहरते तानि भर्तुः प्रियचिकीर्षया। समानसुखदुःखं तं पृच्छेदर्थेषु मानवम्॥"**
इति मन्त्रिषु अपेक्षितान् गुणाऽगुणान् परीक्षेत राजा। यद्यपि स्वामिभक्तः सर्वगुणोपेतः राजनीतिज्ञः, अथापि कापट्ययुक्त इति ज्ञातश्चेत् मन्त्रालोचनासु तं राजा परिहरेत् इति।

**अनृजुस्त्वनुरक्तोऽपि सम्मितश्चेतरैःगुणैः। राज्ञः प्रज्ञानुरक्तोऽपि न मन्त्रं श्रोतुमर्हति॥** (शा.प.77.35)

इति परिहार्यान् अपि निर्दिशति भीष्माचार्यः। एवमेव –

**योऽमित्रैस्सह संबद्धः न पौरान् बहुमन्यते। स सुहृत् तादृशो राज्ञः न मन्त्रं श्रोतुमर्हति॥**

**अविद्वानशुचिः स्तब्धः शत्रुसेवी विकत्थनः। असुहृत् क्रोधनो लुब्धो न मन्त्रं श्रोतुमर्हति॥**

**आगस्कृच्चानुरक्तोऽपि काममस्तु बहुश्रुतः। सत्कृतस्संविभक्तोऽपि न मन्त्रं श्रोतुमर्हति॥**

(शा.प.77.36 - 38) अत्र आगस्कृत् इत्यस्य नूतनतया परिचयं प्राप्तः इत्यर्थः। मन्त्रिमण्डले नूतनतया प्रविष्टः। एवमेव—

**यः स्वल्पेनापि दोषेण सकृदाक्षारितो भवेत्। पुनरन्यैर्गुणैर्युक्तः न मन्त्रं श्रोतुमर्हति॥**

सः परिहार्यः यस्य पिता विधर्मतो विप्रकृतः अभवत् परा राज्ञा। सः सत्कृतोऽपि पुनः स्थापितोऽपि मन्त्रं श्रोतुं नार्हति। एवं परिहार्यान्निरूप्य आहार्यानुपदिशति मन्त्रालोचनायाम् , ते हि,

**कृतप्रज्ञश्च मेधावी बुधो जानपदश्शुचिः। सर्वकर्मसु यः शुद्धः स मन्त्रं श्रोतुमर्हति॥**

**ज्ञानविज्ञानसम्पन्नः प्रकृतिज्ञः परात्मनोः। सुहृदात्मसमो राज्ञः स मन्त्रं श्रोतुमर्हति॥**

**सत्यवाक्शीलसम्पन्नः गम्भीरस्सत्तपोमृदुः। पितृपैतामहो यस्स्यात् स मन्त्रं श्रोतुमर्हति॥**

**सन्तुष्टः सम्मतः सद्भिः शौण्डीरो द्वेष्यवाचकः। मन्त्रवित् कालविच्छूरः स मन्त्रं श्रोतुमर्हति॥**

(शा.प.77.41 - 44) अत्र शौण्डीरो नाम समर्थः। द्वेष्यवाचको नाम पापेषु द्विष्टः, पापकर्मकरणे विरक्तः अभिप्रेतः।

**सर्वलोकमिमं शुक्तः सान्त्वेन कुरुते वशम्। मन्त्रस्तस्मै प्रयोक्तव्यः दण्डमाधित्सताप्युत॥**

**पौरजानपदा यस्मिन् विश्वासं धर्मतो गताः। योद्धा नये विपश्चिच्च स मन्त्रं श्रोतुमर्हति॥**

**तस्मात् सर्वगुणैरेतैः उपपन्नाः सुपूजिताः। मन्त्रिणः प्रकृतिज्ञाः स्युः त्र्यवरा महदीप्सवः॥**

(शा.प.77.45 - 47)

इदानीम् अन्तिमतयोक्तेन पद्येन पूर्वोक्तगुणसम्पन्नाः त्रयो वा न्यूनातिन्यूनं मन्त्रिपदे नियोक्तव्याः। तादृशा ये नियुक्ताः ते स्वपक्षे परपक्षे च (शत्रुपक्षे च) विद्यमानानि रन्ध्राणि छिद्राणि सूक्ष्मेक्षिकया पश्येयुः जानीयुः तत्प्रतीकारसमर्थाश्च स्युः। मन्त्रिणां मार्गदर्शनादेव राजा राज्यं प्रवर्धयेत्। राजा स्वस्य छिद्राणि परेभ्यः न दर्शयेत्।

**नास्य च्छिद्रं परःपश्येत् छिद्रेषु परमन्वियात्। गूहेत् कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः॥**

**मन्त्रग्राहा हि राज्यस्य मन्त्रिणो ये मनीषिणः। मन्त्र संहननो राजा मन्त्राङ्गानीतरे जनाः॥**

(शा.प.77.49 - 50) इति समग्रं राज्यनिर्वहणं मन्त्रिणामालोचनद्वारा एव सफलं भवितुमर्हतीति मुख्यं तत्त्वं ज्ञापयति भीष्माचार्यः।

रहस्यदूताः स्पशाः ये वर्तन्ते तेषां द्वारा प्रजाविषयकं लोकक्षेमं विदित्वा प्रजापेक्षां ज्ञात्वा तदनुसारं राज्ञा मन्त्रिभिः साकम् आलोच्य क्रियाश्चिन्तनीयाः भवन्ति।

**राज्यं प्रणिधिमूलं हि मन्त्रसारं प्रचक्षते। स्वामिनं चानुवर्तन्ते वृत्त्यर्थमिह मन्त्रिणः॥** (शा.प.77. 51)

मन्त्रिणः पञ्चविधकापट्यरहिता भवेयुः। **नित्यं पञ्चोपधाऽतीतैः मन्त्रयेत् सह मन्त्रिभिः।** पञ्चविधं कापट्यं किं रूपम्? तदुच्यते-- मनसा, वाचा, कर्मणा (शारीरिकेन), एषु द्वयेन त्रयेण वा इति पञ्चविधं भवितुम् अर्हति कापट्यम्। तत्रोदाहरणानि दुर्योधनः त्रिभिरपि मनोवाक्कायकर्मभिः लाक्षागृहदाहेन कापट्यमाचरितवान् । धृतराष्ट्रः मनसैव पाण्डवानामहितं चिन्तितवानिति। द्रोणवधे अश्वत्थामा हतः कुञ्जरः इति वचनेनैव प्रयुक्तं कापट्यम्। अश्वत्थामा सौप्तिकवधप्रकरणे कायिककापट्यमाचरितवानिति। भीमसेनेन कायिकेन वाचिकेन द्वयेनापि द्रोणवधप्रकरणे आचरितं कापट्यमिति पञ्चविधं कापट्यं प्रसिद्धम्। सन्मन्त्री तु एतैः पञ्चभिः कापट्यैः लिप्तो न स्यात् कदापि। तादृशैः मन्त्रिभिः राजा मन्त्रं कुर्यात्।

तत्र त्रयाणां मुख्यमन्त्रिणां त्रिविधान् अपि अभिप्रायान् श्रुत्वा तत्र स्वाभिप्रायञ्च संयोज्य सुविचिन्त्य च स्वकुलपुरोहितो ब्राह्मणो यः स्यात् तं निवेद्य तदभिप्रायं च जानीयात् राजा।

**धर्मार्थकामज्ञमुपेत्य पृच्छेत् युक्तो गुरुं ब्राह्मणमुत्तमार्थान्।**

**निष्ठा कृताऽनेन सदा सहस्स्यात् तं तत्र मार्गं प्रणयेदसक्तम् ॥**

इत्युक्तप्रकारेण ब्राह्मणाभिप्रायं पुनः मन्त्रिभिस्साकं विचिन्त्य तेषामपि सम्मतं ज्ञात्वा/गृहीत्वा ततः परं तत् अनहङ्कृतस्सन् विधिरूपेण प्रवर्तयेत्।

**एवं सदा मन्त्रयितव्यमाहुः ये मन्त्रतत्वार्थविनिश्चयज्ञाः।**

**तस्मात्त्वमेवं प्रणयेः सदैव मन्त्रं प्रजासङ्ग्रहणे समर्थम्॥** (शा.प.77. 55)

मन्त्रालोचनसन्दर्भे केऽपि जनाः तत्र न तिष्ठेयुः। विशिष्य –

**न वामनाः कुब्जकिरातखञ्जाः नान्धा जडास्त्रैणनपुंसकाश्च।**

**न चात्र तिर्यक् च पुरो न पश्चात् नोर्ध्वं न चाधः प्रचरेत कश्चित् ॥**

**आरुह्य पापस्तु तथैव शून्यं स्थलं प्रकाशं कुशकाशहीनम्।**

**वागङ्गदोषान् परिहृत्य तन्त्रं सम्मन्त्रयेन्मन्त्रमहीनकालम्॥** (शा.प.77. 56 - 57)

तन्नाम निर्जने स्थाने कुशदर्भादिवर्जिते प्रकाशयुक्ते स्थाने वागङ्गदोषान् परिहृत्य तन्नाम उच्चारणादिषु सम्भाव्यमानान् दोषान् परिहृत्य उचिते, निर्दिष्टे कालावकाशे करणीयं कार्यं सम्यगालोचयेत् इति एवं प्रकारेण मन्त्रिणः लक्षणानि, तच्चयनप्रकारान् , गुणदोषविमर्शनपूर्वकं कथं राजा राज्यहिताय उपयुञ्जीत इति भीष्माचार्यैः विषयेऽत्र सम्यङ् न्यरूपि। तदस्माकं सद्यस्केऽपि काले मार्गं दर्शयितुमर्हति इति सर्वत्र शम्।

# व्यासमहाभारते शान्तिपर्वणि मातापितृप्रशंसा, कार्याचरणकालक्रमश्च[31]

**सु. श्रीधर स्वामिनाथः**

विभागाध्यक्षः सहायकाचार्यः च

विवेकानन्दमहाविद्यालयः

तिरुवेडकं, मदुरै-६२५२३४

**उपोद्घातः**

विद् ज्ञाने इत्यस्मात् धातोः निष्पन्नं रूपं वेदः इति । अस्य अर्थः तु ज्ञानम्। तत् ज्ञानं द्विविधं भवति। लौकिकं वैदिकं च। जीवनार्थं यत् पठ्यते तत् लौकिकं ज्ञानम्। मोक्षप्राप्तये यत् उपकरोति तत् वैदिकं ज्ञानम्। एतत् ज्ञानमेव सत्यं स्थिरं च। वैदिकज्ञानं तु प्रायः वैदिकैः प्राप्यते, न तु लौकिकैः। लौकिकसामान्यजनानां मोक्षप्राप्तये इतिहासः विरचितः। "इतिहासपुराणं च सर्ववेदोपकारकम्"। अस्मिन् इतिहासे इदं अन्यतमं भवति व्यास- महाभारतम्। हेत्वन्तरमपि विद्यते। "स्त्रीप्रभृतीनां सर्वेषां जनानां वेदोक्तज्ञानप्राप्तये, महाभारतम् इति नाम्ना इतिहासरत्नं वेदव्यासेन कृपया कृतम्"। अनेन कारणेन महाभारतं वेदतुल्यं भवति। यद्यपि महाभारते बहवः विषयाः सन्ति, तत्र केचन अंशाः उच्यन्ते।

"मातापितृप्रशंसा, कार्याचरणकालक्रमश्च" इतीदं शीर्षकम् अधिकृत्य यथामति जिगदिषामि। अयं विषयः भवति, महाभारते शान्तिपर्वणि अष्टपञ्चाशदधिकद्विशततमाध्याये। महाभारते अष्टादश पर्वाणि सन्ति। तत्र अन्यतमं भवति शान्तिपर्व। तस्मिन् पर्वणि त्रिपञ्चाशदधिकत्रिशतमध्यायाः विद्यन्ते। ते राजधर्मपर्व, आपद्धर्मपर्व, मोक्षधर्मपर्व इति त्रिधा विभक्ताः। तेषु मोक्षधर्मपर्वणि चिरकारिकोपख्यानम् इत्यस्मिन् अध्याये उक्तं मातापितृप्रशंसा, किं कार्यं शीघ्रं कर्तव्यं, किं च चिरकालं चिन्तयित्वा कर्तव्यं इति विषयमधिकृत्य विस्तरेण पश्यामः।

---

[31] इदं शोधपत्रं पुण्यपत्तन नगरस्थ भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरेण चतुस्सप्तत्यधिक नवदशशततमे वर्षे मुद्रित "महाभारत- संहिता" इति ग्रन्थमाधारीकृत्य वर्तते।

**निबन्धः**

महाभारतयुद्धानन्तरं युधिष्ठिरः हस्तिनापुरस्य राजा अभूत्। श्रीकृष्णः युधिष्ठिरस्य राज्याभिषेकम् अकार्षीत्। युधिष्ठिरः धर्मविषयं ज्ञातुम् उद्युक्तः आसीत्। तदानीं भगवता श्री कृष्णेन उक्तम् अस्माकं पितामहः भीष्मः एव युक्तः पुरुषः, तं पृच्छतु इति। सद्यः सर्वे पाण्डवाः कृष्णेन सह शरतल्पे विद्यमानं भीष्मं प्रति गत्वा अप्राक्षुः। प्रथमं भीष्मश्रीकृष्णयोः परस्परं संभाषणम् आसीत्। युधिष्ठिरः तु भीष्मस्य पुरतः आगन्तुं लज्जितः , तस्य समीपे स्थित्वा प्रोक्तवान् यत् "बन्धुजनहननद्वारा प्राप्तराजलक्ष्मीं स्वीकर्तुं न इच्छामि, तदपेक्षया वनं गत्वा तपः कर्तुं इच्छामि" इति।

किन्तु भीष्मः युधिष्ठिरम् आहूय प्रोक्तवान् यत् "स्वार्थनिष्ठां विहाय, परोपकारचिन्तया राज्यपरिपालनं त्वया अवश्यं कर्तव्यम्। तदेव परमं तपः" इति। पुनरपि कृष्णः भीष्माय प्रोक्तवान् यत् भवन्तः कृपया युधिष्ठिराय धर्मोपदेशं कुर्वन्तु इति। भीष्मः तु "शरीरं त्यजामि। मम प्रज्ञा अपि विनश्यति, अतः धर्मोपदेशं कर्तुम् अशक्तः अस्मि" इति। श्रीकृष्णः प्रोवाच - "अहं युष्मभ्यं प्रज्ञोद्धारणाय दिव्यशक्तिं ददामि येन भवन्तः लोकहिताय, युधिष्ठिराय धर्मोपदेशं कुर्वन्तु, भवद्भिः क्रियमाणाः उपदेशाः वेदतुल्याः भविष्यन्ति" इति। युधिष्ठिरः ऐहिक-आमुष्मिकज्ञानप्राप्तये बहून् प्रश्नान् पृष्टवान्। तेषां मध्ये "कथं कार्यं परीक्ष्येत शीघ्रं वा चिरेण वा?" इति। अस्य प्रश्नस्य उत्तरदानसमये भीष्मः चिरकारि-उपाख्यानम् इति पुरातनं वृत्तान्तं प्रोवाच।

अस्य अध्यायस्य सारांशस्तु – "मनुष्यैः कथं कार्यम् आचरणीयम् " इति ।

आङ्गिरसकुले चिरकारी इति नाम्ना गौतमस्य पुत्रः आसीत्। सः सर्वाणि कार्याणि चिरं विचिन्त्य अकरोत् इति कारणात् चिरकारी इति नाम लब्धवान्। एकदा तस्य माता अहल्या व्यभिचारदोषयुक्ता आसीत्। कुपितः पिता गौतमः तु "जहीमां जननी"मित्युक्त्वा वनं जगाम। चिरकारी तथा इत्युक्त्वा कथं जननीं हन्मि इति चिन्तयामास। अस्मिन् समये चिरकारी मातापितृप्रशंसाः वर्णयति। ताः अस्मिन् लोके सर्वैः आचरणीयाः। यथा-

- पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणम्।
- मनुष्यः लोके स्त्रियं हत्वा सुखी न भवेत्। पितरम् अवज्ञाय प्रतिष्ठां न अवाप्नुयात्।
- शरीरपोषणात् , वेदाध्यापनात् पिता एव गुरुरग्र्यः। पिता यदाह स एव वेदेष्वपि सुनिश्चितः परो धर्मः।
- पितुः शासनकारिणः पातकान्यपि पूयन्ते, पितरि प्रीतिमापन्ने सर्वे देवाः नन्दन्ति।
- सुतस्नेहैः क्लिश्यन्नपि पिता पुत्रं न मुञ्चति।

**"पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणम्। अस्वतन्त्रं च पुत्रत्वं किं नु मां नात्र पीडयेत्॥**
**स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत्। पितरं चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात्॥**
**अनवज्ञा पितुर्युक्ता धारणं मातृरक्षणम्। युक्तक्षमावुभावेतौ नातिवर्तेत मां कथम्॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो. १०-१२)
**गुरुरग्र्यः परो धर्मः पोषणाध्ययनाद्धितः। पिता यदाह धर्मः स वेदेष्वपि सुनिश्चितः॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो.१६)
**तस्मात्पितुर्वचः कार्यं न विचार्यं कथंचन। पातकान्यपि पूयन्ते पितुर्वचनकारिणः॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो. १८)
**पिता स्वर्गः पिता धर्मः पिता परमकं तपः। पितरि प्रीतिमापन्ने सर्वाः प्रीयन्ति देवताः॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो. २०)
**मुच्यते बन्धनात् पुष्पं फलं वृक्षात् प्रमुच्यते। क्लिश्यन्नपि सुतस्नेहैः पिता स्नेहं न मुञ्चति॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो.२२)

अनन्तरं मातुः प्रशंसां वर्णयति

- यथा पावकजनने अरणि: हेतुः भवति, तथा पुंसां देहारणिः माता भवति।
- पुत्रः समर्थो वा असमर्थो वा, कृशो वा अकृशो वा माता तं पुत्रं विधानतः रक्षति।
- मातुः वियोगे एव मनुष्यः वृद्धः भवति, न तु वयोवार्द्धक्यात्।
- मातृसमा छाया नास्ति। मातृसमा गतिः नास्ति। मातृसमं त्राणं नास्ति। मातृसमा प्रिया लोके न विद्यते।

अस्मिन् अध्याये मातुः पर्यायनामानि प्रोक्तानि सन्ति। तद्यथा – शिशोः कुक्षौ संधारणात् धात्री। जननात् जननी इति। शिशोः शुश्रूषणात् शुश्रूः । अङ्गानां वर्धनात् अम्बा । वीरसूत्वेन वीरसूः इति महत्त्वपूर्ण-नामानि प्रोक्तानि। माता शिशोः अनन्तरं देहम्। तस्मात् कारणात् चेतनावान् पुरुषः मातरं न हन्यात्।

**अस्य मे जननी हेतुः पावकस्य यथारणिः। माता देहारणि: पुंसां सर्वस्यार्तस्य निर्वृतिः॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो.२४)
**समर्थं वासमर्थं वा कृशं वाप्यकृशं तथा। रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः॥**
**तदा स वृद्धो भवति यदा भवति दुःखितः। तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते॥**
**नास्ति मातृसमा छाया नास्ति मातृसमा गतिः। नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रपा॥**
**कुक्षिसन्धारणाद्धात्री जननाज्जननी स्मृता। अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः॥**
**शिशोः शुश्रूषणाच्छुश्रूर्माता देहमनन्तरम्। चेतनावान्नरो हन्याद्यस्य नासुषिरं शिरः॥**
(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो. २७-३१)

एतादृशात्युन्नतस्थाने स्थितां मातरं न हन्यात् इति निर्णयः चिरकारिणा कृतः। तपसि स्थितः गौतमोऽपि चिरकालानन्तरम् आश्रमं प्रत्यागतः। पश्चात्तापयुक्तः सः पत्न्याः हननं नोचितमित्यचिन्तयत्। अतिथिव्रतमास्थाय ब्राह्मणरूपेण त्रिलोकेशः पुरन्दरः मम आश्रमं संप्राप्तः। अहमपि वाग्भिः तं स्तुत्वा अर्घ्यपाद्याद्यतिथिसत्कारादीन् अकरवम्। अहं परवत्यस्मि , अतः तं पुरन्दरं प्रीणयितुं नाहं शक्नोमि इति तया भाषितं च । अत्र अनर्थे जाते स्त्रिया व्यतिक्रमः नास्ति। एवं न स्त्री, न चैवाहं, न त्रिदशेश्वरः च अपराधिनः । मुनयः "ईर्ष्याजं व्यसनं प्राहुः"। ईर्ष्यया आक्षिप्तः अहं दुष्कृतिसागरे मग्नोऽस्मि। मां त्रातुं कः समर्थः। इत्यचिन्तयत्।

किञ्च "जहीमां जननीमिति" मया पूर्वमेव उक्तम्। यद्यद्य मे पुत्रः चिरकारी स्यात् स मां पातकात् त्रायेत, इति विचिन्तयन् आश्रममागतः स गौतमः। तत्र चिरकारिं दृष्ट्वा "चिरकारिक भद्रं ते" इत्याशिषं चकार। पातकेभ्यश्च मां, तव मातरं, आर्जितं तपः, आत्मानमपि त्राहि इत्येवमादि-विविध-वाग्भिः विलपन्तं दुःखसन्तप्तं पितरं दृष्ट्वा परमदुःखितः चिरकारी शस्त्रं त्यक्त्वा मूर्ध्ना प्रणम्य उपचक्रमे। भूमौ दण्डवत् पतितं पुत्रं (लज्जया) शिलावत् स्थितां पत्नीं च दृष्ट्वा गौतमः विगतशोकः सञ्जातः। पुनश्च पुत्रमभिनन्द्य महाप्राज्ञः गौतमः इदं वचनमब्रवीत् –

**चिरेण मित्रं बध्नीयात् चिरेण च कृतं त्यजेत्। चिरेण हि कृतं मित्रं चिरं धारणमर्हति॥**

**रागे दर्पे च माने च द्रोहे पापे च कर्मणि।अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते॥**

**बन्धूनां सुहृदां चैव भृत्यानां स्त्रीजनस्य च। अव्यक्तेष्वपराधेषु चिरकारी प्रशस्यते॥**

(महाभारत. शान्तिपर्व. अध्याय २५८. श्लो. ६६-६८)

यथा गौतमसुतः चिरकारी विचिन्त्य कार्याणि कृतवान्, तथा त्वमपि विचिन्त्य कार्याणि कुरु। यदि पुरुषः विमृश्य प्रवर्तते, तर्हि न परितप्यते। वृद्धान् चिरं उपासीत। चिरम् अन्वास्य पूजयेत्। धर्मान् चिरं निषेवेत। अन्वेषणं चिरं कुर्यात्। इत्यादि सदुपदेशाः युधिष्ठिराय भीष्माचार्येण प्रोक्ताः।

**चिरं वृद्धानुपासीत चिरमन्वास्य पूजयेत्।चिरं धर्मान्निषेवेत कुर्याच्चान्वेषणं चिरम्॥**

**चिरमन्वास्य विदुषश्चिरं शिष्टान्निषेव्य च।चिरं विनीय चात्मानं चिरं यात्यनवज्ञताम्॥** (म. शा.२५८.७२-७३)

**उपसंहारः—**

महाभारते शान्तिपर्वस्थश्लोकेषु प्रतिपदं बहवोऽर्थास्सन्ति। तथापि मातापितृप्रशंसा, कार्याचरणकालक्रमश्च इत्यंशद्वयं स्वीकृत्य संग्रहेण यथामति अत्र उपस्थापितम्। अस्माकं जीवने यदि महाभारतस्थविषयान् सम्यग्ज्ञात्वा अनुसरेम, तर्हि वयं सर्वत्र विजयं प्राप्नुमः इत्युक्त्वा सद्गुरूणाम् अनुग्रहं संप्रार्थ्य विरमामि। इति शम् ॥

# महाभारते शान्तिपर्वणि मोक्षधर्मविचारः - एका विहङ्गमदृष्टिः

**Dr. HIRALAL DASH**
Asst.Professor of Sahitya
Dept. Of Sanskrit & Indian Culture
SCSVMV University , Enathur
Kanchipuram (Tamilnadu) 631 561.

संस्कृतवाङ्मयेऽस्मिन् रामायणं महाभारतञ्च अलौकिकं ग्रन्थरत्नद्वयमिति जानन्ति सर्वे। महाभारतं तु ज्ञानस्य सागरः वर्तते,यत्र इतिहासः,धर्मः,साहित्यं,राजनीतिः,भारतीयसंस्कृतिश्च प्राचुर्येण परिलक्ष्यते। तदर्थमेव अग्निपुराणमिव महाभारतमपि विश्वकोषरूपेण विज्ञायते।एतत्सहितं महाभारतस्य गौरवं स्मारं स्मारं विचिन्तकाः सुष्पष्टमेव समुद्घोषितवन्तः यत् – "**भारतं पञ्चमो वेदः** " इति। महाभारते यदस्ति तदन्यत्रापि सततं वर्तते। अत्र तु यन्नास्ति तदन्यत्रापि क्वचिन्नास्ति। तदर्थमुक्तं वर्तते यत् "**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**"[1] इति। महाभारतस्य आदिपर्वणि ग्रन्थरत्नस्यास्य महत्वं समुपवर्णयता महर्षिणा वेदव्यासेनोक्तं यत् महाकाव्यमिदं हिमालय इव तथा समुद्र इव रत्ननिधिः भवति। उक्तं यथा महाभारतस्य आदिपर्वणि –

**यथा समुद्रो भगवान्यथा च हिमवान्गिरिः।**
**ख्यातावुभौ रत्ननिधिः तथा भारतमुच्यते ॥**[2]

महाभारतग्रन्थरत्नस्य गौरवं तत्रैव आदिपर्वणि स्वयं महर्षिणा व्यासदेवेनोक्तं यत् –

**महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते ॥**[3]

**शोधपत्रस्यास्योद्देश्यम्**

जगत्यस्मिन् सर्वे मनुष्याः मोक्षं प्राप्तुमिच्छन्ति। परन्तु विचारणीयोऽयं विषयः यत् किं मोक्षप्राप्तिः सर्वेषामपि जीवानां कृते सम्भवति वा न वेति ? को नाम मोक्षः ? इति प्रश्नस्य समाधानं तावद्भवति – सर्वस्मादपि बन्धनात् अतिक्रमणं विधाय, जन्म-मृत्यु-सुख-दुःखादीन् अतिक्रम्य आनन्दस्य प्राप्तिरेव मोक्षः। मोक्षमार्गविषये यद्यपि वेदेषु,रामायणे,महाभारते,पुराणे च सन्ति नैके विचारास्तथापि महाभारते शान्तिपर्वणि मोक्षस्य तथा मोक्षधर्मस्य च विषये अनेके मार्गाः प्रदर्शितास्सन्ति। तत्सर्वमपि शोधपत्रेऽस्मिन् सोदाहरणं निरूपयितुमेव कश्चन प्रयासो विहितः। महाभारते मोक्षधर्मस्य वैशिष्ट्यं समुपवर्णयता महर्षिणा व्यासदेवेनोक्तं यत् –

**मोक्षधर्मेषु नियतो लघ्वाहारो जितेन्द्रियः। प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम्॥**[4]

मोक्ष एव पुरुषार्थचतुष्टये प्रमुखं स्थानम् आवहति। तस्मात् मोक्षप्राप्तये ये ये धर्माः महाभारते शान्तिपर्वणि निरूपितास्सन्ति तेषां सर्वेषां शोधपत्रेऽस्मिन् सोदाहरणं निर्देशं विधातुं प्रयते।

**मोक्षः मोक्षधर्मश्च**

कोशग्रन्थेषु मोक्षस्य तथा मोक्षधर्मस्य च विषये सविस्तरं व्युत्पत्तयः अर्थाश्च दृश्यन्ते। मोक्ष् इति धातोः भावे, करणार्थे च घञ्प्रत्यये कृते मोक्षशब्दस्य निष्पत्तिर्जायते। शब्दकल्पद्रुमानुसारं **मोक्ष्यते दुःखमनेन** [5] इति मोक्षः। अर्थात् येन माध्यमेन दुःखात् सततं निवृत्तिर्जायते स मोक्षः। मोक्ष इति पदस्य विविधाः पर्याया दृश्यन्ते अमरकोषे। यथा मुक्तिः, कैवल्यं, निर्वाणः, निःश्रेयसम् , अमृतम्, अपवर्गः, अपुनर्भव इति। उक्तं यथा तत्र कोशे –

**मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। मोक्षोऽपवर्गः** [6]

मोक्षधर्म इति पदे धर्मशब्दस्यार्थो भवति कर्तव्यम्, कर्म अथवा नियमः। अतः मोक्षधर्मशब्दस्यार्थो भवति तानि कर्तव्यानि, कर्माणि, नियमाश्च येषां परिपालनं सांसारिकबन्धनात् मुक्त्यवाप्तये कर्तव्यम्। अर्थात् मोक्षधर्मः नाम तथा कर्तव्यानि, कर्माणि, नियमाश्च भवन्ति येषां नियमानां कर्मणां करणेन मनुष्यः सांसारिकबन्धनात् मुक्तिपथं प्राप्नोति।

रामायणे, महाभारते, पुराणे, काव्येषु, अन्यग्रन्थेषु च यद्यपि शताधिकान्युदाहरणानि मोक्षधर्मस्य वर्तन्ते तथाप्यत्र किञ्चित् प्रस्तूयते।

**वेदेषु मोक्षधर्मः**

वेदेषु अमृतम् तथा अमृतत्त्वम् इत्यनयोः शब्दयोः प्रयोगः दृश्यते। येन मोक्षशब्दस्यार्थो अभिव्यज्यते। वेदे मोक्ष इति पदस्य कृते **परमं पदम्** इत्यपि नाम दत्तम्। उक्तं हि तत्र –

**तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।** [7]

वेदे मुनिभिः ऋषिभिश्च मृत्योः, दुःखात् तथा बन्धनात् च मुक्तिमवाप्तुं प्रार्थना कृताऽवलोक्यते , येन मोक्षमार्गः सुस्पष्टीभवति। उक्तं यथा –

**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥** [8]

एवञ्च ब्राह्मणग्रन्थेषु , उपनिषत्सु मोक्षधर्मस्य परमपुरुषार्थरूपेण निरूपणं कृतमवलोक्यते।

**वाल्मीकिरामायणे मोक्षधर्मविचारः**

लौकिकसंस्कृतस्य प्रप्रथमकाव्ये रामायणे मोक्षस्य तथा मोक्षधर्मस्य विषये बहुधा चर्चा कृतावलोक्यते। काव्येऽस्मिन् मोक्षस्य कृते ब्रह्मलोकः, निर्वाणः, अमृतम् , निःश्रेयसम् इत्यादीनां पदानां प्रयोगो दृश्यते। रामायणे बालकाण्डे मोक्षमार्गं प्रदर्शयितम् उक्तं यत् –

**दशवर्षसहस्राणि दशवर्षशतानि च। रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति॥**[9]

**महाभारते शान्तिपर्वणि मोक्षधर्मविचारः**

महाभारते शान्तिपर्वणि मोक्षस्य मोक्षधर्मस्य च विषये विस्तरेण निरूपणं कृतमवलोक्यते। तत्र 168 अध्यायात् 353 (पञ्चाशीत्युत्तरैकशत-अध्यायेषु - 185) पर्यन्तम् मोक्षधर्मपर्व इत्युच्यते। यत्र मोक्षधर्मस्य निरूपणं सुस्पष्टं परिलक्ष्यते। अपि च तस्मिन् मोक्षधर्मपर्वणि शुभाशुभकर्मणः परिणामः, संसारचक्रम् , जीवात्मनः तथा मुक्तेः साधनस्य च वर्णनं कृतमवलोक्यते। शान्तिपर्वान्तर्गतमोक्षधर्मपर्वणि दुःखनिवृत्तेः मार्गः, बन्धनस्य नैकानि कारणानि तथा ततः निवृत्तेः विविधोपायाः च समुपवर्णितास्सन्ति। तत्र सनातनमोक्षधर्मः अतीव दुष्करो भवतीति प्रतिपादितः। उक्तं यथा –

**अहो हि दुरनुष्ठेयो मोक्षधर्मः सनातनः। यं हित्वा देवताः सर्वा हव्यकव्यभुजोऽभवन् ॥**[10]

मोक्षधर्मपर्वणि मोक्षधर्मस्य वैशिष्ट्यं दुर्लभत्वं च वर्णयितुमेव उक्तं यत् सहस्रेषु कश्चन एकः एव विरलः मोक्षविषये बुद्धिम् आदधाति। उक्तं यथा –

**सहस्रेषु नरः कश्चिन्मोक्षबुद्धिं समाश्रितः। दुर्लभत्वं च मोक्षस्य विज्ञाय श्रुतिपूर्वकम् ॥**[11]

**मोक्षेच्छायाः हेतुः**

मानवानां मनसि प्रारम्भात् मोक्षस्याकाङ्क्षा किमर्थम् आगतेति शङ्का जायते। किं सः मानवः जगति सुखेन जीवितुं नैव शक्नोति। प्रश्नस्यास्य समाधानं शान्तिपर्वान्तर्गते मोक्षधर्मपर्वणि कृतं वर्तते। तत्रोक्तं जगत्यस्मिन् सर्वे प्राणिनः सदा दुःखेन ग्रस्तास्सन्ति। तत्र कारणम् अयं ममेति भावना न , अपि तु सर्वा पृथिवी ममेति भावना। अतः संसारस्य असारतायां तथा दुःखोपरि ध्यानं ददता मनुष्येण सदा तस्मात् दुःखात् निवृत्तेः उपायाः चिन्तनीयाः। उक्तं यथा –

**पश्य भूतानि दुःखेन व्यतिषिक्तानि सर्वशः। आत्मापि चायं न मम सर्वा वा पृथिवी मम॥**[12]

**नष्टे धने वा दारे वा पुत्रे पितरि वा मृते। अहो दुःखमिति ध्यायञ्शोकस्यापचितिं चरेत् ॥**[13]

शुभकर्मणा जीवः देवत्वं प्राप्नोति, शुभाशुभमिश्रितकर्मणा सः मानवजन्म प्राप्नोति,तथा अशुभकर्मणा सः अधमयोनिं प्राप्नोति। तासु योनिषु जीवः मृत्युना तथा जरादुःखेन सदा पीडितस्सन्

कष्टमनुभवति। संसारेऽस्मिन् येन जन्म लब्धं सः सन्तापाग्नौ सदा प्रज्वलति। अतः तस्मात् दुःखात् सदा निवृत्तिस्तु मानवजीवनस्य परमलक्ष्यं भवेत्। प्रसङ्गेऽस्मिन् उक्तं यथा-

**शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषम्। अशुभैश्चाप्यधोजन्म कर्मभिर्लभतेऽवशः॥**

**तत्र मृत्युजरादुःखैः सततं समभिद्रुतः। संसारे पच्यते जन्तुस्तत्कथं नावबुध्यसे ॥**[14]

जीवने सुखापेक्षया दुःखस्याधिक्यं वर्तते। तेषां दुःखानां मूलं किमिति जिज्ञासायां मोक्षधर्मपर्वणि उक्तं वर्तते यत् मोहः तथा इन्द्रियाणां विषयेषु आसक्तिरेव दुःखस्य कारणम्। अर्थात् इन्द्रियाणि यत्र आसक्तानि भवन्ति तस्य अलाभे दुःखं जायते। उक्तं यथा –

**सुखाद्बहुतरं दुःखं जीविते नात्र संशयः। स्निग्धत्वं चेन्द्रियार्थेषु मोहान्मरणमप्रियम् ॥**[15]

इन्द्रियाणामासक्तिवशात् मनुष्यः तत्सर्वं भुङ्क्ते। तेन पुनः अधिकरूपेण कामनायां तृष्णायां वा वृद्धिर्जायते। तृष्णाग्रस्तः मनुष्यः कामोपभोगं कुर्वन् तृप्तिं नैव प्राप्नोति। अनुस्यूततया सः मनुष्यः विषयस्य ग्रहणं करोति। क्वचित् मृत्युं तथा प्राप्नोति यथा व्याघ्रः मृगं स्वीकृत्य भोक्तुं चलतीति। प्रसङ्गेऽस्मिन् उक्तं यथा –

**संचिन्वानकमेवैनं कामानामवितृप्तकम्। व्याघ्रः पशुमिवासाद्य मृत्युरादाय गच्छति॥**[16]

एवञ्च महाभारते शान्तिपर्वणि क्षुत्-पिपासा-रोगादीनां शारीरिकदुःखानां तथा विषयाशक्तिः, ईर्ष्या, द्वेषः,मोहः इत्यादीनां मानसिकदुःखानां चर्चा उपलभ्यते। एतेभ्यः विविधदुःखेभ्यः निवृत्तिरेव मानवानां परमलक्ष्यं भवेदिति शान्तिपर्वणि मोक्षधर्मेषु निरूपितं वर्तते।

**बन्धनस्य कारणानि**

महाभारते शान्तिपर्वणि बन्धनस्य कारणरूपेण अज्ञाने तथा जीवस्य शुभाशुभकर्मोपरि ध्यानं दत्तं वर्तते। बन्धनं नाम इह संसारे गमनागमनस्य चक्रम्। तदत्र किञ्चित् प्रस्तूयते।

**(क) अज्ञानम्**

बन्धनस्य प्रमुखं कारणं भवति जीवात्मनः विषये विद्यमानम् अज्ञानम्। तेनैव अज्ञानेन वशीभूतो मानवः विषयासक्तस्सन् तथा मोहेनासक्तस्सन् दुःखान्निवृत्तिं नैव प्राप्तुमर्हति।तस्य बुद्धिः मोहजालग्रस्ता सती विचलिता भवति ,तेन इहलोके परलोके च सदा दुःखभोगं करोति सः। उक्तं यथा–

**अविज्ञानाच्च मूढात्मा पुनः पुनरुपद्रवन्। प्रेत्य जातिसहस्राणि मरणान्तान्युपाश्नुते ॥**[17]

**सक्तस्य बुद्धिश्चलति मोहजालविवर्धिनी। मोहजालावृतो दुःखमिह चामुत्र चाश्नुते ॥** [18]

विषयाणामुपरि अनुराग एव प्राणिनां बन्धनरज्जुः भवति। यथा कोशकारः ( रेशम का कीडा) बहुभिः आत्मजसूत्रैः स्वयं बद्धस्सन् मोहवशात् स्वस्य नाशं करोति, तथैव प्राणिनोऽपि मोहाज्ञानवशात् आत्मस्वरूपं ज्ञातुं नैव शक्नुवन्ति, मृत्युञ्च प्राप्नुवन्ति। उक्तं यथा –

**निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः।** [19]

**संवेष्ट्यमानं बहुभिर्मोहतन्तुभिरात्मजैः। कोशकारवदात्मानं वेष्टयन्नावबुध्यसे ॥** [20]

कश्चन मत्स्यः यथा स्वमूर्खताकारणेन आत्मानं जलात् पृथक् नैव चिन्तयति ,तथैव पुरुषोऽपि अज्ञानवशात् प्रकृतशरीरं आत्मनः पृथक् नैव जानाति। उक्तं हि –

**मत्स्योऽन्यत्वं यथाज्ञानादुदकान्नाभिमन्यते। आत्मानं तद्वदज्ञानादन्यत्वं नैव वेद्म्यहम्॥** [21]

(ख) **शुभाशुभकर्म**

जीवानां स्वस्य शुभाशुभकर्म बन्धनस्य कारणं भवति।शान्तिपर्वण्युक्तं यत् इयं पृथिवी जीवानां कर्मभूमिरस्ति। यत्र जीवः स्वक्रियमाणकर्मभिः सदा फलं प्राप्नोति। सः च जीवः पूर्वस्मिन् जन्मनि यत्नपूर्वकं यत् शुभाशुभं कर्म अकरोत् जननीजठरे प्रविष्टः सन् , तस्य शुभाशुभकर्मणः फलं भोक्तुं प्रारभते। उक्तं यथा शान्तिपर्वणि –

**कर्मभूमिरियं लोक इह कृत्वा शुभाशुभम्। शुभैः शुभमवाप्नोति कृत्वाशुभमतोऽन्यथा ॥**[22]

**सर्वः स्वानि शुभाशुभानि नियतं कर्माणि जन्तुः स्वयम्।**

**गर्भात्संप्रतिपद्यते तदुभयं यत्नेन पूर्वं कृतम्॥** [23]

**मोक्षस्याधिकारी**

जगतः दुःखेन परिप्लुताः एवं जन्म-मरणचक्रे निपतिताः मानवाः ततः निवृत्त्यर्थं मोक्षस्याकांक्षां तु कुर्वन्ति। परन्तु विचारणीयोऽयं प्रश्नः यत् किं सर्वेऽपि मानवाः मोक्षस्याधिकारिणः सन्ति वा न वेति ? महाभारते शान्तिपर्वणि तेषां विषये निरूपणं वर्तते। के प्रकृतरूपेण मोक्षस्याधिकारिणः भवन्तीति ? तदत्र किञ्चिन्निरूप्यते।

व्रतधारी स्नातकः, तत्त्वज्ञानस्य जिज्ञासुः, प्रशान्तः, तथा अनुगतशिष्य एव एतस्य मोक्षधर्मस्याधिकारी भवतीति मोक्षधर्मपर्वण्युक्तं वर्तते। एतद्वैपरीत्येन अप्रशान्तः, अतपस्वी, अदान्तः,

अधर्मी एते मोक्षशास्त्रस्योपदेशान् कदापि प्राप्तुं न शक्नुवन्तीति। उक्तं हि – **तदिदं नाप्रशान्तस्य नादान्तायातपस्विने। नावेदविदुषे वाच्यं तथा नानुगताय च ॥** [24]

ज्ञानस्य स्वरूपमिदं मोक्षशास्त्रं दध्नः नवनीतं तथा काष्ठादग्निरिव ज्ञानिनं प्रति प्रकटितं वर्तते, यस्य विषयः अतीव महान् तथा गुप्तोऽस्ति। उक्तं यथा –

**नवनीतं यथा दध्नः काष्ठादग्निर्यथैव च। तथैव विदुषां ज्ञानं पुत्रहेतोः समुद्धृतम् ॥** [25]

महाभारते शान्तिपर्वणि वर्णितं यत् जलप्रवाहे प्रवहन् मनुष्यः क्वचित् निमज्जति, क्वचिदुपरि आयाति, क्वचिच्च नौकामवलम्बते, तथैव संसाररूपस्रोतसः मध्ये निमज्जन् यदि मानवः कैवल्यप्राप्तिमिच्छति तदा ज्ञानरूपनौकायाः मनसा अवलम्बनं सततं कुर्यादिति शान्तिपर्वणि निरूपितमस्ति। उक्तं हि –

**अथ चेद्रोचयेदेतद्द्रुह्येत मनसा तथा। उन्मज्जंश्च निमज्जंश्च ज्ञानवान्प्लवमान्भवेत्॥** [26]

यः शिष्यभावेन गुरोः समीपं मोक्षविषयकजिज्ञासया याति स एव ज्ञानप्राप्तेः अधिकारी भवति। शान्तिपर्वणि शिष्यभावेन आगतस्य " **स्यूमरश्मेः**" वर्णनमायाति यः मोक्षविषयकजिज्ञासया कपिलमुनेः समीपमगात्। उक्तं यथा –

**तथ्यं वदस्व मे ब्रह्मन्नुपसन्नोऽस्म्यधीहि भोः। यथा ते विदितो मोक्षस्तथेच्छाम्युपशिक्षितुम्॥** [27]

एवञ्च मोक्षस्याधिकारिविषये शान्तिपर्वणि बहूनि तथ्यानि निरूपितानि सन्ति।

**मोक्षप्राप्तेः साधनानि**

महाभारते शान्तिपर्वणि मोक्षप्राप्तेः अनेकानि साधनानि वर्णितानि सन्ति। तानि भवन्ति गुरुपदेशपूर्वकम् आत्मज्ञानम् , निष्कामकर्म,भगवद्भक्तिः, इन्द्रियसंयमरूपी योगः, धर्माचरणञ्च। तेषां परिपालनेन मनुष्यः सुखदुःखरूपबन्धनात् मुक्तिं प्राप्नोति। तदत्र किञ्चिन्निरूप्यते।

**(क) आत्मज्ञानम्**

मोक्षप्राप्तेः साधनेषु सर्वप्रथमं सर्वप्रमुखं च साधनं भवति ज्ञानम्। यत् विविधस्थलेषु अध्यात्मज्ञानम् ,आत्मज्ञानम् केवलज्ञानम् , , ब्रह्मज्ञानम् इत्यादिरूपेण उच्यते। शान्तिपर्वणः अनुसारं आत्मज्ञानं तादृशं साधनं भवति – येन जीवः जन्ममरणरूपदुर्गमसंसारसागरात् सन्तरति। उक्तं यथा,

**ज्ञानान्मोक्षो जायते पुरुषाणां नास्त्यज्ञानादेवमाहुर्नरेन्द्रः।**

**तस्माज्ज्ञानं तत्त्वतोऽन्वेषितव्यं येनात्मानं मोक्षयेज्जन्ममृत्योः॥** [28]

**(ख) निष्कामकर्म –**

शान्तिपर्वणि मोक्षस्य साधनरूपेण कर्मणः उपरि ध्यानं दत्तं वर्तते। यद्यपि मानवस्य कर्म एव बन्धनस्य कारणं भवति तथापि मनुष्यः शुभाशुभकर्मणः अनुरूपमेव फलं भुङ्क्ते। उक्तं यथा -

**कर्मभूमिरियं लोके इह कृत्वा शुभाशुभम्। शुभैः शुभमवाप्नोति कृत्वाशुभमतोऽन्यथा॥**[29]

(ग) **भगवद्भक्तिः**

ज्ञानेन निष्कामकर्मणा सह भगवतः वासुदेवस्योपरि अनन्या भक्तिरपि मुक्तिप्रदायिनी भवतीति शान्तिपर्वण्युक्तम्। भगवान् स्वयं नारदमुनिं प्रति कथयति लोकेऽस्मिन् मम भक्ताः मयि प्रविष्टाः सन्तः मुक्तिं प्राप्नुवन्ति। ये पुरुषाः स्थिरबुध्या " **नमो भगवते** " वचनमिदं सदा श्रृण्वन्ति स्मरन्ति च, ते सदा बलरूपेण युक्ताः रोगरहिताश्च भवन्ति। आतुरः पुरुषः रोगात् तथा बद्धपुरुषः बन्धनात् मुक्तिं प्राप्नोति। उक्तं यथा –

**यश्चेदं श्रृणुयान्नित्यं यश्चेदं परिकीर्तयेत्। नमो भगवते कृत्वा समाहितमना नरः ॥**

**भवत्यरोगो द्युतिमान्बलरूपसमन्वितः। आतुरो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥**[30]

एवञ्च महाभारतान्तर्गतशान्तिपर्वणि मोक्षधर्मपर्वणि मोक्षप्राप्तेः नैकानि साधनानि सुचर्चितानि वर्तन्ते। तेषां ज्ञानाय सर्वैरपि मनुष्यैः सततं यत्नः कर्तव्यः।

**उपसंहारः**

यद्यपि महाभारते शन्तिपर्वणि नैकानां विषयाणामुपरि नैकानि वर्णनानि सन्ति तथापि सूक्ष्मं विचारयामश्चेत् मोक्षधर्मपर्वान्तर्गते मोक्षस्य मोक्षधर्मस्य च विषये सम्यक् निरूपणं परिलक्ष्यते। शान्तिपर्वणि स्वतन्त्ररूपेण मोक्षधर्मपर्व वर्तते, यत्र बहुषु शताधिकेष्वध्यायेषु मोक्षमार्गस्य तथा मोक्षधर्मस्य विषये चर्चा कृतावलोक्यते। मानवानां यत् परमं लक्ष्यं भवति मोक्षः, तदुपरि विस्तरेण विचारः शान्तिपर्वान्तर्गतमोक्षधर्मपर्वणि यथा व्यासदेवेन वर्णितं न तथाऽन्येन कुत्रापि काव्ये ग्रन्थे वा। मानवेन सततं तेषां मोक्षधर्मस्वरूपाणां ज्ञानपूर्वकं तस्मिन् यत्नः कर्तव्यः। येन कलियुगेऽस्मिन् सर्वे मनुष्याः सदा सुखेनैव कालयापनं करिष्यन्तीति नात्र सन्देहावकाशः।

******

## पादटिप्पणी

1. आदि 56.33
2. आदि 56.27
3. आदि 1.109
4. महा.शान्ति.मो.ध.प- 222.2
5. श.क.द्रु पृ – 786
6. अ.को – 1.5.4
7. ऋ.वे 1.22.20
8. ऋ.वे 7.59.12
9. वा.रा . बाल.1.67
10. शान्ति. मो.ध.प 327.7
11. मो.ध.प 290.39
12. मो.ध.प 168.13
13. मो.ध.प 168.7
14. मो.ध.प 316. 24 – 25
15. मो.ध.प 317.16
16. मो.ध.प 317.24
17. मो.ध.प 296.47
18. मो.ध.प. 316.9
19. मो.ध.प 316.37
20. मो.ध.प 316.28
21. मो.ध.प 295.25
22. मो.ध.प 185.19
23. मो.ध.प 287.43(श्लोकस्य पूर्वार्धः)
24. मो.ध.प 268.16
25. मो.ध.प 238.15
26. मो.ध.प 228.1
27. मो.ध.प 261.61
28. मो.ध.प 308.84
29. मो.ध.प 185.19
30. मो.ध.प 327.102-103

## शब्दसङ्केताः

1.आदि – आदिपर्व
2.महा.शान्ति.मो.ध.प.–महाभारते शान्तिपर्वणि मोक्षधर्मपर्व
3.श.क.द्रु – शब्दकल्पद्रुमः
4.पृ – पृष्ठम्
5.अ.को – अमरकोषः
6.ऋ.वे – ऋग्वेदः
7.वा. रा – वाल्मीकिरामायणम्
8.मो.ध.प – मोक्षधर्मपर्व

## सहायकग्रन्थाः

1. अमरकोषः
2. महाभारतम्
3. शब्दकल्पद्रुमः
4. ऋग्वेदः
5. वाल्मीकिरामायणम्
6. महाभारत के शान्तिपर्व में धर्म का स्वरूप

# दण्ड(राज)नीतिसूत्रम्

(शान्तिपर्वान्तर्गतसूत्राध्यायमाधारीकृत्य)

डा. सन्तोषकुमारः जोषि

शोधसहायकः, संस्कृत अकाडमी,

उस्मानियाविश्वविद्यालयः, हैदराबाद्

**शोधपत्रसंक्षिप्तसारः**

अस्माकं भारतदेशः अनादिकालात् ज्ञान-विज्ञानयोः जन्मस्थानम् इति कीर्त्यते । भारतीयानां ज्ञानम् अनादिः अनन्तञ्च भवति। प्राचीनऋषिभिः दर्शिता अथवा रचिता ग्रन्थाः सहस्रशः अस्माकं गैर्वाण्यामुपलभ्यन्ते। दौर्भाग्यवशात् लभ्यमानग्रन्थापेक्षया नष्टसंख्यैवाधिका इति कथने न काऽपि विप्रत्तिपत्तिः सम्भवति। यतः विभिन्नशास्त्रग्रन्थावलोकनेन तेषां प्रादुर्भावविकासपरिशीलनेन च ज्ञायते अस्माकम्। इदानीम् अस्माभिः दृश्यमानस्वरूपम् कियत् इति । अस्माकं संस्कृतभाषायां विभिन्नसम्प्रदायीया विविधशास्त्रग्रन्थाः सूक्ष्मरूपेणोपलभ्यन्ते। यथा नाट्यशास्त्रादिषु प्राचीनपरम्परा तेषां ग्रन्थानां स्वरूपम् उक्तं, तथैव राजनीतिशास्त्र-ग्रन्थपरम्परा एवं ग्रन्थस्वरूपमपि शुक्रनीत्यादिग्रन्थेषूक्तम्। एवम् अत्र विशेषतया महाभारते भगवता व्यासेन शान्तिपर्वान्तर्गतराजधर्मानुशासनपर्वणि एकोनषष्टितमाध्याये **स्वायम्भुवनीति** नाम्ना राजनीतिशास्त्रग्रन्थपरम्परा एवं ग्रन्थकर्तृपरम्परा ग्रन्थस्वरूपक्रमश्च निर्देशितः। अत्र अध्यायान्ते सूत्राध्यायः इति निर्दिष्टः, शान्तिपर्वणि न कस्याप्यध्यायस्य एतादृशनाम न दृश्यते । सूत्रमिदं कस्य इति प्रश्ने पृष्टे सम्पूर्णराजनीतेः सूत्रमिति वक्तुं शक्यते अथवा शान्तिपर्वणः सूत्रमिति वा वक्तुं शक्यते । यः कोऽपि विषयः अस्माभिः न ज्ञायते अथवा न दृश्यते चेत् सः विषयः नास्ति इति मन्तुं अथवा वक्तुं न शक्यते। वैदेशिकैः अन्यबुद्ध्या यदुच्यते तदेव वयं विश्वसिमः। यतः यं कमपि विषयं सप्रमाणं निरूपितुं प्रयत्नः अस्माभिः न क्रियते। एतादृशविषयनिरूपणार्थं द्रढीयान् प्रयत्नः कर्तव्यो भारतीयैः। महाभारतस्य शान्तिपर्वणि एकोनषष्टितमाध्यायस्य विषयविवरणम् , तदाधारेण तत्रत्य विषयविश्लेषणम् इत्यादि विषयाः पत्रेऽस्मिन् चर्चिष्यन्ते ।

**उद्देश्यम् -** भारतीयराजनीतिशास्त्रेषु प्राचीनराजनीतिः अथवा दण्डव्यवस्था कथमस्तीति निरूपणमेव अस्य शोधपत्रस्य मुख्योद्देश्यम् एवं प्रयोजनञ्च।

**मूलसिद्धान्तपरिकल्पना**

प्राचीनभारतीयराज्याङ्गव्यवस्थानिर्माणं अत्यन्तशास्त्रसम्बद्धम् एवं विमर्शनात्मकज्ञानसम्पन्नञ्च दृश्यते । एतदतिरिच्य अन्यथा कर्तुं नैव शक्यते इति निरूपयितुं शक्यम्।

**साहित्यानुशीलनम्**

राजनीतिविषयकसाहित्यम् गैर्वाण्यां विस्तारतया उपलभ्यते। ते च ग्रन्थाः समग्रतया स्पष्टतया राज्याङ्गस्वरूपनिरूपकाः सन्ति। एते ग्रन्थाः आधुनिकप्रजास्वाम्यव्यवस्थायाः उपदेशकारकाः अपि भवन्ति। एतेषु राजनीतिग्रन्थेषु केचन ग्रन्थाः सम्पूर्णराज्याङ्गव्यवस्थनिरूपकाः सन्ति। केचन केवलं (व्यवहार)न्यायव्यवस्था-सम्बद्धग्रन्थाः सन्ति । एतेषां संख्या शताधिका एव। ते च -

**मनुस्मृतिः**

अत्र द्वादशाध्यायाः सन्ति । एष्वध्यायेषु युगधर्माः, वर्णधर्माः,आश्रमधर्माः, आचारः, विधिनिषेधाः, अत्र विशेषतया राज्याङ्गसम्बद्धविषयाः सप्तमाध्याये स्वाम्यमात्यादिसप्ताङ्गानि, दण्डयात्रा, सेनाव्यूहाः इत्यादिविषयाः, एवं व्यवहारः, अपराधाः एवं दण्डः इत्यादिविषयाः अत्र चर्चिताः।

**याज्ञवल्क्यस्मृतिः**

अस्मिन् ग्रन्थे आचाराध्यायः, व्यवहाराध्यायः, प्रायश्चित्ताध्यायः इति अध्यायत्रयं विद्यते। एष्वध्यायेषु चतुर्विधाश्रमधर्माः, राजधर्माः, स्वाम्यामात्यादिसप्ताङ्गानि, सामदानादिचतुर्विधोपायाः, सन्धिविग्राहादिषड्विधोपायाः, द्वितीये व्यवहारे ऋणादान, लेख्य, साक्षि, दायविभाग सीमादिविषयाः चर्चिताः। एवं सर्वविधपापानि तेषां प्रायश्चित्तानि च उक्तानि ।

**शुक्रनीतिसारः**

शुक्रनीतिसारे पञ्चाध्यायाः सन्ति। प्रथमेऽध्याये सप्ताङ्गनिरूपणम् , राज्ञः दिनकृत्यम् , कर्तव्यानि, द्वितीयेऽध्याये इतराधिकारिणां लक्षणानि, तृतीयेऽध्याये विहिताविहतधर्माः इत्यादिविषयाः, चतुर्थेऽध्याये दण्डलक्षणम् , नैकविधापराधानां दण्डाः, कोशस्वरूपं, एवं व्यवहारविषयः, दुर्गस्वरूपं, बलम् , युद्धं, व्यूहादिभेदाः सन्धि-विग्रहादिषड्गुणाः प्रस्ताविताः।

**कौटलीयम् अर्थशास्त्रम्**

अर्थशास्त्रे पञ्चदश प्रकरणानि विद्यन्ते । एषु प्रकरणेषु क्रमेण प्रथमे विद्यासमुद्देश्यः, अमात्योत्पत्तिः, मन्त्राधिकारः, द्वितीये जनपदनिवेशः, दुर्गविधानम् विविधाधिकारिणः, तृतीये व्यवहारः, पञ्चमे कोशाभिसंहरणम् , सप्तमे षाड्गुण्यम् , अष्टमे प्रकृतिव्यसनवर्गः, नवमे यात्राकालः, दशमे कूटयुद्धादिविषयाः, एकादशे दण्डः, द्वादश-त्रयोदश-चतुर्दश-पञ्चदशप्रकरणेषु मन्त्रयुद्धम् , पर्युपासनकर्म, परघातप्रयोगः, तन्त्रयुक्तयः इत्यादिविषयाः सविशदं स्पष्टं प्रतिपादिताः कौटिल्येन ।

**राजनीतिसूत्राणि**

अत्र अष्टौ अध्यायाः सन्ति। एषु सुराज्यसम्पादनस्य सर्वसुखहेतुता, सन्मन्त्रणावश्यकता, मित्रसंग्रहः, षाड्गुण्यं, दुर्व्यसनानि इत्यादिविषयाः वर्णिताः।

**नीतिवाक्यामृतम्**

अस्य ग्रन्थस्य कर्ता सोमदेवः। अत्र धर्मसमुद्देशः, अर्थसमुद्देशः, कामसमुद्देशः, अरिषड्वर्गसमुद्देशः, विद्यावृद्धसमुद्देशः, आन्वीक्षिकीसमुद्देशः, वार्ता-चार-स्वामि-अमात्य-जनपदसमुद्देशः, कोश-दुर्ग-मित्रसमुद्देशः, व्यवहारसमुद्देशः, युद्धसमुद्देशः प्रकीर्णसमुद्देशः इत्यादिविषयाः सन्ति ।

**कामन्दकनीतिसारः**

ग्रन्थेऽस्मिन् 36 प्रकरणानि विद्यन्ते । सप्ताङ्गव्यवस्था एवं षड्विधोपायाः प्रधानतया उक्ताः। एतदङ्गत्वेन विद्याप्रकरणम् , सप्तव्यसनानि, वर्णाश्रमव्यवस्था, दण्डव्यवस्था, सेनाबलम् , कूटयुद्धनीतिः, व्यूहरचनम् , राजपुत्रसंरक्षणं, यात्राप्रकरणम् इत्यादिविषयाः अत्र उल्लिखिताः।

**केवलव्यवहारविषयबोधकग्रन्थाः**

व्यवहारकल्पतरुः- लक्ष्मीधरः(1175) धर्मरत्नदायभागः- जीमूतवाहनः(1200) स्मृतिसार-दायभागः - हरिनाथः (1300) व्यवहाररत्नाकरः, विवादरत्नाकरः- चण्डेश्वरः(1320) विभागसारः- विद्यापतिठक्कुरः(1425) विवादचन्द्रः-मिसरूमिश्रः(1450) दण्डविवेकः- वर्धमानोपाध्यायः(1430) विवादचिन्तामणिः- वाचस्पतिमिश्रः (1450) दायसारः- महेशठक्कुरः(1497) सरस्वतीविलासः- प्रतापरुद्रदेवः (1550) स्मृतिकौमुदी - देवनाथः, प्रमाणवल्लभः - नरसिंहः(1660) वीरमित्रोदयः (व्यवहारप्रकाशः) (1600) इत्यादिग्रन्थाः अस्माभिः दृश्यन्ते ।

एवम् अन्यत्र स्मृतिग्रन्थेषु, एवं पुराणेषु , रामायणे एवं महाभारते इत्यादिग्रन्थेषु प्रसङ्गानुसारं राजनीतिसम्बद्धाः विषयाः उट्टङ्किताः सन्ति ।

अन्ये च ग्रन्थान्तरेषु विद्यमानान् विषयान् संगृह्य रचिताः निबन्धाः ग्रन्थाः सन्ति। ते च मित्रमिश्रविरचितः– वीरमित्रोदयः, लक्ष्मणशास्त्रि जोषि विरचितः – धर्मकोशः, स्मृतिचन्द्रिका इत्यादि ग्रन्थाः अस्माकम् उपलभ्यन्ते ।

**दण्ड(राज)नीति शब्दव्युत्पत्तिः निर्वचनञ्च**

दण्डनीतिः (स्त्री) दण्डेन नीयते या । यद्वा दण्डो नीयतेऽनयेति । नी कर्मणि करणे वा क्तिन् ।[i]

**दण्डेन नीयते चेदं दण्डं नयति वा पुनः। दण्डनीतिरितिख्याता त्रील्लोकानतिवर्तते ॥**[2]

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति । दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥**[3]

**दण्डं संरक्ष्यते दण्डस्तथैवार्थं नराधिप । कामं च रक्ष्यते दण्डस्त्रिवर्गो दण्ड उच्यते ।**

**दण्डेन रक्ष्यते धान्यं धनं दण्डोऽभिरक्षति ॥** [4]

**आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः।** [5]

**तदवाप्य नृपो दण्डं दुर्वृत्तेषु निपातयेत् । धर्मो हि दण्डरूपेण ब्रह्मणा निर्मितः पुरा ॥** [6]

**नयनानयगतालोके विकल्पनिलयामला । दण्डनाद्दमानाद्वापि दणड्नीतिरितिस्मृता ॥** [7]

**नीतिपरिचयः**

नीयते व्यवस्थाप्यते स्वेषु स्वेषु सदाचारेषु लोकः यया सा नीतिः इति। **नयनान्नीतिरुच्यते** इति नीतिशब्दस्य व्युत्पत्तिः दृश्यते । अनेन मानवः स्वस्य इष्टं कार्यमेव सम्पादयेत्। अस्मिन् कर्मणि अनुकूलयत्नः प्रतिकूलनिवारणञ्चावश्यकम् । सर्वेषाम् इष्टानि यदि समानानि भवन्ति तत्साधने उपर्युक्तमार्गद्वयम् अत्यावश्यकम् भवति। अनुकूलयत्नः स्वाधीनः भवति एतस्मात् कारणात् प्रतिबन्धकाः स्वल्पाः भवन्ति । प्रतिकूलनिवारणे स्वस्वेतराणां सन्निपातसङ्घर्षणं जायते तत्रत्यनीतिः सुनिशितशास्त्ररूपं सम्पादयति। शास्त्रम् शस्त्रास्त्रप्रयोगेण स्वस्वकार्यं निश्चिततया सम्पादनमार्गं दर्शयति। अस्मिन् कर्मणि बलवत्त्वम् स्थानमावहति। अस्य पार्यन्तिकरूपमेव भवति राजनीतिः । राजनीतिः राजधर्मः इतिपदद्वयं पर्यायपदत्वेन व्यवह्रियते। अनयोर्द्वयोः किञ्चन भेदः एव अस्ति धर्मस्तु विद्विनिर्णीतं, नीतिस्तु सर्वजनहृदयसम्मतम् भवति। धर्मस्तु एकया रीत्या भवति कल्पितः भवति, नीतिस्तु सहजः स्वयंप्रकाशश्च। धर्मः कदापि तिरस्कृतः भवति, परं नीतिस्तु सर्वकालसमादृतः। धर्मः स्वर्गसाधकः,

नीतिस्तु आत्मावबोधसाधनम् भवति। महाभारतं एतादृशनीतीनाम् आकरः इव दृश्यते । विशेषतया शान्तिपर्वणि नीतिप्रसङ्गाः असंख्याकाः दृश्यन्ते ।

**नमो धर्माय महते नमः कृष्णाय वेधसे ।**

**ब्राह्मणेभ्यो नमस्कृत्य धर्मान् वक्ष्यामि शाश्वतान्।**[8]

कुरुवृद्धः पितामहः भीष्मः धर्मस्वरूपाय श्रीकृष्णाय एवं तत्स्वरूपेभ्यः ब्राह्मणेभ्यः नमस्कृत्य युद्धविमुखाय अर्जुनाय श्री कृष्णः इव, राज्यपालनविमुखाय धर्मराजाय धर्मस्वरूपविशेषान् उपदिष्टवान्। भीष्मोपदेशसारभूयिष्ठे शान्तिपर्वणि राजधर्मानशासनपर्व, आपद्धर्मानुशासनपर्व, मोक्षधर्मानुशासनपर्व इति भागत्रयं विद्यते। अत्र शान्तिपर्वणि राजधर्मानुशासनपर्वणि एकोनषष्टितमाध्याये राजनीतेः(दण्डनीतेः) प्रादुर्भावः विशेषतया उल्लिखितः।

**धर्मराजाय भीष्मोपदेशः**

पौर्वाह्णिकक्रियाः कृत्वा पाण्डवयादवाः भीष्मसमीपं समागतवन्तः। तदा युधिष्ठिरः भीष्मं प्रणम्य राजा अपि सामान्यमानव इव समानाकारः समानबुद्धिशाली भवति केन कारणेन अयं विशिष्टः कथं भवति। कथं एकः महीं पालयति । जनाः सर्वे तं कथं अनुसरन्ति इत्यादि प्रश्नान् पृष्ट्वा महात्मा एतस्य मूलसूत्रं किं, अस्य तत्वं किं विस्तरेण ब्रूहि इति अपृच्छत् । तदा भीष्मः दण्डप्रादुर्भावक्रमः एवम् । पूर्वं कृतयुगे राज्यं नास्ति, राजापि नास्ति तदुक्तम्--

**नैव राज्यं न राजासीन्न दण्डो न च दाण्डिकः। धर्मेणैव प्रजाः सर्वाः रक्षन्ति स्म परस्परम् ॥**[9]

एवं नराः परस्परं धर्मेण पालयन्ति स्म । कालक्रमेण ते मोहवशाः अभूवन्। मोहवशात् ज्ञानलोपः। तस्मात् लोभः तेन कामः तेन कर्तव्याकर्तव्यज्ञानशून्याः अभवन् । एवं मानवसमाजे धर्मस्य नाशः जातः। तदा देवाः सर्वे ब्रह्माणं समागत्य शरणं ययुः। तदा स्वयम्भूः अध्यायसहस्रपरिमितं शास्त्रं रचयामास । अत्र दण्डमहत्त्वस्य मूलसूत्रं स्वयम्भूः एवमवोचत् –

**दण्डेन नीयते चेदं दण्डं नयति वा पुनः। दण्डनीतिरिति ख्याता त्रीन् लोकानभिवर्तते ॥**[10]

**स्वायम्भुवनीतिशास्त्रम्**

स्वयम्भूनीतिशास्त्रं लक्षाध्यायपरिमितम् । ब्रह्मणः सम्प्राप्य विशालाक्षः प्रजानां आयुषः ह्रासं विज्ञाय संचिक्षेप। वैशालाक्षात् इन्द्रः दशसहस्राध्यायपरिमितं शास्त्रमग्रहीत् , अस्यैव वैशालाक्षनीतिः इति

नाम। देवेन्द्रः तच्छास्त्रं संक्षिप्य पञ्चसहस्राध्यायपरिमितमकरोत्। अस्य नाम बाहूदन्तकम् । अनन्तरं बृहस्पतिः तं त्रिसहस्रेषु संचिक्षेप। अयञ्च ग्रन्थः **बार्हस्पत्यनीतिशास्त्रम्** इति प्रसिद्धिं लेभे।

**अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः। संचिक्षेपेश्वरो बुद्ध्या बार्हस्पतं तदुच्यते ॥**[11]

अनन्तरं योगाचार्यः महायशस्वी शुक्राचार्यः सहस्राध्यायेषु नीतिशास्त्रम् संचिक्षेप अस्य नाम **औशनसनीतिः** अथवा **शुक्रनीति**रिति प्रसिद्धा।

जनमेजयमनीतिप्रकाशिकायां ब्रह्मणा प्रारब्धः राजनीतिशास्त्रज्ञपरम्परा उक्ता। अस्य अध्यायसंक्षेपः अत्र उक्तः--

**ब्रह्मा महेश्वरः स्कन्दश्चन्द्रः प्राचेतसो मनुः। बृहस्पतिश्च शुक्रश्च भारद्वाजो महातपाः।**

**वेदव्यासश्च भगवान् तथा गौरशिरा मुनिः। एते हि राजशास्त्राणां प्रणेतारः परंतपाः॥**

**लक्षाध्यायान् जगौ ब्रह्मा राजशास्त्रे महामतिः। पञ्चाशच्च सहस्राणि रुद्रः संक्षिप्य चाब्रवीत्॥**

रुद्रः पञ्चाशत्सहस्राध्यायरूपेण राजशास्त्रं संक्षिप्तवान् । अनन्तरं स्कन्दः, इन्द्रः, मनुः, बृहस्पतिः, शुक्रः भरद्वाजः, गौरशिराः , वेदव्यासः क्रमेण 25000, 10000, 6000, 3000, 700, 500, 300 अध्यायरूपेण संक्षिप्तं कृतवन्तः। अत एवोक्तं शुक्रनीत्यां एवम् -

**शतलक्षश्लोकमितं नीतिशास्त्रमथोक्तवान् । स्वयम्भूर्भगवान् लोकहितार्थं संग्रहेण वै ॥**[12]

एवं प्रकारेण राजनीतिशास्त्रपरम्परां संक्षेपक्रमं च वेदव्यासः महाभारते सूत्राध्याये प्रस्तावितवान् ।

अध्यायेऽस्मिन् राजनैतिकविषयाः एवं प्रोक्ताः स्वयम्भुवा। धर्मार्थकामाः त्रिवर्गः इत्युच्यते। मोक्षस्तु पृथगर्थः पृथग्गुणः भवतीति मोक्षं पृथक् रूपेण प्रस्तावितवान् । दण्डात् अन्यः त्रिवर्गः भवति । स्थानं वृद्धिः क्षय इति । स्थानं नाम समानस्थितिः। इयं च स्थितिः वणिजां, वृद्धिः तपस्विनां, क्षयस्तु चोराणां भवति ।एवम्

**आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च । सहायाः कारणं चैव षड्वर्गो नीतिजः स्मृतः ॥**[13]

एवं विद्याः प्रोक्ताः। अत्र नीतिशास्त्रे त्रयी आन्वीक्षिकी वार्ता दण्डनीतिः विद्याः इति एताः विद्याः सर्वेषु राजनीतिग्रन्थेषु प्रतिपादिताः यतः राजा विद्यावान् भवेत् नोचेत् युक्तायुक्तविवेकः न जायते इति। अनन्तरं चारः विशेषप्रतिभाशाली भवेत् । समयानुगुण्यतया विभिन्नवेषान् धारयन् राज्ञः कार्यं सम्पादयेत् । अत एवोक्तं **राजानः चारचक्षुषः** इति । एवमत्र पञ्चविधोपायाः प्रोक्ताः। ते च सामदानभेददण्डोपेक्षाः इति। एतानुपायान् राजा सन्दर्भानुसारम् अनुसरेत् । उपेक्षा इति पञ्चमोपायः प्रत्येकतया उक्तः । मन्त्रालोचनं,

भेदोपायस्य अर्थः, विभ्रमः, सिद्धिः, असिद्धिः तेषां फलान्यत्र प्रोक्तानि। सन्धिः हीनमध्यमोत्तमेति त्रिविधः। भयहेतुकसन्धिः हीनः, सत्कारहेतुकसन्धिः मध्यमः, वित्तहेतुकसन्धिः उत्तमः भवतीति ब्रह्मा सन्धिमुद्दिश्य पूर्णतया ग्रन्थेऽस्मिन् अवर्णयत्।

**यात्रा**

**यात्रा कालश्च चत्वारस्त्रिवर्गस्य च विस्तरः। विजयो धर्मयुक्तश्च तथार्थं विजयश्च ह ॥**

**असुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः। लक्षणं पञ्चवर्गस्य त्रिविधं चात्र वर्णितम् ॥** [14]

मित्रवृद्धिः कोशसञ्चयः, परमित्रनाशनं, शत्रुकोशनाशः इति चतुर्विधकार्योद्देश्येन क्रियमाणा यात्रा युद्धयात्रा इत्युच्यते । क्षयस्थानवृद्धिरूपत्रिवर्गविस्तरः। धर्मविजयः अर्थविजयः आसुरविजयः इति अत्र वर्णितः। अत्र नीलकण्ठः आसुरविजयः सौप्तिकपर्वणि उपपाण्डवानां वधे दर्शयितुं शक्यते इति स्वव्याख्यायां प्रोक्तवान्।

**पञ्चवर्गः-** मन्त्रिः राष्ट्रं दुर्गम् सेना कोशः एतेषां समवायः पञ्चवर्गः इत्युक्तः। अस्य च वर्गस्य उत्तममध्यमाधमभेदाः भवन्ति ।

**दण्डः -** दण्डः प्रकाशदण्डः, अप्रकाशदण्ड इति द्विविधः। प्रकाशदण्डः पुनः अष्टविधः भवति ।

**प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः। प्रकाशोऽष्टविधस्तत्र गुह्यश्च बहुविस्तरः ॥**

**रथा नागा हयाश्चैव पादाताश्चैव पाण्डव । विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमम् ॥** [15]

एवम् अप्रकाशदण्डः महावृश्चिकादि जङ्गमाः, अजङ्गमाः चूर्णयोगाः विषादयः। अभिचारप्रयोगादयः अप्रकाशदण्डाः भवन्तीति अत्र वर्णितम् । अरिः मित्रम् उदासीन इति त्रयाणां विशेषाः वर्णिताः।

**मार्गगुणाः** – ग्रहनक्षत्रादीनां मार्गगुणाः, भूमिगुणाः यामलग्रन्थोक्तचतुरशीतिभूमिगुणाः, आत्मरक्षणम् , आश्वासः, रथनिर्माणवेक्षणं, बलपुष्टिकरयोगाः अत्र वर्णिताः। नृनागरथहयादिभिः विभिन्नव्यूहानां रचनाविधानम् , एवं विचित्रयुद्धकौशलम् , सेनाव्यसनयुक्तं बलहर्षणं, पीडा, आपदः कालश्च अत्रोक्ताः। चौरैराटविकैः परराष्ट्रपीडनमत्र उल्लिखतम् । एवं

**सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धिसमंजसम् । दूतसामर्थ्य संयोगात् स्वराष्ट्रस्य विवर्धनम् ॥** [16]

राज्यस्य सप्ताङ्गव्यवस्था भवति । एतच्च सर्वविधराजनीतिग्रन्थेषु उल्लिख्यते ।

**स्वाम्यमात्या जनो दुर्गं कोशो दण्डस्तथैव च ।मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते॥** [17]

**साम दानं तथा दुर्गं कोशो दण्डस्तथैव च ।मित्रं जनपदश्चैव राज्यं सप्ताङ्गमुच्यते ॥** [18]

अभृतानां च भरणं, भृतानां च अन्ववेक्षणं, अर्थस्य काले दानं , व्यसने च अप्रसङ्गिता। एवं राजगुणाः, सेनापतिगुणाः, क्षयस्थानवृद्धीनां कारणानि, तेषां गुणदोषाः अत्र वर्णिताः।


**क्रोधजानि तथोक्तानि कामजानि तथैव च । दशोक्तानि कुरुश्रेष्ठ व्यसनान्यत्र चैव ह ॥**

**मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ । कामजान्याहुराचार्याः प्रोक्तानीह स्वयम्भुवा ॥** [19]

**वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च । आत्मनो निग्रहस्त्यागो ह्यर्थदूषणमेव च ॥** [20]

प्रजानां प्रत्यक्षपरोक्षसर्वाधिकरणेषु राजा पर्यवेक्षणं कुर्यात् । पौररक्षणं युक्तदण्डत्वं द्वादशराजकचिन्तावान् भवेत् राजा इति वर्णितम् । द्वादशराजमण्डलं एवं प्रोक्तम् ।

**रक्षणं चैव पौराणां राष्ट्रस्य च विवर्धनम् । मण्डलस्था च या चिन्ता राजन् द्वादशराजिका ॥**[21]




1 विजिगीषुः 2. अरिमण्डलः 3. मित्रमण्डलः 4 उदासीनमण्डलः


अयमेव विषयः मनस्मृतौ विस्तरेण उक्तः सप्तमेऽध्याये। अत्र द्विसप्ततिप्रकृतयः प्रोक्ताः राजा एतान् सर्वान् परीक्षेत इत्युक्तम् । [22]

याज्ञवल्क्यस्मृतौ एवमुक्तं द्वादशराजमण्डलम् -

**अरिर्मित्रमुदासीनोऽनन्तरस्तत्परः परः। क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः॥**[23]

अर्थशास्त्रेऽपि सप्तमाधिकरणे अष्टादशाध्याये विस्तरेण वर्णितः। अन्यत्रापि अयं प्रसङ्गः विस्तरेण स्पष्टतया च दृश्यते। एतादृशपोयाः सर्वे स्वायम्भुवनीत्यां वर्णिताः। दण्डेन जगदिदं चतुर्विधपुरुषार्थेषु प्रवर्तितं भवति। अनेन दण्डं प्रवर्तते । अतः **दण्डनीतिरिति ख्याता त्रीन् लोकान् अभिवर्तते**।

**राज्यस्य मूलसूत्रं एवं भवति--**




**उपसंहारः**

दण्डनीतिः अथवा राजनीतिः इति शब्दद्वयस्य अस्माकं प्राचीनभारतीयशासनव्यवस्थायां पर्यायपदत्वेन अथवा किञ्चिद्भेदेन च उपयोगः अस्माभिः दृश्यते। सर्वशास्त्राविर्भावविकास इव राजनीतशास्त्रस्य आविर्भावः एवं स्वरूपं च स्पष्टतया उक्तं व्यासमहर्षिणा महाभारते एकोनषष्टितमाध्याये स्वायम्भुवनीतिः इत्यनेन नाम्ना । अत्र तावत् ग्रन्थान्तरेषु शुक्रनीत्यामपि अयं क्रमः उक्तः। परं कस्मिन् अध्याये कः विषयः प्रोक्तः इति तत्र नोल्लिखितः केवलं श्लोकसंख्यायां न्यूनता द्रष्टुं शक्यते। परमत्र महाभारते श्लोकसंख्यान्यूनीकरणद्वारा ग्रन्थानाम् आविर्भावपुरस्सरं कस्मिन् अध्याये कः विषयः उक्तः इति स्पष्टमुक्तम्। एवं राजनीतिविषयस्तावत् स्थूलतया प्राचीनकाले आचारः व्यवहारः इति प्रधानतया तत्र तत्र प्रायश्चित्तरूपेणापि प्रोक्तः विद्यते। राज्याङ्गानि तावत् स्वामि-अमात्य-दुर्ग-कोश-सेना-मित्र-जनपदानीति सर्वैरपि राजनीतिज्ञैः स्वस्वशास्त्रेषु एतेषां प्राधान्यं स्वरूपं वर्णितम्।

एवं सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः षड्विधोपायाः, एवं द्वादशराजमण्डलं इत्यादिविषयाः स्वायम्भुवनीत्यां संक्षेपेण उक्ताः। एते एव विषयाः ग्रन्थान्तरेषु स्वस्वपरिशीलनानुसारं कालानुगुणं च तैः तैः ग्रन्थकर्तृभिः तत्तद्ग्रन्थेषु प्रस्ताविताः। सर्वेषां राजनीतिज्ञानाम् अभिप्रायस्तावत् यः राजा जनान् चतुर्विधपुरुषार्थपालनपरान् कुर्वन् तेषां सुखं सदा वाञ्छति स राजा चिरं नन्दति इति । एवं

राज्यपालनविमुखं धर्मराजं प्रति राज्यपालनमहत्त्वं दण्डमहत्त्वम् इत्यादिविषयान् उपदेशरूपेण एवं कथाकथनरूपेण च बोधयन् भीष्मः धर्मराजं कर्तव्योन्मुखं कृत्वा कृतकृत्यः अभवत् । दण्डनीतेः सूत्रं अथवा शान्तिपर्वणः सूत्रं भवतीति अभिप्रायेण भगवान् व्यासः अस्य अध्यायस्य सूत्राध्याय इति सार्थकं नाम चकारेति भावयितुं शक्यते ।

## पादटिप्पण्यः

1. वाचस्पत्यम् पृष्ठसंख्या 676
2. म.भा.शान्ति 59-78
3.वीर. मि. राजनीति पृष्ठसंख्या 286
4.महाभारतम् , वीर. राजनीति. पृष्ठसंख्या 287
5.अर्थशास्त्रम् 1.4.2
6.या.ज्ञवल्क्यस्मृतिः 1-353
7.देवी.भागवतम् 45 अध्यायः
8.म .भा शा 6-10
9.म.भा.शान्ति 59-14
10.म.भा.शान्ति 59-78
11.म. भा. शान्ति 59-84
12.शुक्रनीतिः 1.1.2-3
13.म .भा. शा 59-32
14.म भा. शा 59 -38,39
15.म भा. शा 59,40,41
16.म.भा.शा 49-51
17.या.स्मृतिः-1-352
18.वीर. पृ. 319
19.म .भ .शा. 49-60,61
20.म. भ.शा. 49-62
21.म .भ. शा. 70
22.मनुस्मृतिः 7-155-159
23.या. स्मृतिः-1-344

## परामृष्टग्रन्थसूची

1.कामन्दकनीतिसारः- गणपतिशास्त्रि- अनन्तशयनम् -1912
2.कौटलीयार्थशास्त्रम् – वेंकटानाथाचार्यः- प्राच्यविद्यासंशोधनालयः मैसूर् -1960
3.चाणक्यनीतीसूत्राणि- वेंकटानाथाचार्यः- प्राच्यविद्यासंशोधनालयः मैसूर्- 1960
4.मनुस्मृतिः- डा एन् एल् नरसिंहाचार्यः
5.महाभारतम् – शान्तिपर्व - गीताप्रेस्
6.महाभारतम् -शान्तिपर्व-शलाकरघुनाथशर्मा, आर्षविज्ञानट्रस्ट् -2001
7.याज्ञवल्क्यस्मृतिः- आचार्य पुल्लेल श्रीरामचन्द्रुडु -2003
8.वीरमित्रोदयः(षष्ठो भागः)-मित्रमिश्रः- चौखम्बा संस्कृतसीरीज् वाराणसी -1987
9.शुक्रनीतिसारः-डा कंड्कुंट अळहसिंगराचार्योः साहितीसन्मानसमिति 2002
10.सोमदेवीयानि राजनीतिसूत्राणि- वेंकटनाथाचार्यः- प्राच्यविद्यासंशोधनालयः मैसूर् 1960

# श्रीमन्महाभारते शान्तिपर्वणि तपसः वैशिष्ट्यम्

**Dr. लक्ष्मीनरसिंहः**

सहायकाचार्यः,

श्री अहोबिलमठ-आदर्शसंस्कृतमहाविद्यालयः, मधुरान्तकम्

वेदे विदितानां धर्माणां लोके प्रचाराय इतिहासपुराणानाम् आविर्भावः समजनि। अत एवोक्तम् 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति। तादृशेषु इतिहासेषु अन्यतमे श्रीमन्महाभारते अष्टादशसु पर्वसु व्यासः धर्मान् बोधयामास। तत्र विशिष्य शान्तिपर्वणि तपसः वैशिष्ट्यम् इति शीर्षके यथामति प्रतिपादयितुम् ईहे॥

**नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥**

अस्मिन् शान्तिपर्वणि राजधर्मानुशासनम् , आपद्धर्मः, मोक्षधर्मः चेति विभागत्रयं दृश्यते। तेषु आपद्धर्मपर्वणि तपसः महिमा वरीवर्ति एकपञ्चाशदधिकशततमे अध्याये।

प्रथमं महाभारतस्य वैशिष्ट्यं तु एवं वर्तते–

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥** इति॥

प्रथमं राजधर्मानुशासनपर्वणि कर्णस्य शापवृत्तान्तः, दुर्योधनेन कलिङ्गराजकन्यायाः अपहरणम् , कर्णस्य दुर्योधनेन राज्यप्रदानम् , धर्मराजस्य विषादः, युधिष्ठिरस्य शापः, तेन वानप्रस्थवत् जीवनयापने निश्चयः, भीमेन नकुलेन च राजधर्मप्रचारः, अर्जुनेन राजदण्डस्य महत्त्वप्रतिपादनम्, कर्तव्याकर्तव्यकर्मणां वर्गीकरणम् , पापानां प्रायश्चित्तकथनम् , मनुधर्मोक्तदिशा भक्ष्याभक्ष्यपात्रापात्रविवेचनम् , युधिष्ठिरस्य राज्याभिषेकवर्णनम् , भीष्मस्तवराजः, श्रीकृष्णभीष्मयोः संवादः, राज्ञां धर्मसमवेतनीत्या परिपालनविषयकथनम् , वर्णधर्मस्य कथनम् , इत्यादीनां वर्णनम् कृतमस्ति।

तत्र सर्वेषां वर्णानां कश्चन धर्मः प्रोक्तः यत् –

**अक्रोधः सत्यवचनं संविभागः क्षमा तथा। प्रजनः स्वेषु दारेषु शौचमद्रोह एव च॥**

**आर्जवं भृत्यभरणं नवैते सार्ववर्णिकाः ॥** (60- अध्याये – 7, 8 श्लो.) इति।

राजधर्मास्तु–

**दद्यात् राजन् न याचेत यजेत न च वा जपेत्। नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्॥** (60-13)

इत्यादयो बहवो धर्माः प्रोक्ताः वर्तन्ते॥

वैश्यानां धर्मास्तु – **दानमध्ययनं यज्ञः शौचेन धनसंचयः।** इत्यादयः।

शूद्राणां धर्मास्तु – **तस्य शूद्रस्य वर्णानां परिचर्या विधीयते।**

इत्येवंरीत्या वर्णधर्माः प्रोक्ताः वर्तन्ते॥

अनन्तरं आश्रमधर्माः के इति विचार्यते। मनुना सप्तमे अध्याये आश्रमधर्माः प्रोक्ताः। अत्र तु एवं वर्ण्यते। प्रथमं तपःप्रधानानाम् आश्रमाणां प्रकाराः एवमुच्यन्ते–

**वानप्रस्थं भैक्ष्यचर्यं गृहस्थं च महाश्रमम्। ब्रह्मचर्याश्रमं प्राहुः चतुर्थं ब्राह्मणैर्वृतम्॥** इति ।

वानप्रस्थाः एवं प्रोक्ताः –

**जटाधारणसंस्कारं द्विजातित्वमवाप्य च। आधानादीनि कर्माणि प्राप्य वेदमधीत्य च।**

**सदारो वाप्यदारो वा आत्मवान् संयतेन्द्रितः। वानप्रस्थाश्रमं गच्छेत् कृतकृत्यो गृहाश्रमात्॥** इति।

एवं गृहस्थधर्मः अपि विशदतया प्रोक्तः। तत्र इदं पद्यं स्वीकृतं वर्तते–

**भरणं पुत्रदाराणां वेदानां धारणं तथा। वसतामाश्रमं श्रेष्ठं वदन्ति परमर्षयः॥** इति।

अत एव मनुः अपि एवं वदति – **आश्रमाणां हि सर्वेषां गृहस्थाश्रममुत्तमम्॥** इति॥

अनन्तरं ब्राह्मणधर्मकर्तव्यपालनयोः महत्त्वम् , राजधर्मश्रेष्ठताप्रतिपादनम् , धर्मेण प्रजापालनमेव राज्ञां प्रधानधर्मः इति प्रत्यपादयद् व्यासः। राष्ट्रस्य संरक्षणसंवर्धनोपायाः के इति विषयः, सैन्यसञ्चरणवर्णनं, गणतन्त्रराज्यवर्णनमित्यादयो विषयाः 107 अध्याये प्रोक्ताः वर्तन्ते। मन्त्रालोचनपुरस्सरं चाराणां नयनम् , कोशवृद्ध्यर्थं कार्यकरणं तदर्थं महान् प्रयासः येन राज्ञा क्रियते सः देशः वृद्धिं प्राप्नोति। मातापित्रोः गुरोश्च सेवायाः महत्त्वं वर्णितमस्ति। अनन्तरं व्यवहारनीतिः प्रतिपादिता वर्तते ॥

तत्र धर्मस्य लक्षणं एवमुक्तमस्ति–

**अहिंसा सत्यमक्रोधः तपो दानं दमो मतिः। अनसूयाप्यमात्सर्यमनीर्ष्या शीलमेव च॥** (109-12 श्लो.) इति। अनन्तरं सदाचारेण ईश्वरे भक्तिः जायते इत्युक्तमस्ति॥

ततः राज्ञः तत्सेवकानां च गुणाः के इति वर्णितम्। सः राजा फलं प्राप्नोति यः कालज्ञानपरिपालनं करोति, अर्थचिन्तापरः, सत्पथालम्बी षड्वर्गं सः प्रतिगृह्णाति, स राजा धर्मफलमश्नुते॥

एतदेव कालिदासेन अभिज्ञानशाकुन्तले एवमुक्तमस्ति– **तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः॥**

इति।

ततः दण्डः कथं राज्ञा विधेयः इति वर्णयति व्यासः। ततः यमगौतमयोः संवादः वर्णितः। आपत्काले राज्ञः धर्मः कः इति विस्तरेण विचारः कृतः वर्तते।

राज्ञा कृतस्य पापस्य प्रायश्चित्तस्य वर्णनम्। राज्ञा कस्य धनं ग्राह्यं कस्य न, केन सह वर्तितव्यम् इति विचारः कृतः।

**न धनं यज्ञशीलानां हार्यं देवस्वमेव च। दस्यूनां निष्क्रियाणां च क्षत्रियो हर्तुमर्हति॥**(103-2)

अनन्तरं कूटनीतिः वर्णिता। राजभिः ब्राह्मणाः सर्वदा उपास्याः।

यथा श्रीमद्रामायणस्य शरणागतिशास्त्रमिति नाम भवति। तद्वत् महाभारतेऽपि शरणागतिः वर्तते। कपोतस्य शिबिचक्रवर्तिना शरणागतस्य रक्षणं कृतमस्ति। तद्वत् राज्ञः शरणागतानां संरक्षणं मुख्यमुद्देश्यम् भवति। पतिव्रताधर्मः च कीर्तितः।

सर्वेषां पापानां लोभ एव कारणम्। विविधपापानां वर्णनम् च कृतमस्ति –

**लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते। लोभान्मोहश्च माया च मानः स्तम्भः परासुता॥** (158-4)

एवम् अज्ञानमपि लोभस्य कारणं इति निरूपितम् – **लोभप्रभवमज्ञानं वृद्धं भूयः प्रवर्तते।** इति।

अतः इन्द्रियमनसोः संयमः आत्मनः दमकरणेन कर्तुं शक्यते इति वर्णनं कृतमस्ति।

**दमं निश्श्रेयसं प्राहुः वृद्धाः निश्चितदर्शिनः। ब्राह्मणस्य विशेषेण दमो धर्मः सतातनः॥**

दमसदृशो धर्मः लोके नास्ति इति निरूपितम् वर्तते॥

भूयः तपसः महिमानं पश्यामः। सर्वेषामपि तपः एव मूलम्।

**सर्वमेतत् तपोमूलं कवयः परिचक्षते। न ह्यतप्ततपा रूढः क्रियाफलमवाप्नुते॥**

लोके सर्वेषां मूलं तपः एव। तेन सर्वविधफलमपि प्राप्तुं शक्यते। ब्रह्मा तावत् तपसा एव लोके सर्वान् असृजत्। ऋषयः तपसः प्रभावेण वेदान् बोधयामासुः॥

अथर्ववेदेऽपि तपसः प्रभावः एवं वर्णितमस्ति– **ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति** इति। अस्यार्थस्तु – संयमरूपतपसा राजा राष्ट्रं रक्षतीत्यर्थः सिध्यतीति॥

मैत्रायणीयेऽपि तपसः प्रभावः उक्तः– **तपसा प्राप्यते सत्त्वं सत्त्वात् संप्राप्यते मनः** इति।

**तपसैव ससर्जान्नं फलमूलानि यानि च। त्रीलूँलोकान् तपसा सिद्धाः पश्यन्ति सुसमाहिताः॥**

फलम् , अन्नम् इति सर्वमपि पदार्थजातं तपसा सृजन्ति सिद्धाः इत्यर्थः।

औषधानि गदादीनि क्रियाः तपसा एव सिद्ध्यन्ति। अतः तपः एव मूलं साधनम् भवति। लोके यत् सर्वदा प्राप्तुं न शक्यते तदपि तपसा एव प्राप्तुं शक्यते। ऋषयो हि स्वतपःप्रभावात् ऐश्वर्यादिकमपि प्राप्तवन्तः॥

येन मनुष्येण सुरापानं कृतम् , भ्रूणहत्या कृता, गुरुपत्न्या समागमः कृतः, तेषां पापानां नाशः तपसा दूरीकर्तुं शक्यते॥

तत् तपः बहुरूपेण भवति। यः येन प्रकारेण कर्तुं वाञ्छति तेन रूपेण फलं प्राप्नोति। प्रधानं तपः किम् इत्युक्ते –

**अहिंसा सत्यवचनं दानमिन्द्रियनिग्रहः। एतेभ्यो हि महाराज तपो नानशनात् परम्॥**

यः निवृत्तिमार्गे प्रवर्तते तस्य उपवासः एव श्रेष्ठं तपो वर्तते॥ अहिंसादिभ्यः श्रेष्ठं तपः उपवासव्रतम् एव। दानात् श्रेष्ठं दुष्करतरं नास्ति। एवं मातुः सेवायाः परं श्रेष्ठः आश्रमः नास्ति। संन्यासिनाऽपि स्वमातुः संरक्षणं कार्यमित्युच्यते। आदिशङ्करभगवत्पादाः तथैव आसन् इति सर्वे जानन्ति॥

तपसा के सन्तीत्युक्ते तदेवमुक्तमस्ति –

**ऋषयः, पितरः, देवाः, मनुष्याः मृगपक्षिणः। यानि चान्यानि भूतानि स्थावराणि चराणि च॥**

श्रेष्ठस्थानस्य प्राप्तिः तपसः प्रभावात् एव अवश्यं सिध्यति॥

एवं श्रीमद्रामायणस्य आरम्भे एव नारदविषये वाल्मीकिना एवमुक्तमस्ति यत् –

**तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्। नारदं परिपप्रच्छ वाल्मीकिः मुनिपुङ्गवगम्॥** इति

तपसः विषये योगसूत्रेऽपि एवमुक्तमस्ति । पञ्चक्रियासु मध्ये अन्यतमं तपो भवति –

**तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः**(यो.सू.2.1) इति। तत्र तपो नाम हितमितमेध्याशनं तपः इति ।

तपः त्रिविधं प्रोक्तं श्रीकृष्णेन गीतायाम् शारीरम् , वाङ्मयं, मानसं चेति। तत्र शारीरं तपो नाम वाङ्मनःकायानाम् ऐकरूप्यम्।

शरीरं प्रधानम् अतः प्रथमं शारीरं तपः उच्यते –

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्। ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥** (17-14)

देवानां, ब्राह्मणानां, गुरूणां, ज्ञानिनां च पूजा, शुचित्वम्, ऋजुता, ब्रह्मचर्यम् , अहिंसा इत्येतत् शारीरं तप इत्युच्यते। तत्र ब्रह्मचर्यम् नाम योषित्सु भोग्यताबुद्धिवर्जनम् , एवं अहिंसा नाम अप्राणिपीडनम् इति श्रीनिगमान्तमहादेशिकाः तात्पर्यचन्द्रिकायां वदन्ति॥

वाङ्मयं तपः तावत् –

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥** (17-15)

परहिंसाराहित्यं, सत्यं, परसुखजनकं, वेदाध्ययनम् इत्येतत् वाङ्मयं तपः भवति॥

मानसं तपः तावत्–

**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥**

मनसः शान्तिः, प्रीतिः, मौनम् , आत्मसंयमः, शुद्धभावः इत्येतत् मानसं तपः भवति॥

एवं सात्त्विकराजसतामसभेदेन तपः त्रिधा भवति। फलाभिसन्धिरहितेन, योगे दृढमनस्केन, परया श्रद्धया यत् तपः क्रियते तत् सात्त्विकं भवति –

**श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः। अफलाकाङ्क्षिभिः युक्तैः सात्त्विकं परिचक्षते॥**

परैः स्तूयमानः दम्भेन यत् करोति तत् तात्कालिकं भवति चेत् राजसं तपः भवति –

**सत्कारमानपूजार्थं तपो दम्भेन चैव तत्। क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥**

तामसं तु –

**मूढग्राहेण आत्मानः यत् पीडया क्रियते तपः। परस्योत्सादनार्थं वा तत् तामसमुदाहृतम्॥** इति।

अस्यार्थस्तु – विवेकज्ञानं विना परपीडनरूपेण यत् तपः क्रियते तत् तामसम् इत्युच्यते॥

कालिदासेन कुमारसम्भवे पार्वत्याः तपसः विषये एवमुक्तमस्ति – तपसा किं न साधयितुं शक्यते इति ।

**यत् दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम्। तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्॥** इति।

एवं यशस्तिलकचम्पूप्रबन्धे तावत् तपस्वी कः इति विषये एवमुक्तमस्ति यत् –

**ज्ञानैः मनोवपुर्वित्तैः नियमैः इन्द्रियाणि च। नित्यं यस्य प्रदीप्तानि स तपस्वी न वेषवान्॥** इति।

तपः कुत्र कर्तव्यम् इति गीतायां भगवता कृष्णेन उक्तमस्ति यत् –

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥**

इत्येवंरीत्या तपसः प्रभावः वर्णितः। इत्युक्त्वा विरमामि॥

# श्रीमन्महाभारते शान्तिपर्वणि राजधर्माः।

**Dr. र.शेषाद्रिः**

Assistant professor, Department of Sanskrit,

Swami Dayananda College of Arts & Science,

Manjakkudi.

**भूमिका**

मानवसमुदायस्य आधारभूतोऽयं धर्मः। धर्मो हि तेषामधिको विशेषः। धर्मो हि ध्रियते अनेन इति। धर्मस्य शास्त्रं धर्मशास्त्रम् ।यदेव शास्त्रं जनानामाचारव्यवहारप्रायश्चित्तस्वरूपनिर्धारकं तदेव धर्मशास्त्रम् । धर्माश्च बहुविधाः सामान्य धर्माः, वर्णधर्माः, आश्रमधर्माः, राजधर्माः, स्त्रीधर्माः, मुनिधर्माः, कुलधर्माः, देशधर्माः, युगधर्माश्च । तेषां विषये अतिप्राचीनकालादेव बहुधा चिन्तितं भवति। गौतम-बोधायन-आपस्तम्बादि धर्मसूत्रेषु राजनीतितत्त्वं राजशास्त्रत्वेन वर्णितमस्ति। राजशास्त्रप्रणेतारः ऋषयः महाभारते नामतः सङ्गृहीताः। ते मुनयः -

**बृहस्पतिश्च भगवान् नान्यं धर्मं प्रशंसति । विशालाक्षश्च भगवान् काव्यश्चैव महातपाः।**

**सहस्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः। भरद्वाजश्च भगवान् तथा गौरशिरा मुनिः।**

**राजशास्त्रप्रणेतारो ब्रह्मण्या ब्रह्मवादिनः**।( 12/58/1-03)

**महाभारतम्**

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इति वाक्येन तयोः महत्त्वं दृष्टम् । भारतं तु श्रुति-स्मृतित्वेन गण्यते। महाभारतं हि द्वितीयं भारतवर्षस्य राष्ट्रियमहाकाव्यम्। अस्य प्रणेता कृष्णद्वैपायनो व्यासः। इदं हि जयसंज्ञकस्येतिहासस्य भारतसंज्ञकस्याख्यानस्य च संग्रहत्वान्महाभारतमिति कथितम्। अस्मिन् ग्रन्थे कौरवपाण्डवानां महायुद्धं मुख्यविषयरूपेण वर्णितमस्ति। मानवजीवनस्य धर्म-अर्थ-काम-मोक्षरूपाः समस्तपुरुषार्थाः अत्र विशालग्रन्थे सन्निवेशिताः । व्यासस्य कृतिरियं सर्वैरितिहास इत्युच्यते , यतोऽत्र वीराणां पुण्या गाथा वर्णिता । अयं ग्रन्थो धार्मिकग्रन्थो येन लोकः स्वकल्याणं गवेषयति । अत्रैव ग्रन्थे गीतारत्नं विद्यते याऽदुग्धेव प्रतीयतेऽनवरतं दुह्यमानाऽपि । गीताग्रन्थस्यादरो महाभारतस्यैव विशिष्टतां प्रमाणयति । स्वयमेव व्यासेन महाभारतस्य प्रशंसायां यदुक्तं तदक्षरशः सत्यम् –

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः । न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः॥**

**श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते । पुंस्कोकिलागिरं श्रुत्वा रूक्षा ध्वाङ्क्षस्य वागिव ॥**

श्रीवेदव्यासस्य महत्वाकाङ्क्षेयं यद् धर्मार्थ-काम-मोक्ष-विषयकम् अखिलमपि जिज्ञासितं तथ्यम् अत्रैव लभेत, न च किञ्चिद् उच्छिष्येत इति । अत एव उच्यते -

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**

महनीयोऽयं ग्रन्थः यथा वपुषा विशालः तथैव भावगाम्भीर्येण अर्थगौरवेण च ।अत एव उच्यते-

**महत्त्वाद् भारवत्वाच्च महाभारतमुच्यते ।**

महाभारतमष्टादशसु पर्वसु विभक्तं वर्त्तते । तस्मिंश्च आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रमवासि-महाप्रस्थानिक-स्वर्गारोहणपर्वाणि सन्ति ।

**शान्तिपर्व**

महाभारते युद्धात् सर्वनाशात् परं शोकयुक्तः युधिष्ठिरः चाञ्चल्ययुक्तोऽभवत्। तस्य मानसिकशान्त्यर्थं शरासने शयानः पितामहः भीष्मः , अन्ये ऋषयः च उपदिदिशुः। अस्मिन् पर्वणि त्रीणि उपपर्वाणि सन्ति । एवं 366 अध्यायाश्च सन्ति। तानि उपपर्वाणि - 1. राजधर्मानुशासनपर्व। 2. आपद्धर्मपर्व। 3. मोक्षधर्मपर्व इति।

इदं शान्तिपर्व युधिष्ठिरस्य शोकप्रदर्शनपूर्वकं प्रारभ्यते । आदौ सः संन्यासं स्वीकर्तुमभलषति । ततः सः नारदादीनां ऋषीणामुपदेशेन राज्यं पुनः स्वीकरोति । अत्र भीष्मेण युधिष्ठिरं प्रति उपदिश्यमानान् राजधर्मानधिकृत्य पश्यामः विस्तरेण । राजधर्माः, राज्यधर्माः, दण्डनीयः च अस्मिन् राजधर्मोपपर्वणि उपपादिताः।

**व्यासेन प्रतिपादिता राजधर्माः**

क्षत्रियाणां तु व्यासेन प्रतिपादिताः विषयाः – श्रियं प्रति अनभिरुचिः, यज्ञविधानं, दण्डधारणेन प्रजानां परिपालनं, वेदज्ञानम् , एवं तपः च भवेत् राज्ञः । एतदेव शान्तिपर्वणि प्रतिपादितम्।

**क्षत्रियाणां तु वक्ष्यामि तवापि विदितं पुनः। यज्ञो विद्या समुत्थानमसंतोषः श्रियं प्रति।।**

**दण्डधारणमुग्रत्वं प्रजानां परिपालनम् । वेदज्ञानं तथा कृत्स्नं तपः सुचरितं तथा।।**

**द्रविणोपार्जनं भूरि पात्रेषु प्रतिपादनम् । एतानि राज्ञां धर्माणि सुकृतानि विशांपते।** (12.23. 9 -10)

कानि प्रमाणानि राज्ञा स्वीकर्तव्यानि?

**प्रत्यक्षमनुमानं च उपमानं तथाऽऽगमः। अर्थापत्तिः तथैतिह्यं संशयो निर्णयस्तथा।।**

**आकार इङ्गितं चैव गतिश्चेष्टा च भारत॥**

**युक्त्या दण्डं धारयित्वा प्रजानां युद्धे क्षीणो मोदते देवलोके ॥**

**त्यजन्ति यज्ञान्विजयन्ति राज्यं रक्षन्ति राष्ट्राणि प्रियाणि चैषाम्।**

**सम्यग्दण्डधरो नित्यं राजा धर्ममवाप्नुयात्। नृपस्य सततं दण्डः सम्यग्धर्मः प्रशस्यते।।**

**राजधर्माः**

श्रीमन्महाभारते शान्तिपर्वणि एकसप्ततितमाध्याये राजधर्मकथनं भीष्मेण युधिष्ठिरं प्रति कृतम् । तत्र युधिष्ठिरः पितामहं पृच्छति - **कथं राजा प्रजा रक्षन्नाधिबन्धेन युज्यते**? इति । तस्मै एवं प्रत्युवाच-

**समासेनैव ते राजन्धर्मान्वक्ष्यामि शाश्वतान् । विस्तरेणैव धर्माणां न जात्वन्तमवाप्नुयात् ॥**

राजा तु धर्मनिष्ठः देवतानिष्ठः च भवेत् । गुणवतो द्विजान् गृहे पूजयेत्। पूजयन् द्विजस्य चरणौ अभिवाद्य कार्याणि कुर्यात्। सर्वाणि कार्याणि सपुरोहितः कुर्यात्। ब्रह्मणानां वचनानि जयाशिष इव स्वीकुर्यात्। आर्जवेन धृत्या बुद्ध्या च संपन्नः राजा धर्मार्थौ प्रतिगृह्णीयात्। कामक्रोधौ च वर्जयेत्। अर्थं च कामक्रोधौ त्यक्त्वा प्रतिगृह्णाति । राजा लुब्धो मूर्खो वा न भवेत्। अपराधिनां बलिषष्ठेन शुल्केन दण्डेन, वेतनेन च धनागमं कुर्यात्। यथाविधि नीत्या करं दापयित्वा राजा प्रजानां योगक्षेममतन्द्रितः कल्पयेत्।

राजा शास्त्रपरः भवेत्। अपशास्त्रधनसंचयं राजा न अधिगच्छेत् । तत् वित्तं अस्थाने भवेत् चेत् सर्वमेव विनश्यति।

**ऊधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी न लभेत्पयः। एवं राष्ट्रमयोगेन पीडितं न विवर्धते॥** (12/71/16)

राष्ट्रमुपायेन भुञ्जानः फलं लभेत। अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितम् , कोशवृद्धिं नित्यां अतुलां जनयति। राजा दोग्घ्री, धान्यं, हिरण्यं मही च सुरक्षिता स्यात् । राजा मालाकारवद् भवेत् न तु आङ्गारिकवत् ।

धर्म्येण वृत्तेन प्रजाः परिपालनीयाः। तदा स्वर्गं, पुण्यं, यशः च नित्यं प्राप्स्यते। प्रजारक्षणमेव राज्ञां परमो धर्मः। तदेव-

**एष एव परो धर्मो यद्राजा रक्षति प्रजाः। भूतानां हि यदा धर्मः रक्षणं परमा दया॥** (12/71/26)

राजा अत्र धर्मं कृत्वा धर्मेण प्रजाः पालयन् दशवर्षसहस्राणि फलं दिवि भुङ्क्ते।राजा शास्त्रविनीतः भवेत्। स सर्वेषां सगुणः कुशलश्च भवेत्। राजा दानशीलः यज्ञशीलश्च एवमुपवासतपःशीलः भवेत्। नित्यं प्रजानां पालने रतः भवेद्राजा। तत्तु धर्मेण पालयेत्।

**राज्ञा हि पूजितो धर्म ततः सर्वत्र पूज्यते। यद्यदाचरते राजा तत्प्रजानां स्म रोचते ॥** (12/75/04)

राज्ञा प्रजाः धर्मेण सुरक्षिताः। राजा सर्ववर्णान् सदा यथाविधि रक्षेत्। नृपः ब्राह्मणानां कृतकृत्यः भवेत्। भूतानि पर्यजन्यमिव द्विजाः महाद्रुममिव नराः नृपं सर्वसाधनाय उपजीवन्ति। तदेव-

**पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः। नरास्तमुपजीवन्ति नृपं सर्वार्थसाधकम्॥**

राजा कामात्मना, शठबुद्धिना, अतिलुब्धेन वा सततं प्रजाः पालयितुं न शक्याः। दानम् , अध्ययनं, यज्ञं, च नित्यं सत्येन परिपालयेत्। यथान्यायं विप्रेभ्यः दक्षिणां दद्यात्।

**जित्वा संग्रामान्पालयित्वा च राष्ट्रं सोमं पीत्वा वर्धयित्वा प्रजाश्च।**

**वेदवेदाङ्गवित्प्राज्ञः सुतपस्वी नृपो भवेत्। दानशीलश्च सततं यज्ञशीलश्च भारत॥**

**एते गुणाः समस्ताः स्युर्नृपस्य सततं स्थिराः। व्यवहारस्य लोपेन कुतः स्वर्गः कुतो यशः॥**

**यदा तु पीडितो राजा भवेद्राजा बलीयसा। तदाभिसंश्रयेद्दुर्गं बुद्धिमान्पृथिवीपतिः॥**

**राजधर्मस्य प्रधानत्वम्**

**सर्वे धर्मा राजधर्मप्रधानाः सर्वे वर्णाः पाल्यमानाः भवन्ति ।**

**सर्वस्त्यागो राजधर्मेषु राजन् त्यागं धर्मं चाहुरग्र्यं पुराणम् ॥**

**सर्वे भोगा राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः ।**

**सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोकाः राजधर्मे प्रविष्टाः ॥**

**सर्वे धर्माः राजधर्मेषु दृष्टाः सर्वे भोगाः राजधर्मेषु राजन्।**

**सर्वे योगाः राजधर्मेषु चोक्ताः सर्वे धर्माः राजधर्मे प्रविष्टाः।**

**तस्माद्धर्मो राजधर्माद्विशिष्टः नान्ये लोके विद्यते अजातशत्रो ॥**

**राजगुणाः**

**राजा भोजः विराट् सम्राट् क्षत्रियो भूपतिर्नृपः। य एभिः स्तूयते शब्दैः कस्तं नार्चितुमर्हति॥**

**तस्माद्बुभूषुर्नियतो जितात्मा संयतेन्द्रियः। मेधावी धृतिमान् दक्षः संश्रयेत् च महीपतिम् ॥**

**कृतज्ञं प्राज्ञमक्षुद्रं दृढभक्तिं जितेन्द्रियम्। धर्मनित्यं स्थितं स्थाने मन्त्रिणं पूजयेन्नृपः॥**

**उपसंहारः**

**राजा प्रगल्भं पुरुषं करोति राजाभृशं बृंहयते मनुष्यम्।**

**राजाभिपन्नस्य कुतः सुखानि राजाऽभ्युपेतं सुखिनं करोति॥**

**राजा प्रजानां प्रथमं शरीरं प्रजाश्च राज्ञोऽप्रतिमं शरीरम्।**

**राज्ञा विहीना न भवन्ति देशा देशैर्विहीना न नृपा भवन्ति॥**

**राज्ञा हि पूजितो धर्मस्ततः सर्वत्र पूज्यते। यद् यदाचरते राजा तत् प्रजाभ्यः स्म रोचते॥**

इत्यादि पद्यानि राज्ञः मुख्यतां वदन्ति। अस्मिन् पर्वणि राज्ञः धर्माः, नीतयः एवं तस्य आवश्यकता च विस्तृततया प्रतिपादिताः॥

# पूर्वमीमांसाशास्त्रप्रयोजनम्

**पि.आर्. वासुदेवन्**

शिरोमणिः, न्यायविभागः

मद्रपुरीसंस्कृतमहाविद्यालयः, मयूरपुरी

मीमांसाशब्दस्य विचारः इत्यर्थः। तथापि विचारसामान्यं नात्र विवक्षितम् वेदार्थविचारस्यैव मीमांसापदप्रतिपाद्यत्वात्। तत्रैव तस्य रूढत्वादिति भावः। अत एवोक्तं भामतीकारैः - "पूजितविचारवचनो मीमांसाशब्दः। विचारस्य पूजितत्वं च परमपुरुषार्थहेतुभूतसूक्ष्मतत्त्वार्थनिर्णयफलकत्वमिति। कालक्रमेण मीमांसापदस्य पूर्वमीमांसामात्रे काचित् लौकिकी प्रसिद्धिः सञ्जाता। अतः अधुनाऽपि पदान्तरसमभि-व्याहारं विना "मीमांसे"त्युक्ते कर्मकाण्डावच्छिन्नवेदवाक्यार्थनिर्णयानुकूलः विचारविशेषः, तदुपस्थापक-ग्रन्थविशेषश्च प्रतिपाद्यते।

इदं शास्त्रं किमर्थं प्रवृत्तमिति पृष्टे, धर्माधर्मबोधनार्थं इति सर्वेषामुत्तरम्। ननु वेद एव धर्माधर्मबोधको वर्तते। किं पुनर्मीमांसया इति चेत्? सत्यम्। वेद एव तद्बोधकः, तथापि विचारसहकृतस्यैव वेदस्य धर्माधर्मबोधकत्वम् , न स्वरूपेण। न हि वेदो वर्तते इति तावन्मात्रेण कश्चित् धर्मं जानाति। एवञ्च धर्मज्ञाने वेदः करणम्। विचारो व्यापार इति भावः। तदाहुः भट्टपादाः--

"**धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्तव्यताभागं मीमांसा पूरयिष्यति**" इति।

धर्मज्ञानसाध्यक-वेदकरणक-भावनायाम् , इतिकर्तव्यतात्वेन अन्विता मीमांसा वेदाङ्गं स्यात्। परन्तु षण्णां वेदाङ्गानां (षड् वेदाङ्गानि – शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिषाणि) मध्ये मीमांसायाः प्रवेशो न दृश्यते खलु इति चेत् ,

उच्यते। वार्तिककारश्लोकाभिप्रायेण मीमांसाया वेदाङ्गत्वं यत् भवता आपाद्यते, तत् इष्टापत्त्यैवास्माभिः स्वीक्रियते। इदं मीमांसायाः प्रसिद्धं पारिभाषिकमङ्गत्वं वार्तिककारोक्तम्। तदस्त्येव मीमांसायाः वेदं प्रति। शिक्षाकल्पादीनां लोके व्यवह्रियमाणानां वेदाङ्गानां तु, केवलम् उपकारकत्वमात्रेण वेदाङ्गत्वव्यवहारः। मीमांसायाः अङ्गत्वं, "परोद्देशप्रवृत्तपुरुषकृतिविषयतया विहितत्व"रूपम्। तच्च दर्शपूर्णमासौ प्रति प्रयाजादीनां यादृशं, तादृशमेव। परन्तु दृष्टविधया इति विशेषः। धर्मज्ञानसाधनीभूतवेदप्राप्त्यै प्रवृत्तस्य पुरुषस्य कृतिविषयतया विहितत्वं मीमांसायाः अस्त्येव। "स्वाध्यायो

ऽध्येतव्यः" इति विधिना , प्रयोजनवदर्थज्ञानोद्देशेन स्वाध्यायाध्ययनं विदधता, वाक्यादर्थज्ञानस्य विचारमन्तरा अनुत्पत्त्या, विचाररूपस्य मीमांसाशास्त्रस्यापि, अर्थात् विहितत्वात्।

शिक्षाकल्पादिवेदाङ्गानां तु तादृशविचारद्वारैव वेदाङ्गत्वम्। तथाहि ; प्रत्येकमपि वेदाङ्गस्य मीमांसाधिकरणेषु साक्षादुपयोगो दृष्टः। यथा "तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य" इत्याद्यधिकरणेषु व्याकरणस्य। प्रग्रथनाधिकरणे छन्दःशास्त्रस्योपयोगः। "यस्य हविर्निरुप्त" मित्याद्यधिकरणे ज्योतिःशास्त्रस्योपयोगः इत्यादि। अत्यल्पमिदमुदाहृतम्। एतद्विषये उदाहरणानां सकलमीमांसकप्रसिद्धत्वात्।

ननु वर्णोच्चारणनियमबोधकस्य शिक्षाशास्त्रस्य वेदस्वरूपे एव उपकारकत्वस्य सत्त्वात् , मीमांसाद्वारा तदुपयोगः न कल्पनीयः इति चेत् , न। तस्यापि वेदस्वरूपविचारकाले एवोपयोगः। वेदस्वरूपस्यापि उच्चारणद्वारा पुण्यसाधनत्वात् धर्मत्वमस्त्येव इति कृत्वा तद्बोधनं मीमांसायाः अविषय इति न हि वक्तुं शक्यम्। किञ्च वेदस्वरूपस्य गुरुमुखात् ग्रहणकाले गुरूच्चारणमनुकुर्वतः माणवकस्य न हि शिक्षाशास्त्रापेक्षा अस्ति। अतः वेदस्वरूपसन्देहे सति विचारापेक्षायामेव शिक्षाशास्त्रस्य अपेक्षा इति कृत्वा तस्यापि मामांसोपयोगित्वं तथा वेदोपकारकत्वमिति नानुपपन्नम्।

ननु मीमांसाधिकरणेषु कदाचित् कल्पसूत्राणामपि विषयीकृतत्वात् , कल्पसूत्राणां च षड्वेदाङ्गेषु प्रविष्टत्वात् मीमांसायाः कल्पसूत्राङ्गत्वमपि क्वचित् आपतति इति न च वाच्यम्। वेदार्थविचारार्थं प्रवृत्तेषु मीमांसाधिकरणेषु कल्पसूत्राणामपि विषयतया प्रवेशो न कल्पसूत्रत्वेन रूपेण, किन्तु तन्मूलभूतश्रुत्यनुमापकत्वेनैव। अतः तादृशकल्पसूत्रमूलभूतश्रुत्यर्थनिर्णयव्याजेनैव कल्पसूत्रार्थनिर्णयोऽपि मीमांसकैः क्रियते इति भावः। मूलश्रुतेः प्रत्यक्षाभावे तन्मूलककल्पसूत्रादेरेव विषयतया उदाहर्तुं शक्यत्वात्।

मीमांसाद्वारा वेदोपकारकाणां शिक्षाकल्पादीनां वेदाङ्गत्वव्यवहारो वर्तते ; साक्षात् धर्मप्रमाकरणीभूते वेदे व्यापाररूपायाः मीमांसायास्तु वेदाङ्गत्वव्यवहारो नास्तीति कथं युज्यते इति चेत् , वेदरूपस्य अङ्गिनः मीमांसारूपस्य अङ्गस्य च अत्यन्तभेदेन लोके प्रतीतिव्यवहारयोरभावात् अभेदोपचारे जाते, मीमांसा वेदाङ्गमिति व्यवहारो लोके नाभवदित्येवोत्तरम्। यथा वा दर्शाद्यङ्गेषु प्रयाजेषु अनुष्ठीयमानेषु ; "किमत्रानुष्ठीयते" इति पृष्टे "दर्शोऽनुष्ठीयते" इत्येव व्यवहारो भवति अङ्गाङ्गिनोरभेदोपचारवशात् , तद्वत् , मीमांसाया वेदस्वरूपेणाभेदो- पचारादेव वेदाङ्गत्वेन लोके व्यवहारो न दृश्यते इति ब्रूमः।

इदमभेदोपचारकल्पनम् अभियुक्तसम्मतमपि। उक्तं हि वार्तिककारैः उपमाप्रदर्शनपूर्वकम्। "यथा लवणभूमौ पतितो दण्डः क्रमेण लवणमयः सञ्जायते तथा मीमांसा वेदमयी एव अभूत्" इति वार्तिके। तत्सिद्धं, मीमांसासहकृतेनैव वेदेन धर्मप्रमा सम्पादनीया इति। यथाहुः--

**"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः"** इति।

अत्र तर्कपदेन गौतमीयतर्को नोक्तः, अपि तु जैमिनीय एवेति स्पष्टम्। तस्यैव वाक्यार्थनिर्णयोपयोगित्वात्। "धर्मोपदेशः" इत्यत्र उपदेशपदेन वाक्यप्रमाणस्यैव परिगृहीतत्वात्। धर्मस्य शब्दैकवेद्यत्वात् वेदेनैव तस्य बोधनीयत्वात्।

ननु व्याकरणनिरुक्तादिशास्त्रैः पदार्थज्ञानसंभवे तद्द्वारा वाक्यार्थज्ञानस्यापि सम्भवात् मीमांसाशास्त्रारम्भो व्यर्थ इति चेत् , न। पदार्थो न वाक्यार्थः। पदतात्पर्यमन्यत् , वाक्यतात्पर्यमन्यत्। अतः शास्त्रान्तरेण यत्किञ्चिद्वाक्यार्थज्ञानसम्भवेऽपि वाक्यतात्पर्यविषयीभूतस्य वाक्यार्थस्य, निर्णयात्मकं ज्ञानं मीमांसाशास्त्रोक्त- युक्त्यनुसन्धानं विना नैव भवितुमर्हति इत्यतः तदर्थं जैमिनीयमेवोपास्यं सुधीभिः। निस्सन्दिग्धं हि अर्थज्ञानं निष्कम्पप्रवृत्तिकारणं अनुष्ठानेषु उपयुज्यते। इदं च अनुष्ठानपर्यवसायि शास्त्रम्। अतः निर्णीयमानार्थस्य अनुष्ठानद्वारा सिद्ध्यर्थं धर्मः परम्परया शास्त्रस्य प्रयोजनं भवति।

तत्र लौकिकैः कैश्चिदुक्तं ; लोकव्यवहारार्थमपेक्षिताः अनेकाः युक्तयः मीमांसाधिकरणेषु प्रतिपादिताः सन्ति, अतः तदनुसन्धानेन लौकिकव्यवहारेऽपि वैचक्षण्यं भवति, न्यायशालायां न्यायवादिभिरपि इमाः युक्तयः लौकिकीकृत्य प्रयोक्तुं शक्यन्ते इति ;

तन्न मनोरमम्। मीमांसाशास्त्रे हि प्रयुज्यमानासु युक्तिषु अनेकाः शास्त्रैकगोचराः। अनेकाः लोकसाधारणाः। "गुणे त्वन्याय्यकल्पना" "प्रबलाश्रितस्य दुर्बलस्य प्राबल्यम्" इत्यादयः लौकिकयुक्तयः अस्माकं दैनन्दिनिकव्यवहारे स्वभावत एव अनायासेन अस्माभिः उपयुज्यमानाः सन्ति। अतः तासां युक्तीनां पुनः मीमांसाशास्त्रात् लोकव्यवहारं प्रति अतिदेशः नैवापेक्षितः। परन्तु व्यवहारोपयोगित्वेन प्रसिद्धानाम् आसां युक्तीनां वाक्यार्थनिर्णयप्रक्रियायां कश्चिदुपयोगः स्यादिति न केनापि सम्भावितम्। मीमांसाशास्त्रेण तु तत् प्रदर्शितम् इति इदमेव महत्त्वं जैमिनीयस्य।

इदं च शास्त्रं ग्रन्थतः पौरुषेयं तथापि अर्थतः अनाद्येव। इमाः युक्तयः अनादय इत्यर्थः। एवञ्च आभिः युक्तिभिः सहितेनैव वेदेन सर्वस्मिन्नपि काले धर्मो बोधितः। अद्यापि बोध्यते। प्रायेण इमाः युक्तयः अपौरुषेयवाक्यतात्पर्यनिर्णयायैवोपयुज्यन्ते।

# मोक्षधर्मपर्वणि योगस्य अन्तरङ्गसाधनानि

**Anuradha S.**
Research Scholar
KSRI
9884337360

आयुरारोग्याभिवृद्ध्यै समग्रे जगति योगः प्रसार्यमाणः अभ्यस्यमानश्च वर्तते। आर्थिकदृष्टिमद्भिः स्वार्थपरैः महर्षिपतञ्जलिना निर्दिष्टस्य अष्टाङ्गयोगस्य लक्षणम् अविज्ञायैव योगनाम्ना विभिन्नाः प्रक्रियाः शिक्ष्यन्ते। मोहन्जधार-हरप्प-उत्खननात् लब्धासु मुद्रासु दृश्यमानेभ्यः आसनेभ्यः योगस्य प्राचीनत्वं सुस्फुटं ज्ञायते। यद्यपि योगसम्प्रदायस्य प्रवर्तकः पतञ्जलिरेवेत्यभिप्रायः असाधुः (यतः ऋग्वेदादारभ्य योगस्य प्राचुर्यं द्रष्टुं शक्नुमः) तथापि पातञ्जलमेव आधारत्वेन आसाद्यते विद्वद्वरैः। पञ्चमो वेदः इति आद्रियमाणे महाभारतेऽपि योगस्य उल्लेखनं दरीदृश्यते। अत्र तावत् शान्तिपर्वस्थमोक्षधर्मपर्वणः संयमस्य महिमा सङ्कलय्य विव्रियते।

धर्मज्ञः सत्यवाक्यः युधिष्ठिरः खेदकारिणं संसारसागरं तरितुमक्षमः सन् तत्कृतव्यथामपनेतुं जिज्ञासति। दुःखस्य मूलकारणम् अविद्यैव इति हेतोः अविद्यारूपतमोऽन्धकारं नाशयितुं ज्ञानदीप्तेः प्रज्वलनाय च विभिन्नतत्त्वविचारान् उपस्थाप्य योगमार्गाश्रयकः कश्चन पन्थाः *महाभारते* शान्तिपर्वस्थे मोक्षधर्मपर्वणि उपदिश्यते। तत्र ध्यानस्य महिमा सङ्कीर्त्यते।

अष्टाङ्गयोगविवरणे धारणाध्यानसमाधयः अन्तरङ्गसाधनत्वेन निर्दिश्यन्ते पतञ्जलिना। योगसूत्रे (३.१) "देशबन्धश्चित्तस्य धारणा" इति धारणाऽभिधीयते। निगृहीतेन्द्रियः साधकः स्वदेहभागे वा स्वाभिमततत्त्वे वा मनः धारयतीति धारणा। श्रीकृष्णोऽपि भगवद्गीतायां (६.१२) धारणाविषये इत्थं वदति–

**"तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रमः। उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये"॥** इति ।

एकाग्रतापूर्वम् इन्द्रियधारणामुपदिशति।

मोक्षधर्मपर्वणि सप्तप्रकारिण्यः धारणाः दृश्यन्ते । यथा –

**"सप्त साधारणाः कृत्स्ना वाग्यतः प्रतिपद्यते। पृष्ठतः पार्श्वतश्चान्यास्तावत्यस्ताः प्रधारणाः"॥** २३६.१४

तस्मिन् यथोक्तधारणादेशे मनसः एकतानता ध्यानम् (*योगसूत्रम् ३.२)।* यदा मनः सम्यगाधीयते, एकाग्रीक्रियते तदा समाधिरित्युच्यते (*योगसूत्रम् ३.३)।* अविच्छिन्नतया उपर्युक्तसाधनत्रयेऽपि (धारणा-ध्यान-समाधयः) युगपदभ्यस्ते सति संयम इति तस्य अभिधा भवति (*योगसूत्रम्* ३.४)। योगसूत्रे विभूतिपादे विभिन्नविषयेषु संयमात् प्राप्स्यमानाः सिद्धयः प्रोक्ताः। महाभारतेऽपि धारणापूर्वकध्यानेन अवाप्स्यमानाः सिद्धयः सक्रमं प्रोच्यन्ते। तत्र पञ्चभूतेषु संयमः विशिष्य बोध्यते। पञ्चभूतसंयमबलात्

साधकः अव्यक्तं प्रतिपद्यते यतः पञ्चभूतानि ब्रह्मणः एव जातानि, परं ब्रह्मण्येव प्रलीयन्ते। अतः संयमबलात् मोक्षः उपलक्ष्यते इति सुज्ञायते। *योगसूत्रे "तज्जयात् प्रज्ञालोकः" (३.५)* इति संयमजयात् ऋतम्भरत्वं भवतीति समानमतं दृश्यते।

मोक्षधर्मपर्वणि गीताचार्यवचनानुसारं (भगवद्गीता १२.१८,१९) योगी प्रियाप्रियेषु निन्दास्तुतिषु च समः भवति इति योगिलक्षणं प्रदाय तस्य ध्यानवतो योगिनो "धीरः" इति अभिधा विधीयते यथा –

**"सर्वभूतसदृङ्मैत्रः समलोष्टाश्मकाञ्चनः। तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः"॥** (२३६.३८) इति।

अग्रिमेषु अध्यायेषु योगे स्थैर्यं प्राप्य ब्रह्मवित् कथं व्यवहरतीति लक्षणं सुविस्तरं द्रष्टुं शक्नुमः (२४०.२९-३१)। योगाग्निना तपस्तप्त्वा योगी नानाविधान् रूपान् धारयितुं सिद्धिमवाप्यापि ताः सिद्धीः तृणीकृत्य यथा समुद्रस्थं नावं नाविकः शीघ्रमेव तीरं प्रति नयति तथैव योगबलात् तत्त्वानि संज्ञाय समाधिद्वारा मनः आत्मनि प्रलीय परं धाम प्राप्नोति। सिद्धिभिः सः अविचलितः सन् अचिरादेव जरामरण-चक्राद्विमुच्यते इत्यर्थः(मोक्षधर्म. ३००.३४,३५)। अयमेव विषयः महर्षिणा पतञ्जलिनापि अङ्गीक्रियते (३.५२)।

इदं सुनिश्चितं वर्तते यत् कायेन, मनसा, वाचा वा अभ्यस्तानुचितव्यवहाराः संस्काररूपेण आत्मनि प्रलीनाः सन्तः जीवम् अनेकजन्मसु अनुयान्ति। तत्प्रतिकूलार्थं मनोनिग्रहार्थं च श्रवण-मनन-निदिध्यासन-संयमादयः उपदिष्टाः वर्तन्ते। यतो हि बहूनां जन्मनां वासनावायुः मनुष्यजीवनं वहति इत्यतः अविद्याचक्रप्रवर्तकं संस्कारवीजं नाशनीयम्। धारणाध्यानबलाद् एषां संस्कारबीजानां नाशः सम्भवतीति मोक्षधर्मपर्वणि भीष्मवचनानि बोधयन्ति। नाभि-कण्ठ-मस्तक-हृदय-वक्षस्थल-नेत्र-श्रोत्रादिषु स्थानेषु धारणां कृत्वा स्वात्मना आत्मानं यः युङ्क्ते सः स्वकीयं संस्कारमलं दग्ध्वा द्रुतं विमुच्यते इति बोध्यते। (मोक्षधर्मपर्व-३००.३९,४१) यथा नाविकस्य सक्रियतां विना नावः प्रयोजनं नास्ति तथैव संयमबलं विना बन्धमोक्षः नास्तीति सुबोधयति । योगपुरुषः ब्रह्मैव निर्विशङ्कं भवतीति प्रमाणयति ।

योगसूत्रे **"योगः चित्तवृत्तिनिरोधः"** (१.२) इति पतञ्जलिमहर्षिणा योगस्य निर्वचनं दीयते । चित्तवृत्तिनिरोधः समाध्यवस्थां प्रति प्रैतीति हेतोः समाध्यर्थकेन युज्-धातुना योग-शब्दस्य उत्पत्तिरिति विदुषां मतम् । योगसम्बन्धि कृत्यं व्यासमहर्षिणा शुकाय (मोक्षधर्मपर्वणि चत्वारिंशदधिक-द्विशततम अध्याये) वर्ण्यते। तत्र उपर्युक्तानुसारं चित्तवृत्तिनिरोधकः योगो हि तेन सम्बोध्यते। योगसूत्रे दुःखजाः मनोवृत्तयः क्लेशाः इति अभिधया आख्यायन्ते । तेषां दमनार्थं "प्रतिपक्षभावनम्" इत्येका युक्तिर्निर्दिश्यते (२.३३)। क्रोधवृत्त्याः प्राचुर्ये तद्विरोधवृत्तिर्दया बलादानेतव्येति प्रतिपक्षभावनम्। व्यासोऽपि योग-प्रतिबन्धकं दोषपञ्चकम् उपस्थाप्य तन्निवारणार्थं प्रतिपक्षभावनमेव बोधयति (मोक्षधर्मपर्व,२४०.४,७)।

ध्यानप्रकारः सुविस्तरं सक्रमं च प्रोच्यते व्यासमहर्षिणा । इन्द्रियाणि क्रमेण वशीकृत्य योगी मनसि स्थापयेत् । अथ सेन्द्रियं मनः बुद्धौ स्थापयेत् । ततः बुद्धौ स्थिरतां प्राप्य मनः शुचित्वं प्राप्नुयात् । तस्मात् साधकः धूमरहितवह्निरिव दीप्तिमान् सूर्य इव व्योम्नि द्योतमाना विद्युल्लतेव प्रकाशमानं यत् ब्रह्म तत् आत्मनि पश्यति (मोक्षधर्मपर्व,२४०.१८,१९) इति संयमबलात् ब्रह्मसाक्षात्कारविवरणं दृश्यते।

योगमार्गे प्राप्स्यमानानां सिद्धीनामाख्याने पतञ्जलिमहर्षिणा लक्ष्यप्राप्त्यै इमाः सिद्धयः उपसर्गाः इति प्रत्यादिश्यन्ते (३.३८)। तथैव मोक्षधर्मपर्वणि व्यासमहर्षिणापि अणिमाद्यष्टसिद्धयः योगिना अवाप्यन्ते एव, तथापि ताः अनादृत्य आत्मनि मनसः एकाग्रता कार्येति उच्यते (मोक्षधर्मपर्व,२४०.२४)। केनोपायेन मनः संनियन्तुं शक्येतेति विचार्य तान् उपायान् आत्मसात् कुर्वीतेति उपदेशो दृश्यते।

एवं सततयुक्तेन योगिना षण्मासाभ्यन्तरे ब्रह्मसाक्षात्कारः लभ्येतेति कालनिर्देशोऽपि दीयते। "गहना कर्मणो गतिः"(४.१७) इति श्रीकृष्णवचनानुसारं कस्यापि मानवस्य वासनाबलं कर्मणः फलञ्च दुर्ज्ञेयम्। तस्मात् कस्यापि साधकस्य ब्रह्मवित्त्वं कदा सम्भवेदिति ज्ञानम् अतीव दुर्लभमेव। किन्तु व्यासमहर्षेः "षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्तते" (२४०.३२) इति कालनिर्देशः अध्येतॄन् विस्माययति। तथा योगाचरणे श्रद्धान्विताः कस्मिन्नपि वर्णे जन्म प्राप्तवन्तः स्युः अथवा नार्यो वा भवन्तु ते परमां गतिं प्राप्नुयुरेवेति व्यासभगवान् प्रतिश्रृणोति (२४०.३४)।

ब्रह्मविद्यामवाप्तुं जरामरणचक्रात् मुक्तिं प्राप्तुं च परो मार्गः योग एव इति सङ्कीर्त्य सः दुर्गमोऽपीति सावधानपूर्वकं प्रबोधनं क्रियते। अतिकुशलो हि अस्मिन् मार्गे व्रजति यतः अयं पन्थाः घोरवनसमः इति भाययत्यपि। योगमार्गः बहुसर्पकण्टक-दावानलदग्धवृक्ष-परिवृतः तस्कराकीर्णश्च। इह विरलाः एव कुशलेन परिव्रजन्ति। असिधाराव्रतमिव योगः चित्तशुद्धेरवाप्तिपर्यन्तमेव अतिकठिनः। ततः परं यथाविधि धारणादीनां अभ्यासेन जरामरणचक्रात् योगी विमुच्यते अचिरादिति योगमार्गः प्रकीर्त्यते (३००.५४-६२)।

महाभारते प्रतिपदमपि सत्यस्य प्रतिभां दर्शयति। चतुर्विधपुरुषार्थगर्भितेऽस्मिन् ग्रन्थे लोकविषयाः सर्वे सन्ति, अत्र यत्किञ्चिन्नास्ति तल्लोके नास्तीत्यर्थः इति धर्मग्रन्थस्य महाभारतस्य गभीरताप्रतिपादने वैशम्पायनमहर्षिः जनमेजयं ब्रवीति । यथा--

**"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" ॥**
(आदिपर्व १६२.५२) इति ।

ग्रन्थोऽयं न केवलं धर्मग्रन्थः अपि तु अद्वितीयाध्यात्मिकविज्ञानबोधकः योगप्रतिपादकोऽपि इति मोक्षधर्मपर्वणः सुज्ञायते। इदं पर्व धारणा-ध्यानबलेन तैलधारावत् सततविवेकसिक्तं मनः अवाप्तुं कुललिङ्गादिभेदं विना सर्वान् मानवान् प्रेरयति । जीवन्मुक्तिसाधकं संयमं क्रमेण प्रकाश्य प्रकृतितत्त्वानि सन्दर्श्य तुरीयं पुरुषार्थं प्राप्तुं नैकान् योगमार्गान् उपदिशतीति शम् ॥

# अन्नप्राशनं तद्वैशिष्ट्यं च

**Govindan Embrandiri K.**
Ph.D. Student
SCSVMV University,
Enathur, Kanchipuram 631561
Tamil Nadu

मनुष्यजन्मनि अन्नप्राशनं प्रधानतमं कर्म। स्तन्यात् पक्वभोजनपरिवर्तनम् एव तत्र प्राधान्यम्। पक्वान्नस्य जठराग्निक्षेपणम् अथवा अन्नरसस्य आस्यरससंयोगः। अन्नप्राशने अन्नस्य उदरप्रवेशस्य आवश्यकता नास्ति। केवलं उच्छिष्टीकरणमेव। दन्तदर्शनात्पूर्वम् उच्छिष्टदोषः नास्ति। दन्तस्पर्शनेनैव उच्छिष्टदोषः। दन्तदर्शनकाले अन्नप्राशनं कार्यम्। पक्वान्न इच्छा अपि दन्तदर्शनकाले आगच्छति इति सांप्रदायिकः। शरीरस्य पोषणार्थं स्तन्यापेक्षया आहारान्तराणां आवश्यकता अस्ति एव। तत्तु सर्वं षष्ठे मासि सम्भवति। एवं च दन्तदर्शनं पक्वान्नभोजनेच्छा, आहारान्तरावश्यकता च षष्ठे मासि सम्भवति इत्यर्थः।

तत्र तावत् प्रथमम् अन्नप्राशनकालनिर्णयः। "षष्ठे मास्यथ बालान्नं कुर्यात्" इति आचारसंग्रहे। जन्मदिनादारभ्य पञ्चाशदधिक-एकशतदिनादारभ्य (१५०) अशीत्युत्तर एकशतदिन-पर्यन्तं (१८०) त्रिंशत् दिनानि अन्नप्राशने विहितदिनानि सन्ति। अन्नप्राशने सावनः सम्मतः कालः। पुरुषप्रजानां षष्ठात् समेषु मासेषु षष्ठ, अष्टम, दशम, द्वादशमासेषु कर्तुं व्यवस्था उच्यते मुहूर्तचिन्तामणिकारैः। स्त्रीप्रजानां पञ्चम, सप्तम, नवम, एकादशमासेषु करणीयम्। अन्नप्राशनं तु मासकर्म, तस्मात् द्वादशमासात्पूर्वमेव करणीयम्। अचारसंग्रहे बालिकाबालकानां षष्ठे मासि एव अन्नप्राशनं उक्तम्। सप्तमे मासि निषेधः। अनन्तरं द्वादशात्पूर्वं कर्तुं व्यवस्था वर्तते कालातीतत्वात्। सकाले अन्नप्राशनं षष्ठे मासि अनन्तरं सप्तमे मासि निषेधः इति ज्ञायते। तदुक्तं संग्रहेऽपि –

**ततोऽन्नप्राशनं मासि षष्ठे कुर्याद्यथाविधि। अष्टमे मासि वा कार्यं यच्चेष्टं मङ्गलं कुले।** इति।

अत्र तु सौरमासः चान्द्रमासः अपि स्वीकर्तव्यः। तदुक्तम् –

"मासोऽत्र सावनस्त्विष्टश्चान्द्रोप्यत्रापदीष्यते"। "सौरोऽपि मुख्य उदितः"। षष्ठमासारम्भः सौररीत्या चान्द्ररीत्या सावनरीत्या च गणनां करोति चेत् दिनव्यत्यासः सम्भवत्येव। तत्र

सावनेन षष्ठमासादारभ्य अन्नप्राशनं मुख्यमिति ज्ञायते। एवं च षष्ठे मासि अशनं कार्यम्। तत्रापि सावनं मुख्यं, सौरो मध्यमः, चान्द्रोऽधमः। मासकार्यत्वात् अधिमास-गुरुशुक्रमौढ्यादयः न चिन्तनीयाः।

## तिथिशुद्धिः

अन्नप्राशनतिथि निर्णये मुहूर्तचिन्तामणिकारैः एवमुक्तम् – "रिक्तानन्दाऽष्टहरिदिवसमथो" इत्यनेन चतुर्थी, नवमी, चतुर्दशी, प्रथमा, षष्ठी, एकादशी, अष्टमी, अमावास्या, द्वादशी च। अत्र नारदवचनन्तु -

**रिक्ता तिथिक्षयं नन्दां द्वादशीमष्टमीमपि। त्यक्त्वाऽन्यतिथयः श्रेष्ठाः प्राशने शुभवासराः।** इति।

काश्यपवचनन्तु नवान्नप्राशने –

**द्वादशीमष्टमीं रिक्तां नन्दां चैव दिनक्षयम्। सूर्यार्किभौमवारांश्च त्यक्त्वाऽन्यशुभवासरे॥** इति।

अत्र द्वादशी सर्वत्र पारणादिनरूपविशेषभोजनदिनम्। तत्र नवान्नप्राशने को दोषः इत्याकांक्षायाम् उच्यते हरिवासरो नाम पुण्यकालः द्वादशीसम्बन्धः। तत्तु एकादश्यन्ते पञ्चदशघटिका द्वादश्यादिम-पञ्चदशघटिकाकालः हरिवासरः इति प्रसिद्धः। सः व्रतकालः। हरिवासरप्रमाणन्तु -

**द्वादश्याः प्रथमो योऽंशः एकादश्याश्च योऽन्तिमः। हरिवासरसंज्ञोऽयं कालोन्नेऽतीव गर्हितः॥** इति।

अत्र अन्नप्राशने हरिवासरस्य दोषत्वमुक्तम्। तत्तु -

**एकादश्यामुपोष्यायां बालान्नं न तु शोभनम्। आपद्यपि न कुर्वीत तत्रापि हरिवासरे॥** इति।

**द्वितीया च तृतीया च पञ्चमी सप्तमी तथा। त्रयोदशी च दशमी प्राशने तिथयः शुभाः।**

इति तिथिशुद्धिः चिन्तामण्यादिषु प्रोक्ता। मुहूर्तपदवीकारैः केवलं हरिवासरोक्ततिथिद्वयमेव वर्जनीयम् इत्युक्तम्।

## वारशुद्धिः

अनन्तरं वारशुद्धिः बालान्ने सौम्यवाराः शुभाः इति। तत्र बुधगुरुशुक्रवाराः प्रशस्ताः चन्द्रः बली चेत् चन्द्रवारोऽपि शुभः। क्वचित् सूर्यगुरुबुधवाराः प्रशस्ताः, अन्ये निषिद्धाः इति वदन्ति। तदुक्तम् -

**शशिशुक्रे च मन्दाग्निः शनौ भौमे बलक्षयः। बुधार्कगुरुवारेषु प्राशनं हि शुभावहम्॥**

**"पापवारस्तु मध्यमः"** इति कालदीपिकायाम्। **"सर्वेषु चापि वारेषु क्रियते बालभोजनम्"**।

## नक्षत्रशुद्धिः

नक्षत्रशुद्धौ तु बालान्नप्रदाननिषिद्धनक्षत्राणि भरणी, कृत्तिका, आर्द्रा, आश्लेषा, मघा, पूर्वफल्गुनी, विशाखा, ज्येष्ठा, मूला, पूर्वाषाढा, पूर्वाभाद्रा एते एकादश तारा बालान्ने वर्ज्याः। तदुक्तं श्लोकपादेन मुहूर्तपदव्याम् – "ज्येष्ठार्द्रायमकृत्तिकोरगमघापूर्वाविशाखासुराः" इति। अन्ये षोडशताराः शुभाः। तदुक्तम् –

**अन्नेऽदितिद्विविष्णुत्रिहस्तत्र्युत्तरपूषणः। रोहिणीद्व्यश्विमित्राश्च षोडशैताः शुभाः स्मृताः॥**

**पुष्यादिती रोहिणीन्दू स्वात्यनूराधवारुणाः। तिस्रस्तिस्रश्चोत्तराद्या बालान्ने तारकाः शुभाः॥**

एवञ्च अश्विनी, रोहिणी, मृगशिरः, पुनर्वसू, पुष्यः, उत्तरफल्गुनी, हस्तः, चित्रा, स्वाती, अनूराधा, उत्तराषाढा, श्रवणः, धनिष्ठा, शतभिषक्, उत्तराभाद्रा, रेवती एते षोडश ताराः बालान्ने प्रशस्ताः इति ज्ञायते। तदुक्तम् –

**"नक्षत्रैः स्यात्स्थिराख्यैः समृदुलघुचरैर्बालकान्नाशनं सत्"** इति।

शास्त्रे बालान्नविहितनक्षत्राणि बालान्नाविहितनक्षत्राणि इति विभागद्वयं प्रोक्तम्। तस्मात् पक्षान्तरं नास्ति। एवं च कालनिर्णये तिथिवारनक्षत्राणि च निरूपितानि सन्ति।

## लग्नशुद्धिः

तत्र तावत् लग्नशुद्धिः उच्यते। अन्नप्राशनलग्नात् दशमभावे ग्रहाभावः आवश्यकः। दशमभावशुद्धिः अन्नप्राशनस्य विहितः इति ज्ञायते। "खेऽखिलाः" वर्ज्याः इति मुहूर्तपदवीकारः। "दशमस्था ग्रहाः सर्वे" इति। "खशुद्धे लग्ने" इति चिन्तामणिकारः। **"दशमे शुद्धिसंयुक्ते शुभलग्ने शुभांशके"** इति नारदः। एवं च अन्नप्राशनलग्नात् दशमभावे ग्रहाभावः प्रोक्तः। पदवीकारसंग्रहादिकारश्च अष्टमे कुजः वर्जनीयः इति वदति। लग्ने चन्द्रः, चतुर्थे गुरुः, नवमे चन्द्रबुधौ, एवं चन्द्रवत् सूर्योऽपि लग्ने वर्जनीयः इति वचनमस्ति। तदुक्तम् –

**लग्नेऽर्केन्दू मृतौ भौमो धर्मे सौम्यनिशाकरौ। दशमस्था ग्रहाः सर्वे हिबुके देवपूजितः॥**

**विशेषतो वर्जनीया मृत्युदा दुखदाश्च ते।**

चिन्तामणौ - **"केन्द्रत्रिकोणसहजेषु शुभैः खशुद्धे लग्ने"** इति दशमशुद्धिः अङ्गीक्रियते। चन्द्रबुधौ शुभावपि नवमे वर्जनीयौ, गुरुः शुभोऽपि चतुर्थे वर्ज्यः, तत्रापि चन्द्रस्य लग्नषष्ठाष्टमराशिषु वर्जनीयत्वं उक्तम्। **"लग्नाष्टषष्ठरहितं शशिनं प्रशस्तम्"** इति।

**"व्यन्त्यारिनिधनस्थेन चन्द्रेण प्राशनं शुभम्"** इति नारदः। कर्तृदोषप्रकरणेऽपि **"षष्ठाष्टमान्त्येन्दु"**रिति प्रोक्तम्। काश्यपस्तु - "अलग्ननिधनान्त्यास्थानस्थेन हिमांशुना" इति। एवं च बहुवचनपरिशीलने दशमे ग्रहाभावः। लग्नषष्ठाष्टमान्त्येषु चन्द्रस्थितिः, अष्टमे कुजः वर्जनीयश्च। चतुर्थे गुरुः, नवमे चन्द्रबुधौ च वर्जनीयाः इत्यत्र वचनबहुत्वं न दृश्यते प्रायशः। सूर्यस्थितात् षष्ठराशिमारभ्य सायंकालसन्ध्यापर्यन्तम् अवश्यं वर्ज्यते। मध्याह्नात् सायंकालपर्यन्तं सूर्यः लग्नात् षष्ठे सप्तमे अष्टमे च सञ्चरति। षष्ठसप्तमाष्टमसूर्यस्य दोषत्वं अस्त्येव। नवमेऽपि सूर्यः निन्द्यः इति वचनं वर्तते। अर्कात् पञ्चमराशिस्तु मध्यमत्वेनापदि गृह्यते। एवञ्च सूर्यस्थित राशिं विहाय द्वितीय-तृतीयराशिद्वयं प्रशस्तम्। अनन्तरं नवम दशम एकादश द्वादश राशयः अपि रात्रिकाले अन्नप्राशनं करोति चेत् प्रशस्ताः सन्ति। लग्नशुद्धौ मेषवृश्चिकमीनाः वर्जनीयाः। "भौमक्षेत्रझषेति"मुहूर्तपदव्याम्। "तथा मीनमेषालिकम्" च इति काश्यपः। "न मेषझषवृश्चिकाः" इत्यपि। अन्ये नवराशयः शुभाः। **"भौमक्षेत्रं च मीनं च न कादाचित् शुभप्रदौ"** इति। अन्ये नवराशिषु मिथुनराशिः मध्यमत्वेन स्वीक्रियते। तदुक्तं माधवीये –

**"अष्टौ भुक्तिषु राशयोऽतिशुभदा वीणाधरो मध्यमः"** इति। एवम् अर्धरात्रिसमयः वर्जनीयः। **"रात्रौ मुहूर्तोऽष्टमो यः सोऽपि निन्द्यो विशेषतः"** इति वचनमत्र प्रमाणम्। बहुषु देशेषु गरलद्रेक्काणाः विषद्रेक्काणाः वर्ज्यन्ते। द्रेक्काणो नाम राशित्रिभागः। एकस्मिन् राशौ द्रेक्काणत्रयं वर्तते। तदुक्तम् – **कीटेन्त्याघटकोवीणातुलामीनेषु मध्यमः। आद्योऽन्येषु दृगाणोऽसौ विषाख्यो मृत्युदः शिशोः॥** इति।

एवञ्च वृश्चिकान्त्यद्रेक्काणः, कुम्भवृषभमिथुनतुलामीनराशिषु द्वितीयद्रेक्काणः, मेषकर्कटक-सिंहकन्याधनुर्मकरराशिषु प्रथमद्रेक्काणः विषद्रेक्काणाः इति प्रसिद्धाः सन्ति। विषद्रेक्काण-ज्ञानार्थम् उपायान्तरम् उक्तम्। अक्षरसंख्यानुसारं द्वादशराशिषु यथाक्रमं - **पा ठा त्रि क ट्ट को रो गी प थ्या रा त्री रिति क्रमात्।** विषद्रेक्काणानि बालान्ने अतीव वर्ज्यानि। बालकस्य आद्यजन्मनक्षत्रं वर्जनीयम्। अन्यद्वयं ग्राह्यम्। "नामान्नोपनयेष्वाद्यं वर्जयेत् जन्मभम्" इति पञ्चाशिकायाम्।

अत्र केचन बालान्नयोगाः गुरुणा वक्ष्यन्ते।

**लाभे षष्ठे तृतीये वा चापे बलिनि संस्थिते। शुभे बलिनि केन्द्रस्थे योगोऽयं प्राशने शुभः॥**

**लग्ने शुक्रो धने चान्द्रिस्तृतीये च रवौ स्थिते। एकादशे कुजो वार्किर्योगोऽयं प्राशने शुभः॥**

**लग्ने शुक्रो गुरुः केन्द्रे रविरेकादशे स्थितः। व्ययस्थे चन्द्रतनये योगोऽयं प्राशने शुभः॥**

**शुभांशस्थस्य चन्द्रस्य त्रिकोणस्थो बृहस्पतिः। लग्नात् केन्द्रगते शुक्रे योगोऽयं प्राशने शुभः॥**

नारदः -

**लाभद्वादशलग्नस्थाः सूर्यसौम्यसिताः क्रमात्। ग्रहः कर्मगतः कश्चित् भुक्तियोगः प्रकीर्तितः॥**

**लग्नार्थभ्रातृदेहस्था जीवाच्छार्कबुधाः क्रमात्। अन्नप्राशनयोगोयं दशमे ग्रहवर्जिते॥**

**सप्तमाष्टमधर्मस्थाः क्रमात् जीवाच्छभास्कराः। दशमे न ग्रहः कश्चित् भुक्तियोगोऽयमुत्तमः॥**

**लग्ने चतुर्थे वाऽस्ते वा गुरुः कश्चित् ग्रहो भवे। दशमं सर्ववर्ज्यं चेच्छुभं बालान्नभोजने॥** इति। भवम् एकादशम्। गुरुः बृहस्पतिः।

**एषु भावेषु योगेषु स्थिताः सर्वे ग्रहास्तदा। भावदोषं न दद्युस्ते योगोक्तं लभते फलम्॥** इति।

अत्रिमते भोजने अविहितस्थानान्यपि उक्तम्। **"श्रयायुष्कामो न भोजयेत्"** इति। तदुक्तम्– **शय्यावेत्रासनद्वारज्योत्स्नाकास च धूसरे।**

**सन्धौ मार्गे च सन्ध्यायां श्रयायुष्कामो न भोजयेत्॥** इति।

अन्नप्राशनकर्मणि विशेषस्तु - अन्नप्राशनकर्मणि अन्नसूक्तेनैव आज्याहुतिः "अहमस्मि प्रथमजा ऋतस्य" इत्यादि अन्नसूक्तं प्रतिमन्त्रं स्वाहाकारं संयुज्य आहुतिः कर्तव्या। सर्वालङ्कारविभूषित बालकस्य "अन्नदेवताप्रीयन्त्वां" इति संप्रार्थ्य "दधिक्राव्णो" इत्यादि मन्त्रैः बालकान्ने प्रोक्षणीये। मात्रा एव पत्रप्रक्षालनं कार्यम्। अनन्तरं अन्न उपदंशादीनि पत्रे निक्षिप्य अन्नोपरि रजतपात्रं स्थाप्य तत्र दधि आज्यं मधु तीर्थं च संयुज्य पवित्राङ्गुलि अङ्गुष्ठसंयोगमध्ये अन्नं संस्थाप्य रजतपात्रस्थ घृतादीन् संस्पृश्य मन्त्रपूर्वकं बालकस्य आस्ये संस्पर्शनीयम्। रसस्य जिह्वास्पर्शनं तत्र विहितम्। तत्र षण्मन्त्राः सन्ति षड्रसप्रतीकाः। षड्वारं प्राशनम् आवश्यकम्। तत्र षड्ऋचः सन्ति। ऋचान्तेषु "भूर्भुवस्सुवरपान्त्वौषधीनां रसं प्राशयामि शिवास्त आप ओषधयस्सन्त्वनमीवास्त आप ओषधयस्सन्त्वु"। अत्र मन्त्रपूर्वकं केवलम् अन्नघृतमधुतीर्थान्येव उपयुज्यन्ते। षण्मन्त्रप्राशनानन्तरम् अन्योपदंशनानि संस्पृश्य एकवारम् , अनन्तरं मातृहस्तेन प्राशनम् , अनन्तरं अन्ये बन्धुवर्गैः इति अन्नप्राशनकर्मविधिः। तत्र प्राशनकर्मणः तत्तत् देशाचारमनुसृत्य तण्डुलस्वीकरणं विहितम्। (अष्ट-आढकाधिकसप्तमुष्टि प्रमाणं च प्रायशः १८०० ग्राम् ) एवञ्च बालकस्य प्रथमान्नप्राशनकर्म तु जीवनप्रवेशात्मककर्म।

॥ सन्तु मङ्गळशतानि॥॥ <u>शुभं भूयात्</u>॥

# स राजा राजसत्तमः

Pushkar P. Deopujari

Research Student

Pondicherry University

**कृष्णं वन्दे जगद्गुरुम्।**

महर्षिकृष्णद्वैपायनप्रतिभारत्नं महाभारतं वेदार्थसारसङ्ग्राहकत्वादेव 'पञ्चमो वेदः' इति आम्नायते इति सुविदितम्। महाभारतं काव्यं सदपि यथार्थवृत्तप्रतिपादकत्वात् सर्वतोभावेन सत्यम् इति नात्र मनागपि संशीतिः कार्या। अत एव इतिहासत्वेन तस्य परिगणनं कृतं परीक्षकैः। धर्मार्थकाममोक्षविषयकं यद्यत् जिज्ञासितं तत्थ्यं तत्सर्वम् इह लभ्यते एव। अत उक्तम् –

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥** इति।

महनीयोऽयं ग्रन्थः यथा वपुषा विशालः तथैव भावगाम्भीर्येण अर्थगौरवेण च। तस्य द्वादशं पर्व भवति शान्तिपर्व। उपदेशप्रधानेऽस्मिन् पर्वणि राजधर्म-कूटनीति-वर्णाश्रमधर्म-पुरुषार्थप्राप्त्युपायादयो विचाराः प्रपञ्चिताः। तत्र विशकलिततया विद्यमानानि सुभाषितरत्नकुसुमानि चित्वा राजगुणमाला काचित् प्रबन्धेऽस्मिन् निबध्यते।

तत्र आदौ राज्ञा कथं वर्तितव्यम् इति सदृष्टान्तम् उच्यते –

**यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगम्।**

**गर्भस्य हितमाधत्ते तथा राज्ञाऽप्यसंशयम्॥**

**वर्तितव्यं कुरुश्रेष्ठ सदा धर्मानुवर्तिना।**

**स्वं प्रियं तु परित्यज्य यद्यल्लोकहितं भवेत्॥**

राजधर्मानुशासनपर्वणि सप्तपञ्चाशत्तमे अध्याये राज्ञाम् अपेक्षिताः गुणाः सङ्कीर्तिताः सन्ति। अव्यसनी जितेन्द्रियः प्राज्ञः क्षिप्रकारी महामनाः क्षत्रियः राजा भवितुम् योग्यः। तत्रैव च अग्रे 'स राजा राजसत्तमः' 'स राजा राज्यमर्हति' इत्येतदन्तैः श्लोकैः राजगुणाः सङ्गृहिताः सन्ति। एवम् अन्यत्रापि तत्प्रतिपादकाः श्लोकाः दृश्यन्ते। यथा युधिष्ठिराय राजधर्मं बोधयन् भीष्मः उवाच –

**आर्जवेन च सम्पन्नो धृत्या बुद्ध्या च भारत।**

**यथार्थं प्रतिगृह्णीयात् कामक्रोधौ च वर्जयेत्॥**

राज्ञः वृत्तस्य कथनावसरेऽपि भीष्मो बोधयामास –

**दानशीलो भवेत् राजा यज्ञशीलश्च भारत।**

**उपवासतपःशीलः प्रजानां पालने रतः॥** - इति।

क्वचित् तु राज्ञे इह लोके परत्र च सुखविधायकानां षट्-त्रिंशद्गुणानां वर्णनपरः अध्यायः एव अस्ति। एवं च बहुषु स्थलेषु राज्ञा सम्पादनीयाः गुणाः प्रतिपादिताः सन्ति। तादृशगुणविशिष्टः राजा धर्मेण राज्यं पालयति चेत् चतुर्णाम् आश्रमिणां धर्मफलप्राप्तिः भवति। राष्ट्रस्य अभ्युदयश्च भवति।

एवं च समग्रे अपि शान्तिपर्वणि तत्र तत्र संकीर्णतया राजगुणाः निरूपिताः। तेषां गुणानां सङ्कलनं प्रबन्धेऽस्मिन् चिकीर्षितम् अस्ति। आधुनिककाले अपि ते गुणाः राजनेतृषु भवेयुः येन च अस्माकं भारतदेशः परमवैभवस्थितिं प्राप्नुयात्।

*************

# शान्तिपर्वण्युक्तदण्डव्यवस्था

**के.वि.सूर्यप्रकाशः**

Research Assistant, Sanskrit Academy

Osmania University, Hyderabad – 500 007

Phone: 9866498906, sanskritsurya@gmail.com

राजनीतेः राजशास्त्रस्य वा आरम्भकाले प्रायः सर्वेषां विचारकाणां विबुधानां पुरतः एको जटिलः प्रश्नः उदेति। यथा – एतद्विषयप्रतिपादकस्य शास्त्रस्य किं नाम भवेत्। राजनीतिः राजनीतिदर्शनम्, राज्यशास्त्रं, अर्थशास्त्रं, दण्डनीतिः, शासनशास्त्रमित्यादि। एतेषां शब्दानां सन्दर्भानुयायिन अर्थाश्च के इति चेत् पुराकाले वेदोत्तरवर्तिग्रन्थेषु राजशास्त्रीयविषयाणां कृते दण्डनीतिशब्दस्य प्रयोगो लभ्यते। यथा महाभारते –

**त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभ। दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः॥** म.शान्ति.41-21

एवमेव अग्नि – मत्स्य – विष्णुधर्मोत्तरपुराणादिष्वपि प्रयोगोऽयं दृश्यते। (अग्नि 224-29, मत्स्य 214-53, विष्णुधर्मोत्तर 2-71-23).

अपि च आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः। त्रयी वार्ता दण्डनीतिश्चेति मानवाः। त्रयी विशेषो ह्यान्वीक्षिकी वार्ता दण्डनीतिश्चेति बार्हस्पत्याः।

तस्यां हि सर्वविद्यारम्भाः प्रतिबद्धाः इति चतस्र एव विद्या इति कौटिल्यः।

**दण्डनीतेर्महत्त्वम्** – चतसृणां विद्यानां सम्प्रदायानुसारेण विभजनम् , तथैव सर्वासु विद्यासु दण्डनीतेः वैशिष्ट्यं व्यावहारिकत्वं च व्यज्यते। अतोऽत्रादौ दण्डनीतेः महत्त्वं तस्योपयोगश्च वक्तव्यः। कौटिल्यः दण्डनीतिं विधाय तस्याः फलं एवं वदति–

**आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधको दण्डः। तस्याः नीतिः दण्डनीतिः। अलब्धलाभार्था, लब्धपरिरक्षिणी, रक्षितविवर्धनी वृद्धस्य तीर्थेषु प्रतिपादिनी च।** (अर्थशास्त्रम् 1-4)

महाभारते –

**दण्डनीतिः स्वधर्मेभ्यश्चातुर्वर्ण्यं नियच्छति। प्रयुक्ता स्वामिना सम्यगधर्मेभ्यो नियच्छति॥** (म.शान्ति.61-73)

मनुस्मृतौ दण्डराजयोः पक्षं पुरः स्थाप्य दण्डः एव प्रशंसितः–

**स राजा पुरुषो दण्डस्य नेता शासिता च सः। चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः॥** (मनु.7-1)

**चातुर्वर्ण्ये स्वकर्मस्थे मर्यादानामसङ्करे। दण्डनीतिकृते क्षेमे प्रजानामकुतो भये॥**

**दण्ड्यं दण्डयति नो यः पापदण्डसमन्वितः। तस्य राष्ट्रे न सन्देहो मात्स्यो न्यायः प्रकीर्तितः॥**

(हिन्दूराज्यशास्त्र पृ.33-34)

अत्र मन्वादिभिः प्रयुक्तः दण्डः वेदमूलक एव यतः ऋग्वेदत एव शब्दस्यास्य ज्ञानमवगम्यते यत् दण्डनीतेराधारः।

**दण्डा इवेद्गो अजनास आसन्परिच्छिन्ना भरता अर्भकासः।**

**अभवच्च पुर एता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त॥** (ऋग्वेदः 7-33-6)

अथर्ववेदेऽपि शब्दोऽयं श्रूयते–

**यद्दण्डेन यदिष्वा यद्वारुर्हरसा कृतम्। तस्य त्वमसि निष्कृतिः सेमं निष्कृधि पुरुषम्॥** (अथर्व.5-5-4)

अत्र मन्त्रस्थदण्डशब्दस्य शास्त्ररूपोऽर्थः। अपि च कर्मकाण्डेषु यत्र यत्र दीक्षा ब्रह्मचर्य-संन्यासादिविधौ दण्डस्योपयोगो गोसर्पादिनिबर्हणार्थकः इति स्पष्टं सूच्यते। एवमेवाथर्ववेदे शब्दोऽयं येन केन प्रकारेण नियन्त्रणस्य स्थैर्यस्य च सूचकः। राजदण्डार्थेऽस्य प्रयोगाः ब्राह्मणशूद्रादिषु बहुत्र दृश्यन्ते। यथा शतपथे– **पृष्ठस्तूष्णीमेव दण्डैर्घ्नन्ति। तं दण्डैर्घ्नन्तो दण्डवधमतिनयन्ति तस्माद्राजा दण्ड्यः यदेनं दण्डवधमतिनयन्ति।**

यथा शुक्रनीतौ– दण्डं विना क्षत्रियः न विभाति, भूमिरपि वशे न भवति, दण्डं विना प्रजा अपि सुखं न विन्दन्ति।

**नादण्डः क्षत्रियो भाति नादण्डो भूमिमश्नुते। नादण्डस्य प्रजा राज्ञः सुखं विदन्ति भारत॥** शान्ति.14.14

इति द्रौपद्याः वचनम् शान्तिपर्वणि। वचनमिदं श्रुत्वा अर्जुनः एवमवादीत् – दण्डः प्रजाः सर्वाः रक्षति, शास्ति च। दण्डः सुप्तेषु जनेषु जागर्ति, दण्डं एव धर्ममिति बुधा वदन्ति।

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति। दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः॥** शान्ति.15.2

धर्मार्थकामान् दण्ड एव रक्षति, तस्मात् अयं त्रिवर्गः इत्युच्यते ।

**दण्डः संरक्षते धर्मं तथैवार्थं जनाधिप । कामं संरक्षते दण्डः त्रिवर्गो दण्ड उच्यते ॥** शान्ति.15.3

दण्ड एव धान्यं संरक्षति, धनमपि दण्ड एव रक्षति। विद्वान् एतादृशं दण्डं संगृह्य लोकव्यवहारं उपदधाति ।

**दण्डेन रक्ष्यते धान्यं धनं दण्डेन रक्ष्यते । एवं विद्वानुपाधत्स्व भावं पश्यस्व लौकिकम् ॥** शान्ति.15.4

केचन पापाः राजदण्डभयात् पापं नाचरन्ति। यमदण्डभयाच्च परलोकभयाच्च पापं न आचरन्ति। परस्परभयादपि केचन पापं न कुर्वन्ति। एवं सांसिद्धिके लोके सर्वमपि दण्डे प्रतिष्ठितं भवति।

**राजदण्डभयादेके पापाः पापं न कुर्वते । यमदण्डभयादेके परलोकभयादपि ॥** शान्ति.15.5

**परस्परभयादेके पापाः पापं न कुर्वते । एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम् ॥** शान्ति.15.6

दण्डस्य भयात् परस्परं न खादन्ति। यदि दण्डस्य रक्षणं न भवति, तथा सर्वेऽपि अन्धे तमसि मज्जेयुः। दण्डोऽयं अदान्तान् दमयति, अशिष्टान् च अपि दण्डयति, तस्मात् दमनात् दण्डनाच्च दण्डं इति बुधाः वदन्ति।

**दण्डस्यैव भयादेके न खादन्ति परस्परम्। अन्धे तमसि मज्जेयु र्यदि दण्डो न पालयेत्॥** शान्ति.15.7

**यस्माददान्तान् दमयत्यशिष्टान् दण्डयत्यपि । दमनात् दण्डनाच्चैव तस्माद् दण्डं विदुर्बुधाः॥** शान्ति.15-8

मानवानां परस्परम् अकलहार्थं, तेषां धनादिरक्षणार्थं भगवान् दण्डनाम्नीं मार्यादाम् अकल्पयत्।

**असम्मोहाय मर्त्यानामर्थसंरक्षणाय च । मर्यादा स्थापिता लोके दण्डसंज्ञा निशाम्पते ॥** शान्ति. 15.10

यस्मिन् देशे श्यामः लोहिताक्षः जागरूकः दण्डपुरुषः चरति, तत्र नायकः साधु पश्यति तत्र प्रजाः अपि न मुह्यन्ते –

**यत्र श्यामो लोहिताक्षो दण्डश्चरति सूद्यतः । प्रजास्तत्र न मुह्यन्ते नेता चेत् साधु पश्यति ॥** शान्ति. 15.11

ब्रह्मचारी, गृहस्थः, वानप्रस्थः, भिक्षुकाश्च मानवाश्च दण्डस्य भयादेव सन्मार्गे तिष्ठन्ति । भयरहितः यज्ञादीन् नाचरति, पूजां च न करोति, दानं न करोति च। भयरहितः पुरुषः समये स्थातुं नेच्छति।

**ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । दण्डस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः ॥** शान्ति.15.12

यत्र राजानः दण्डनीतिं पालयन्ति, तत्र सर्वेषां प्राणिनां कार्याणि निरातङ्केन सिद्ध्यन्ति।

**दण्डनीत्यां प्रणीतायां सर्वे सिद्ध्यन्त्युपक्रमाः । कौन्तेय सर्वभूतानां तत्र मे नास्ति संशयः ॥** शान्ति.15.29

लोके दण्डः यदि न भवति चेत्, सर्वे प्रजाः मृत्युं प्राप्नुवन्ति । यथा जले क्षुद्रमत्स्यान् बलवन्तः मत्स्याः खादन्ति, तथैव दुर्बलान् बलवत्तराः खादन्ति ।

**दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः । जले मत्स्यानिवाभक्ष्यन् दुर्बलान् बलवत्तराः ॥** शान्ति.15.30

यदि दण्डः लोके न भवति, तत्र भेदः एव न दृश्यते। विश्वमपि अन्धकारे निमज्जति। लोके किं भवति इत्यपु ज्ञातुं न शक्नुमः।

**अन्धं तम इवेदं स्यान्न प्राज्ञायत किञ्चन । दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधुनी ॥** शान्ति.15.32

अयं लोकः दण्डेनैव जितः। लोके शुचिर्जनः दुर्लभः दण्डभयादेव जनः पापं नाचरति ।

**सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्जनः । दण्डस्य हि भयाद् भीतो भोगायैव प्रवर्तते ॥** शान्ति.15.34

यदि दण्डः लोके न भवति, तदा ब्रह्मचारी न अध्ययनं करोति, धेनुरपि क्षीरं न ददाति, कन्याऽपि विवाहम् अपि नाङ्गीकरोति,

**न ब्रह्मचार्यधीयीत कल्याणी गौर्न दुह्यते । न कन्योद्वहनं गच्छेत् यदि दण्डो न पालयेत् ॥** शान्ति.15.37

यदि दण्डभयं नास्ति लोके, पक्षिणः क्रूरमृगाः श्वापदानि पशून् मनुष्यान् यज्ञार्थानि हवींषि च खादेयुः।

**यदि दण्डान्न बिभ्येयुर्वयांसि श्वापदानि च । अद्युः पशून् मनुष्यांश्च यज्ञार्थानि हवींषि च ॥** शान्ति.15.36

दण्डाभावे सेवकाः वाचं न श्रृण्वन्ति । बालाः ज्येष्ठवचनानि न पालयन्ति । युवती च धर्मे न तिष्ठति । तस्मात् दण्डस्य आवश्यकता भवत्येव ।

**न प्रेष्या वचनं कुर्युर्न बाला जातु कर्हिचित् । न तिष्ठेत् युवती धर्मे यदि दण्डो न पालयेत् ॥** शान्ति.15.42

दण्डे सर्वाऽपि प्रजाः तिष्ठन्ति । भयमपि दण्डे एव भवति । दण्डे एव मनुष्याणां स्वर्गः अस्ति। दण्डे एव लोकः सुप्रतिष्ठितः अस्ति। यस्मिन् देशे राजा सम्यक् दण्डप्रयोगं करोति, तत्र कूटं पापं वञ्चना च न भवति।

**न तत्र कूटं पापं न वञ्चना वापि दृश्यते । यत्र दण्डः सुविहितः चरत्यरिविनाशनः ॥** शान्ति.15.44

लोके सर्वाणि कार्याणि अर्थायत्तान्येव, विषयेऽस्मिन् संशयो नास्ति। तदर्थोऽपि दण्डायत्त एव । पश्यत दण्डमहिमा कीदृशः ।

**अर्थे सर्वे समारम्भाः समायत्ता न संशयः । स च दण्डे समायत्तः पश्य दण्डस्य गौरवम् ॥** शान्ति.15.48

बलं क्षत्रिये अविच्छिन्नतया भवति। बले दण्डः समाहितोऽस्ति ।

**बलं हि क्षत्रिये नित्यं बले दण्डः समाहितः ॥** शान्ति.23.13

दण्ड एव प्रभुरिति । दण्डे एव सर्वं प्रतिष्ठितमस्ति ।

**ईश्वरश्च महादण्डो दण्डे सर्वं प्रतिष्ठितम् ॥** शान्ति 121-1

प्रियाप्रियेषु यः राजा समबुध्या दण्डं प्रवर्तयन् प्रजा रक्षति तद्दण्डः राजधर्म एव भवतीति प्रारम्भकाले मनुरब्रवीत् । 121-11

राजदण्डनविषये माता पिता भ्राता भार्या पुरोहिता सर्वेऽपि समाः एव। नाम सर्वेऽपि अवश्यं दण्डनीयाः एव । ये स्वधर्मे न तिष्ठन्ति ।

**माता पिता च भ्राता च भार्या चैव पुरोहितः। नादण्ड्यो विद्यते राज्ञो यः स्वधर्मेन तिष्ठति ॥** शान्ति.121.60

राजा सम्यक् विविच्य विभज्यैव दण्डयेत् । दण्डं दुष्टदमनार्थमेव, लोकानां दुष्टकार्येभ्यः निवारणार्थम् एव । परन्तु कोशवृद्ध्यर्थं नेति।

**विभज्य दण्डः कर्तव्यो धर्मेण च यदृच्छया । दुष्टानां विग्रहो दण्डो हिरण्यं बाह्यतः क्रिया ॥** शान्ति.122.40

**व्यङ्गत्वं च शरीरस्य वधो नाल्पस्य कारणात्। शरीरपीडास्तास्ताश्च देहत्यागो विवासनम्॥** शान्ति.122.41

दुष्टशिक्षणार्थमेव दण्डो विहितः, स्ववृद्ध्यर्थं न । शिष्टानां ये प्रबाधनाः तेषां वध एव उचितः।

**शिष्ट्यर्थं विहितो दण्डो न वृद्ध्यर्थं विनिश्चयः। ये च शिष्टान् प्रबाधन्ते दण्डस्तेषां वधः स्मृतः॥** शान्ति.135.20

दण्डधारिणः पुरुषस्य नराः नित्यम् उद्विजन्ते। तस्मात् लोकः सर्वाणि भूतानि दण्डेनैव प्रसाधयेत्।

**नित्यमुद्यतदण्डस्य भृशमुद्विजते नरः। तस्मात् सर्वाणि भूतानि दण्डेनैव प्रसाधयेत्॥** (शान्ति.140.8)

धर्मेण सम्यक् विभज्य दण्डयेत् यदृच्छया दण्डनं न कुर्यात्। दण्डः केवलं दुष्टदमनार्थमेव।

**विभज्य दण्डः कर्तव्यो धर्मेण न यदृच्छया। दुष्टानां निग्रहो दण्डो हिरण्यं बाह्यतः क्रिया॥** शान्ति.122.40

सदा उद्यतदण्डस्य नरः भृशं उद्विजते । तस्मात् कारणात् सर्वाणि भूतानि दण्डेन एव प्रासाधयेत्। यथाशास्त्रविधानेनैव दण्डनं कुर्यात्।

**तत्त्वाभेदेन यच्छास्त्रं तत् कार्यं नान्यथाविधम् । असमीक्ष्यैव कर्माणि नीतिशास्त्रं यथाविधि ॥** शान्ति.267-9

दुष्टानां मरणदण्डेन मूलच्छेदं न कुर्यात्। प्राणान् नापहरेत्। प्राणपहरणं न सनातनो धर्मः। यथापराधं साधारणतया दण्डनं कुर्यात्। तदेव प्रायश्चित्तमिति वदन्ति।

**न मूलघातः कर्तव्यो नैष धर्मः सनातनः। अपि स्वल्पवधेनैव प्रायश्चित्तं विधीयते॥** शान्ति.267.12

अपराधिनः सम्पत्तिं स्वाधीनं करिष्यामः इति भयोत्पादनं, कारागारे स्थापयिष्यामः इति भयोत्पादनं च विरूपकरणं, अवयवच्छेदनं इत्यादिकं कुर्यात्। मरणदण्डः नोचितः इति वदन् अपराधिनः कुटुम्बसम्भारानपि न बाधयेत्। यद्यपराधी पुरोहितस्य आश्रयं लभते, तदापराधिनमपि न दण्डयेदिति।

**उद्वेजनेन बन्धेन विरूपकरणेन च। वधदण्डेन ते क्लिश्या न पुरोहितसंसदि॥** शान्ति.267-13

**बिभ्रद्दण्डाजिनो मुण्डो ब्राह्मणोऽर्हति शासनम्॥** शान्ति. 267-5

मुण्डः संन्यासी यद्यपराधी भवति स दण्डनीयः। धर्मोल्लङ्घिनः चोरादयः चौर्यादि यद्याचरन्ति, तेऽपि दण्डनीयाः एव। यद्येतेषां दण्डनं न भवति, ते प्रजा बाधन्ते। पूर्वकाले प्रजाशासनम् अति सुलभमासीत्। कारणं किमित्युक्ते तदानीन्तन प्रजा मृदुस्वभाविनः सत्यनिष्ठाः अक्रोधिनः स्वल्पाः आसन्। पुरा दिग्दण्डः एव प्रथमः आसीत्। अपराध्यधिको भवति, तदा वाग्दण्डः एव भवति स्म। एवं महाभारते तत्तत्सन्दर्भेषु दण्डविज्ञानं ज्ञातुं शक्यते।

## References books

1. अग्निपुराणम्
2. मत्स्यपुराणम्
3. विष्णुधर्मोत्तरपुराणम्
4. ऋग्वेदः
5. अर्थशास्त्रम्
6. महाभारतं शान्तिपर्व
7. मनुस्मृतिः
8. हिन्दूराज्यशास्त्रम्
9. अथर्ववेदः
10. शुक्रनीतिसारः

# शान्तिपर्वणि राजपुरुषाणां कर्तव्यम्

**H.K. Subrahmanya**
Ph.D. Research Scholar
Mysore, Karnataka

निश्चयेन हि वेदविद्या परलोकसाधनमिति सिद्धम्। सैव प्रजानामभ्युदयकारणम्। वेदाः ब्राह्मणाधीनाः इति असकृत् श्रूयते। अतः जगत्यस्मिन् जीवनधारणस्य अवशिष्टाः उपायाः कृषिः गोरक्षणं वाणिज्यञ्चेऽति त्रयः-

**कृषिगोरक्ष्यवाणिज्यं लोकानामिह जीवनम्। ऊर्ध्वं चैव त्रयी विद्या सा भूतान् भावयत्युत॥**

(शा.राज. 89-7) एतदभावे देशं त्यक्त्वा अन्यत्र गन्तॄणां प्रजानामवरोधः राजनीतिर्भवति। प्रजारक्षणार्थं सदैव राज्ञा योद्धव्यम्। विदुषो जनाः राजानमेव मेदिन्याः आत्ममूलं मन्यन्ते। अत एव प्रजानामभिप्रायः इष्टानिष्टाश्च राज्ञा ज्ञातव्याः। स्वस्य कीर्तिरपकीर्तिश्च स्तुतिनिन्दनञ्च गुप्तचारैः ज्ञात्वा तान् सर्वान् सुपरिणीतान् कारयेत्। इहपरलोकयोरपि जीवस्य देवस्य च जीवनं राज्ञः हस्ते तिष्ठति -

**इतो दत्तेन जीवन्ति देवाः पितृगणास्तथा। मानुषोरगरक्षांसि वयांसि पशवस्तथा॥**

(शा.राज. 89-25)

**कृपणानाथवृद्धानां यदश्रु परिमार्जति। हर्षं संजनयन् नृणां स राज्ञो धर्म उच्यते॥**

मित्राणां विवर्धनं शत्रूणां कर्षणं दानमातिथ्यपूजादिषु श्रद्धादयः राजधर्माः। राजधर्मपालनेन चतुर्णामाश्रमाणां धर्मफलप्राप्तिर्भवति। तदुक्तञ्च-

**साध्वाचारप्रवृत्तानां चातुराश्रम्यकारिणाम्।** (शा.राज. 66-4)

**चातुराश्रम्यमैकाग्र्यं चातुर्वर्ण्यं च पाण्डव। धर्मं पुरुषशार्दूल प्राप्स्यसे पालने रतः॥** (शा.रा. 66-43)

अन्यवर्णानां कृते विभिन्नानि कर्माणि यथोपदिष्टानि तथैव राज्ञः कृतेऽपि दण्डनीतिः विहितधर्मः। किं बहुना राजा एव युगः इत्यपि उच्यते। राज्ञः शासनमनुसृत्यैव युगधर्माः प्रवर्तन्ते।

सुशासनाभावे वर्णाश्रमाणां वेदानामपि ग्लानिर्भवतीत्यत्र न संशयः। **धर्माय राजा भवति न कामकरणाय तु।** (शा.राज. 90-3)

राज्ञा कृतेनापराधेन तस्य पत्नीपुत्रमित्रबन्धवाः प्रजाश्च दुःखभागिनः भवन्ति।

**राज्ञो भार्याश्च पुत्राश्च बान्धवाः सुहृदस्तथा। समेत्य सर्वे शोचन्ति यदा राजा प्रमाद्यति॥** (शा.राज. 89-10) तेन कृतापराधस्य फलं तत्काले अलभ्यमाने सति स्वपुत्रेषु पौत्रेषु प्रपौत्रेषु वा अवश्यं प्राप्स्यतीति शास्त्रं वदति।

सम्यग्विभज्य दानं, परेषां गौरवदानं, गर्वितस्य बलाढ्यस्य निग्रहश्च राजधर्माः। राजधर्मस्य विरोधी पुत्रः सन्नपि सः अक्षम्यः भवति। बलहीनस्य बलवर्धनमपि राजधर्मः। प्रजारक्षणं, चोरनिग्रहः, युद्ध्वा विजयप्राप्तिः राजधर्मः।

**संरक्ष्यान् पालयेद् राजा स राजा राजसत्तमः। सदैव राज्ञा योद्धव्यं सर्वलोकात् युधिष्ठिर॥** (शा.राज. 89-10/11) कार्येषु वाचा अपि स्वस्य प्रियस्सन् पापप्रवृत्तिस्तस्यापि क्षमा नास्तीति राजधर्मः। वणिग्जनानां पुत्रवत् रक्षणं, कामद्वेषराहित्येन श्रद्धापूर्वकेन आप्तदक्षिणपुरस्सरं यागादि धर्मकार्यस्याचरणं राजधर्माः भवन्ति। क्षत्रियाणां कृते युद्धे मरणं सर्वेष्वपि यज्ञेषु श्रेष्ठतममित्युच्यते। क्षत्रियस्य हृदयं वज्रसमानं भवेत्। प्रजानां षष्ठभागं गृहीत्वा राज्ञा राज्यरक्षणं कर्तव्यम्। प्रजाभ्यः क्षामेण, चोरैः, प्राकृतिकविकोपैर्वा प्राप्तस्य दुःखस्य राजा एव कारणपुरुषः भवति।

**गुप्तैश्चारैः अनुमतैः पृथिवीमनुसारयेत्। आत्मानं सर्वतो रक्षन् राजन् रक्षस्व मेदिनीम्।**

**आत्ममूलमिदं सर्वं आहुर्वै विदुषो जनाः॥** (शा.राज. 89-15/13)

**मित्राणि न च वर्धन्ते तथा अमित्री भवन्त्यपि** इत्युक्तरीत्या राज्ञः न्यूनातिन्यूनं मित्राणि भवेयुः। प्रजारक्षणमेव राजधर्मस्य नवनीतं भवति। ब्रह्मवादिनः ब्राह्मणाश्च राजधर्मस्य निर्णेतारः। कस्यापि वर्णस्य संशोधने राजा अधिकारी भवति। प्रवृत्तिधर्मः निवृत्तिधर्मश्च राज्ञा एव वर्धेत। कलियुगलक्षणोपेतः महापापकार्यनिरतः राजा न केवलं प्रजानां पापकार्याणां फलभागी भवति अपि च बहूनि वर्षाणि नरकयातनमपि अनुभवति। शास्त्रविरोधिनो राज्ञः धर्ममैश्वर्यं सदा अस्थिरमेव भवति। प्रजानां भयात् रक्षिता राजा दिनमेकमपि असावधानेन तिष्ठति चेत् स सहस्रवर्षपर्यन्तं नरके तिष्ठन् कृतस्यापराधस्य प्रायश्चित्तं कुर्यात्। प्रजापालने प्रजाक्षेमाभ्युदये व्यतीतस्य प्रत्येकमपि दिनस्य कृते देवलोके दशसहस्रवर्षगुणितं फलं लभ्यते इति शान्तिपर्वणि राजधर्मविचारे प्रतिपादितं दृश्यते।

# शान्तिपर्वणि अध्यात्मज्ञानम्

(आध्यात्मिकज्ञानविषयसङ्ग्रहः)

**S.N. Krishnasharma,**
Resaerch Associate,
The Kuppuswami sastri Research Institute, CH-4)

महाभारतग्रन्थः वपुषा विशालस्तथैव भावगाम्भीर्येण अर्थगौरवेण च प्रोच्यते। ज्ञानाग्नि-समेधिततत्वाच्च एतस्य महत्त्वं न कथञ्चिदपि अपालयितुं पार्यते। अत एव महत्वमस्य उद्गायता प्रोच्यते **"महत्वाद् भारवत्वाच्च महाभारतमुच्यते"**। समन्वयात्मकमिदं महाकाव्यम्। अत्र सर्वविषयसङ्कलनात् सकलशास्त्रीय तत्वसारग्रहणाद् विश्वकोशत्वेन गणना महाभारतस्य गौरवं विवृणुते। महाभारतेऽस्मिन् वैदिकं तत्वम् , अध्यात्मम् , ऐतिह्यम् , दर्शनं, काव्यम् , आख्यानम् नीतितत्वम् , राजनीतिसारः , अन्यच्चापि लोकोपयुक्तम् तत्त्वजातम् संगृह्योपस्थाप्यते। अत एव " **यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्** " ॥ इति।

अतएव महाभारतस्य गुणगौरवं समीक्ष्य वेणीसंहारे ( १ - ४ ) व्यासवचनं मधुरमिति संस्तवीति -

" **श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः।**
**तमहमरागमकृष्णं कृष्णद्वैपायनम् वन्दे** " ॥ इति।

विश्वस्य प्राचीनतमायाः संस्कृतेः सभ्यतायाश्च यथार्थावगमाय संस्कृतमेवैकं साधनम्। इह संसारे अनेकयोनिषु जन्मपरम्परामनुभूय अनेकजन्मार्जितपुण्यप्रभावैः मनुष्यशरीरमासादयति जीवलोकः। यतोह्युक्तम् - " **कदाचित् लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्** "। इति। पुण्यपापयोश्च प्राणिकर्तृकं कर्म एव मूलमिति। तत्र स्मृतिप्रामाण्यमस्ति।

" **स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः। तामेवाश्रित्य लिङ्गेभ्यो वेदवद्भिः प्रकाशिताः** " ॥ इति।

स्मृतिः धर्मशास्त्रम् , एतच्च शास्त्रं मुख्यतया अस्माकं भारतीयधर्मशास्त्रकारैः भागत्रयेण सूत्र-स्मृति-निबन्धत्वेन विभक्तम्। स्मृतयोऽनेकाः सन्ति। यासामपि धर्ममूलत्वं मनुना मनुस्मृतौ प्रतिपादितम्।

यथा " **वेदोऽखिलो धर्ममूलम् स्मृतिशीले च तद्विदाम्** "। मनुविज्ञाने कर्मण उपरि यथा प्राधान्यं दत्तमस्ति तथैव अध्यात्मविज्ञानस्योपरिऽपि महत्त्वमस्तीति स्मृतेरध्ययनाध्यापनद्वारा ज्ञायते।

इदानीम् कालः विज्ञानयुगत्वेन गण्यते। सर्वत्र विज्ञानवार्ता प्रचरति , प्रतिनगरं , प्रतिगृहं च विज्ञानस्याश्रयेणैव कर्मसिद्धिः सञ्जायते। विज्ञानप्रभावेण जीवने स्पर्धाबुद्धिरुपागता , अनेन राष्ट्रं समाजो वा क्षयमुपैति। अस्य विकासे सदाचारस्य सहानुभूतेः शीलस्य विनयस्य च स्थानमेव नोपलभ्यते। अस्तिक्यम् , तपः , स्नेह - श्रद्धा - भक्तयः , सदाचारश्च म्लायन्ते विनश्यन्ते च। स्मृतिज्ञानेऽपरैर्विज्ञानैः सह मुख्यत्वेन धर्मार्थकाममोक्षपरकं विज्ञानस्यापि चर्चा स्थलविशेषेषु समुपलभ्यते। येन स्वात्मोन्नतिः न केवलं भवेदपि तु जगतः कल्याणमपि भवत्येव। एतस्यैवाध्यात्मविज्ञानस्य महत्त्वं यद्यपि उपनिषत्सु प्राप्यते , तथापि महाभारते मनुस्मृतावपि दृश्यते आलोच्यन्ते च। सर्वदेहिनां जीवो अस्ति येन सर्वं सुखं दुःखं च प्रतिजन्म अनुभूयते। स च जीवो मानुषदशायां बाहुल्येन पापमनुतिष्ठति अल्पं च पुण्यं तदा तैरेव भूतैर्मानुषदेहरूपतया परिणतैस्त्यक्तो मृतः सन्ननन्तरं " पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम् "। ( मनु १२ . १६ ) इत्युक्तरीत्या यातनानुभवोचितसंपातकठिनदेहो यामीः पीडा अनुभवति। ततः भोगेनोपहतपाप्मा तान् पञ्चजरायुजादि शरीराम्भकान् पृथिव्यादिभूतभागान् अधितिष्ठति। मनुस्मृतौ (१२ . २२ )

" **यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः। तान्येव पञ्चभूतानि पुनरभ्येति भागशः** "॥ इति। मोक्षधर्मपर्वणि अध्यात्मविषये उक्तं भवति। ( महाभा १९४ . ८ )

"**महाभूतानि पञ्चैव सर्वभूतेषु भूतकृत्। अकरोत् तेषु वैषम्यं तत्तु जीवो न पश्यति** "॥ इति।

अर्थाद् मानुषादिशरीरं प्राप्नोतीत्यर्थोऽवगम्यते। अतोऽस्य जीवस्य एता धर्माधर्महेतुकाः स्वर्ग-नरकाद्युपभोगोचित प्रियाप्रियदेहप्राप्तवान् इति ज्ञात्वा धर्मानुष्ठाने सदा मनः सङ्गतं कुर्यात्। ( महाभा १९४ . ३० ) " सुखस्पर्शो सत्त्वगुणो दुःखस्पर्शो रजोगुणः। तमोगुणेन संयुक्तौ भवतोऽव्यावहारिकौ "॥ इति। अयं जीवो येन येन पापेन कर्मणा इहलोके कृतेन यद्यजन्म प्राप्नोति तत्सर्वं क्रमेण महाभारते प्रतिपादितम्। अतः परं ब्राह्मणस्य निःश्रेयसाय मोक्षाय हितं कर्मानुष्ठानमिदमालोच्यते। मनुस्मृतावपि ( ८३ - १२ )

" **वेदाभ्यासस्तपो ज्ञानमिन्द्रियायाणां च संयमः। अहिंसा गुरुसेवा च निःश्रेयसकरं परम्** "॥ **इति।**

**सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। तद्ध्यग्रयं सर्वविद्यानां प्राप्यते ह्यमृतं ततः॥**

तर्के कृते ऋषीणां जिज्ञासाविशेषादुच्यते -

सर्वेषामप्येषां वेदाभ्यासादीनां शुभकर्मणां मध्ये किञ्चित्कर्मातिशयेन मोक्षसाधनं स्यादिति। एषां वेदाभ्यासादीनां सर्वेषामपि मध्ये उपनिषदुक्तपरमार्थज्ञानं प्रकृष्टं स्मृतं यस्मात्सर्वविद्यानां प्रधानम्। (महाभा १९४ . ४६ )

**" त्यक्त्वा यः प्राकृतं कर्म नित्यमात्मरतिर्मुनिः।**

**सर्वभूतात्मभूयस्तस्मात् स गच्छेदुत्तमां गतिम्॥** इति।

तपः स्वधर्मवृत्तित्वमिति आश्रमविहितम् कर्म आत्मज्ञानं च ब्रह्मणस्य मोक्षसाधनम्। तपसा पापमपहन्ति। ब्रह्मज्ञानेन मोक्षमप्नोति।

मोक्षप्राप्तिप्रसङ्गे मनुना मनुस्मृतौ विद्यया महत्त्वं प्रतिपादितमस्ति ( १२ . १०४ )

**तपो विद्या च विप्रस्य निःश्रेयसकरं परम्। तपसा किल्बिषं हन्ति विद्याऽमृतत्वमश्नुते॥**

तथा च श्रुतिः ( ईशा. उप. )

**" विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्त्वा विद्याऽमृतमश्नुते॥** इति।

एष आत्मा सर्वान् प्रणिनः पञ्चभिः पृथिव्यादिभिः महाभूतैः शरीरारम्भकैः परिगृह्य पूर्वजन्मार्जितकर्मापेक्षया उत्पत्तिस्थितिविनाशैः चक्रवदसकृद्रूपावर्तमानैरापेक्षात्संसारिणः करोति। यथोक्तम् (महाभा.शान्ति १२४. १२)

**एष सर्वाणि भूतानि पञ्चभिर्व्याप्यमूर्तिभिः। जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत्॥**

परिशेषे मोक्षत्वेनोक्तसर्वधर्मश्रेष्ठतया सर्वत्र परमात्मदर्शनानुष्ठेयत्वेन अध्यात्मविज्ञानस्यास्य महत्त्वमनुमेयम्।

**" एवं यः सर्वभूतेषु पश्यात्मनामात्मना। स सर्वसमातामेत्य ब्रह्मम्येति परं पदम् "॥**

इत्थं भगवता व्यासेन भारते स्मृतावपि अध्यात्मविज्ञानस्यालोचनं कृतमित्यवगतम्॥

******

# श्रीमहाभारते शान्तिपर्वणि वामदेवगीता

**Prema K.**

Research scholar,

Kannur University, Kerala

श्रीमहाभारतं महर्षिणा वेदव्यासेन विरचितो बहुप्रसिद्ध इतिहास इति सुविदितम्। अस्मिन् ग्रन्थे कौरवपाण्डवानां महायुद्धं मुख्यविषयरूपेण वर्णितमस्ति । मानवजीवनस्य धर्म-अर्थ-काम-मोक्षरूपाः समस्तपुरुषार्थाः अस्मिन्नितिहासे सन्निवेशिताः। महाभारते अष्टादश पर्वाणि सन्ति। ते आदि-सभा-अरण्य-विराड्-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेधिक-आश्रमवासिक-मौसल-महाप्रस्थानिक-स्वर्गारोहणाख्यानि पर्वाणि। अस्य महाभारतस्य भीष्मपर्वणि भगवद्गीता वर्तते। भगवता कृष्णेन मोहग्रस्तम् अर्जुनं प्रति ज्ञान-कर्म-भक्ति-उपदेशाः गीतायां प्रदत्ताः। अस्यां गीतायामष्टादशाध्यायाः सन्ति । मानवजीवनस्य विविधविषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति । इयं विश्वजनीनकृतिः कालजयिनी चिरन्तनी एव । प्रथमं महाभारतम् इतिहासः पुराणम् आख्यानं चेति नामभिः आख्यायते स्म। सम्प्रति काले तु महाभारतम् आचारशास्त्रं नीतिशास्त्रं धर्मार्थकाममोक्षाख्य-चतुर्वर्गसाधनं चेति नामभिः प्रसिद्धम् । महाभारतं पञ्चमो वेदः इति सर्वत्र प्रचारितम् ।

महाभारतस्य अनेकविधोपदेशमयः अशीतिप्रतिशतभागः, विंशतिप्रतिशतभागः इतिहास-प्रतिपादकः इति अस्य नीतिशास्त्रेषु गणनोचिता। अत्र वामदेवगीतायां भीष्मेण युधिष्ठिरं प्रति, वसुमनसे वामदेवोक्तराजधर्मकथनं मुख्यप्रतिपादनविषयः। वामदेवगीता इव उतथ्यगीता तथा ऋषभगीता इति अन्ये अध्यायाः सन्ति। वामदेवगीतायां सप्ताशीतिः श्लोकाः सन्ति।

अयमध्यायः इत्थम् आरभ्यते–

युधिष्ठिर उवाच–

**कथं धर्मे स्थातुमिच्छन् राजा वर्तेत भारत ।**

**पृच्छामि त्वां कुरुश्रेष्ठ तन्मे ब्रूहि पितामह ॥** (वाम.गी. १) इति।

अनेन च श्लोकेन परिसमाप्यते–

**इत्युक्तो वामदेवेन स तथा कृतवान् नृपः।**

**तथा कुर्वंस्त्वमप्येतल्लोकौ जेता न संशयः॥** ( वाम.गी. ८७)

अत्र गीतायां युधिष्ठिरः पृच्छति – स्वधर्मानुष्ठानेन प्रजानां कल्याणाय कथं राजशासनं करणीयमिति। तदा भीष्मपितामहः वसुमनसे वामदेवेनोक्तं राजधर्मम् उपदिशति । तेन वामदेवगीता इति नाम लब्धम्।

धर्मानुष्ठानतत्परेण राज्ञा केन प्रकारेण शासनीयमित्युपदेशः। इयं पृथिवी स्वर्गरूपेण परिपालनीया। तदर्थं धर्मसाधनमेव परमो मार्गः। वसुधाधिपः सततं धर्मतः अर्थतः कामतः बुद्धितः मन्त्रतश्चापि पूर्णः नेति चिन्तयति, तथा पालयति चेत् , यशः कीर्तिं श्रियं प्रजाश्च लभते । बुद्धिमता राज्ञा दमः धर्मः शीलं क्षत्रधर्मः प्रजाहितं च अनुष्ठेयम्। यः राजशासनतत्परः राजा प्रजाभ्यः कल्याणं कुरुते, तस्य श्रियः कर्माणि च सिद्ध्यन्ति, सत्यपथात् न विभ्रंशते च। धर्मपरेण राज्ञा विक्रमेण मही प्रजाश्च पालनीयाः, तथा आहवे निधनं च करणीयम् । यः स्वसमूहे अप्रियाणि कर्माणि करोति चेदपि पुनः मनःसान्निध्येन भूयो भूयः प्रियमाचरेत्। रक्षाधिकरणं युद्धं तथा धर्मानुशासनं यथाकाले मन्त्रं वित्तं सुखं च एतैः पञ्चभिः राज्यं अभिवर्धयते। शुचित्वेन एव दानकर्म, विभजनक्रिया आर्जवं च करणीयम्। राज्याधिपेन स्वबुद्धिवैभवेन सबलेन च युद्धरहितविजयं प्राप्तुं यत्नः करणीयः । यदि युद्धं क्रियते चेत् योधाः सुसन्तुष्टाः स्वानुरक्ताः सुपूजिताः भवेयुः, तर्हि विजयः अनायासेन भवेत्। परिश्रमशाली राजा अत्यन्तप्रयत्नेन महीं गृहीत्वा धर्ममार्गेण प्रजापरिपालनं करोति । रक्षितव्यः राजा येन केनापि प्रकारेण मार्गेण स्वराज्यस्थान् जनान् रक्षयति चेत् सः महतां श्रियं प्राप्नुवन्ति इत्यत्र नास्ति संशयः। तदेवात्र वामदेवगीतायां उद्घोषयति–

**धर्ममेवानुवर्तस्व न धर्माद् विद्यते परम् ।**

**धर्मे स्थिता हि राजानो जयन्ति पृथिवीमिमाम्॥** (वाम.गी. ६)

एतदेवात्र भगवद्गीतायां पार्थसारथिना कृष्णेन अर्जुनं प्रति उपदिष्टम्–

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ। ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥**

(भगवद्गीता २.३८)

यानि कर्माणि नानुवर्तेत इत्यपि अत्र प्रतिपादयति। अधमर्दर्शी राजा तादृशरीत्या एव कर्माणि करोति चेत् चतुर्वर्गाणि तम् उपेक्षयति । यः राजा अर्थसिद्ध्यर्थं कर्म करोति सः पापिष्ठः वध्यः, तथा क्षिप्रमेव विनाशं प्राप्नोति । अधर्ममार्गेण सञ्चरति चेत् , कामचारी धर्मघ्नः च भूत्वा क्षिप्रमेव निधनं प्राप्नोति।

अधर्ममार्गेण विचारितः राजा राज्यसम्पादनं अर्थोपार्जनं च करोति चेत् तत् द्वयमपि अचिरेण विनश्यति । असन्मार्गी राजा तथा तत्सेवितः सचिवः अपि तद्रूपेणैव पर्यालोचयति, तर्हि तद् राज्यं शीघ्रमेव निधनं याति ।

मुख्यान् सच्चिन्तकान् अमात्यान् तथा प्रियान् जनान् च विहाय राजा अनुशासनं कुरुते चेत् तद् राज्यं साधुमार्गं न विन्दति । अकाले अर्थान् अप्रियान् न सन्तोषयेत् , एवं प्रिये अर्थे च अत्यधिकं आह्लादयति चेत् तत् समीचीनं न भवति । तदेवात्र सूचयति -

**नाकाले प्रीणयेदर्थान् नाप्रिये जातु संज्वरेत्।**

**प्रिये नातिभृशं हृष्येद् युज्येदारोग्यकर्मणि ॥** ( वाम.गी. ५५)

राजा बलवान् बुधः सन्नपि पापकर्मकारी चेत् राज्यस्य तथा तत्प्रजायाः च विनाशमापादयति। सद्वृत्ताचरणीयान् स्वपरिवारान् मिथ्या एव मिथ्याकर्म आचरति राजा कण्टकेनैव कण्टकमिव निधनं याति। महीपालेन शठस्वभावयुक्तानां सचिवानां तथा म्लेच्छानाम् उपेक्षा कर्तव्या। दासप्रवृत्तिकाराणां दुर्विनीतत्वम् एवं चतुर्वर्गविरोधिनः सचिवाः एते सर्वे राज्यात् भ्रंशनीयाः।

अत्र राज्याभिवृद्ध्यर्थं वामदेवेनोक्ताः उपायाः विस्तरेण प्रतिपादिताः। एवम् अस्मिन् लोकेऽपि तथाविधरीत्या कुर्वन्ति चेत् लोकस्य वा मानजीवनस्य च अवस्था अनिर्वचनीया भवेत् इत्यत्र नास्ति संशयः। राज्ञः तथा प्रजानां च स्वस्वभावे परिवर्तनं करणीयम् । यः राजा अन्यानपि स्वमिव आचरति, आत्मना न परिहसति, तथा सर्वात्मना कृतकृत्यः भवेत् सः सर्वान् सुखान् अनुभवति।

अस्मिन् लोके इदानीन्तनाः राजानः वा प्रजाः वा एतानि कर्माणि नाचरन्ति। सुखभोगेषु निमग्नाः भूतेषु दयापराः न भवन्ति। सर्वान् जनान् क्रोधेन सम्बोधयन्ति। एषैव अत्रत्या अवस्था। तदवस्थातः मोक्षं प्राप्य महाभारतकालवत् विचिन्तनीयम् आचरणीयं च। एवं चेत् ससुखराजभरणं ससन्तोषाः प्रजाः च लब्धुं शक्यते इत्यत्र नास्ति संशयः । यथा श्रीमद्भगवद्गीतायाम् उक्तं तथैवात्र वामदेवगीतायामपि अनुरणनं लभ्यते।

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**

**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥** (भगवद्गीता ४.७)

******

# महाभारते मोक्षधर्मपर्वणि ब्रह्मज्ञानिस्वभावाः

**कृष्णन् शुकवनम्**

शोधच्छात्रः, श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्चीपुरम्

इमैल् : krishnan.sugavanam@gmail.com

**उपक्रमः--**

नमः सभाभ्यः सभापतिभ्यश्च। महाभारते शान्तिपर्वणि, प्रयासेन मोक्षधर्मपर्वणि ब्रह्मज्ञानिस्वभावान् अधिकृत्य यथा मतिः यथा अवकाशः किञ्चित् वक्तुम् उद्युक्तोऽस्मि।

भगवद्गीतायां द्वितीयाध्याये अर्जुनः भगवन्तं श्रीकृष्णं प्रति पृच्छति—

**"स्थितप्रज्ञस्य का भाषा समाधिस्तस्य केशव। स्थितधीः किं प्रभाषेत किम् आसीत व्रजेत किम्"** इति।

भगवद्गीतायाम् अनेकेषु श्लोकेषु भगवान् श्रीकृष्णः स्थितप्रज्ञस्य लक्षणं प्रस्तौति। तादृशं मोक्षधर्मपर्वणि अपि बहुत्र ब्रह्मज्ञानिनः स्वभावाचारविषये बह्वी चर्चा जाता। ते स्वभावाः आचाराः एव इति निर्देष्टुम् अस्य शोधपत्रस्य उद्देशः प्रयोजनं च।

**भूमिका** –

किन्तु, ततः पूर्वं तस्मिन् विषये किञ्चित् अवधेयम्। प्रप्रथमं ब्रह्मज्ञानिस्वभावाः शास्त्रस्य उद्देशः नास्ति इति अस्माभिः सम्यक् ज्ञातव्यम्। ब्रह्मज्ञानानन्तरं जीवन्मुक्तस्य आचारः तस्य अवशिष्टप्रारब्धमेव नयति।[32] यथा साधनपञ्चके "प्रारब्धं तु इह भुज्यताम्" इत्यादिना।

ज्ञानस्य (spiritual maturity) मानं चित्त-समता (emotional maturity) इति अज्ञानिनः सर्वदा प्रमिनोति। यावद् ज्ञानमस्ति तावत्समतायाः समृद्धिः भवेत् इति ते चिन्तयन्ति। अर्जुनोऽपि "स्थितप्रज्ञः कथं भाषते, कथं व्रजते, कथम् आस्ते इति ज्ञानिनः शरीरव्यवस्था कथं वर्तते" इति बालः इव पृच्छति। भगवान् श्रीकृष्णः तु अर्जुनस्य प्रश्नस्य साक्षात् उत्तरं न ददाति; **"आत्मन्येव आत्मना तुष्टः स्थितप्रज्ञस्तदोच्यते"** इति उचितम् उत्तरमेव सः ददाति।

शान्तिपर्वणि त्रिंशदधिकद्विशताध्याये, युधिष्ठिरः भीष्मपितामहं प्रति एतं प्रश्नं पृच्छति।

---

[32]"शरीरारम्भकस्य कर्मणो नियतफलत्वात्, सम्यग्ज्ञानप्राप्तावप्यवश्यम्भाविनी प्रवृत्तिर्वाङ्मनःकायानाम्, लब्धवृत्तेः कर्मणो बलीयस्त्वात् मुक्तेष्वादिप्रवृत्तिवत्। तेन पक्षे प्राप्तं ज्ञानप्रवृत्तिदौर्बल्यम्।" - बृहदारण्यकोपनिषद् शाङ्करभाष्यम् – १.४.०७

**प्रियः सर्वस्य लोकस्य सर्वसत्त्वाभिनन्दिता। गुणैः सर्वैरुपेतश्च को न्वस्ति भुवि मानवः॥** (२३०.०१) तत्र अनेकानि लक्षणानि पितामहेन प्रोक्तानि। तत्सर्वं ब्रह्मज्ञानिलक्षणम् इव भासते। किन्तु तत्र तस्य विषये प्रसङ्गः नास्ति। किमर्थम् अहम् एतत् प्रवक्ष्यामि इत्युक्ते ब्रह्मज्ञानिन इव स्वभावाः आचाराः च अस्माकम् आचारशीलानाम् अपि अभ्यासेन प्राप्तुम् शक्यन्ते। किन्तु, द्वयमपि न समानम्।

अस्माकम् अद्वैत-सम्प्रदाये, आत्मज्ञानं तस्य निष्ठा चेति विषये पक्षद्वयं वर्तते। उदाहरणार्थं बृहदारण्यकोपनिषद्भाष्ये शङ्कराचार्यः वदति – "यदैवात्मप्रतिपादकवाक्यश्रवणाद् आत्मविषयं विज्ञानमुत्पद्यते, तदैव तदुत्पद्यमानं तद्विषयं मिथ्याज्ञानं निवर्त्तयदेवोत्पद्यते। आत्मविषयमिथ्याज्ञाननिवृत्तौ च तत्प्रभवाः स्मृतयो न भवन्ति स्वाभाविक्योऽनात्मवस्तुभेदविषयाः। अनर्थत्वावगतेश्च। आत्मावगतौ हि सत्यामन्यद्वस्त्वनर्थत्वेना-वगम्यते।"[33] स एव शङ्कराचार्यः भगवद्गीतायां अष्टादशाध्याये वदति "ज्ञानस्य स्वात्मोत्पत्ति-परिपाक-हेतु-युक्तस्य प्रति-पक्ष-विहीनस्य यदात्मानुभवनिश्चयावसानत्वं तस्य निष्ठाशब्दाभिलापात्। शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्ध्याद्यमानित्वादि चापेक्ष्य जनितस्य क्षेत्रज्ञ-परमात्मैकत्व-ज्ञानस्य कर्त्तृत्वादि-कारक-भेद-बुद्धि-निबन्धन-सर्व-कर्म-संन्यास-सहितस्य स्वात्मानुभव-निश्चय-रूपेण यदवस्थानं सा परा ज्ञाननिष्ठेत्युच्यते।" [34] सकृत् ज्ञानमेव सम्प्रदायस्य दृष्टिः। तदाधारेण केचन वदन्ति—ज्ञान-तन्निष्ठयोः मध्ये किञ्चिदपि कालावकाशः नास्ति इति। तेषां पक्षस्तु ज्ञानप्राप्तिरेव ज्ञाननिष्ठायाः प्राप्तिः अपि। अन्यपक्षिणस्तु लोके यत् व्यवह्रियते तदाधारेण वासनावशात् ज्ञानं, तस्य निष्ठा, मध्ये किञ्चित् छिद्रम् अस्ति इति विन्दन्ते। तस्य कारणम् अविद्यासंस्कारः इत्यपि ते प्रक्रियन्ते। विद्यारण्यस्वामी "जीवन्मुक्तिविवेकः" इति प्रकरणग्रन्थे जीवन्मुक्तानां सिद्ध्यवस्थां चतुर्धा विभज्य "ब्रह्मवित् , ब्रह्मविद्वरः, ब्रह्मविद्वरीयान् , ब्रह्मविद्वरिष्ठः" इति तेषां मुक्तिस्थलतारतम्यं चतुष्पदश्रेणीं प्रतिपादयति। तेषां मध्ये को भेदः? ज्ञाने भेदः वा आचारे भेदः वा इति चेत् , ज्ञानस्य भेदः इति अस्माभिः न वक्तुं शक्यते। आचारस्य भेदः एव भवितुम् अर्हति। आचारे भेदः दृश्यते अतः तेषां ज्ञानेऽपि भेदः अस्ति इति वयं वक्तुं न शक्नुमः। यदि ब्रह्मविदः आचाराः अन्यान् मुक्तान् अपेक्ष्य न्यूनतया दृश्यन्ते, तर्हि तस्मिन् विषये ब्रह्मविदा क्लेशः न अनुभूयते। **"गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते"** इति यथा भगवद्गीतायाम् उक्तं तद्वत् ते प्रशान्तचित्ता एव भवन्ति।

अतः ब्रह्मज्ञानिनः आचाराः स्वभावाः एव, अन्यो ब्रह्मज्ञानी वा न वा इति गणनार्थं नास्ति। सर्वे एताम् अपराद्धिं कुर्वन्ति। वयमपि अस्मान् तादृशं तुलयितुं न शक्नुमः एव।

---

[33]बृहदारण्यकोपनिषद् शाङ्करभाष्यम् – १.४.०७

[3434]भगवद्गीता शाङ्करभाष्यम् – १८.५५

ब्रह्मज्ञानस्य फलद्वयं वर्तते। प्रधानफलं तु आत्माविद्यानिवृत्तिद्वारा संसारात् 'पुनरपि जननं पुनरपि मरणम्' इति एतस्मात् चक्रात् विमोक्षः। तस्य अवान्तरफलं जीवन्मुक्तिदशायां श्रेष्ठा आचारानुष्ठादयः। यदा कदलीफलकृषिकर्मणः प्रधानफलं कदलीफलमेव; किन्तु अवान्तररूपेण तस्य पर्णाः स्तम्भः इत्यादिकम् अस्माभिः उपयुज्यते। "निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः" इति शङ्कराचार्यः। अतः ब्रह्मज्ञानिनः आचाराः सम्यग् भवेयुः इति नियामयितुं न शक्यते। किन्तु **"यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः। स यत् प्रमाणं कुरुते लोकः तदनुवर्तते"** इत्यपि अस्ति। ब्रह्मज्ञानिनाम् आचारो यदा सम्यक् नास्ति तदा ते अज्ञानिनः कृते बुद्धिभेदं जनयति। **"न बुद्धिभेदं जनयेत् अज्ञानां कर्मसङ्गिनाम्। जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्"** इति भगवान् श्रीकृष्णः भगवद्गीतायाम्। ब्रह्मज्ञानस्य अवान्तरफलद्वारा ब्रह्मज्ञानिनः आचाराः स्वभावाश्च धर्मपरा एव भवन्ति। अतः तत्र नियमस्य वक्तव्यत्वं नास्ति इति अहं मन्ये।

**पत्रस्य विषयः--**

इदानीं वयं सामान्येन शान्तिपर्वणि विशेषेण मोक्षधर्मपर्वणि च ब्रह्मज्ञानिनः स्वभावान् पश्यामः। यद् अवतारिकायाम् उक्तं तत् मनसि सम्यक् स्थापयित्वा ब्रह्मज्ञानिनः स्वभावान् आचारान् लक्षणानि चावलोकयामः चेत् अन्यथाग्रहणं दुष्प्रयोगश्च न भवेत्।

प्रथमस्तु काम-संहरणम्। ज्ञाननिष्ठायां प्रवृत्तानां ब्रह्मज्ञानिनां मुख्यः स्वभावः ते इन्द्रियाणि कामात् सम्यक् संहरन्ते। भगवता श्रीकृष्णेन भगवद्गीतायां प्रोक्तम्-- "कामः रजोगुणसमुद्भवः महाशनो महापाप्मा" इति। इन्द्रियाणां स्वभावः प्रमाकरणम्; अतः ते न अपवादितव्यम्। किन्तु, यस्य मनः वशे नास्ति, तस्य मनसि विकल्पः जायते, यदा विकल्पः जायते तदा तत्कामात् अदनं कष्टकरमेव। कूर्मः मन्दं मन्दमेव चलति; किन्तु ईश्वरेण कठिन-पृष्ठास्थि दत्तम्। तस्मिन् स्वानि अङ्गानि अपि सम्यग् उपसंहर्तुं सामर्थ्यमपि दत्तम्। तदुपयुज्य अपायात् यथा कूर्मः उद्धरति तथा ब्रह्मज्ञानी अपि तस्य इन्द्रियाणि सर्वविषयेभ्यः उपसंहरते। यदा एतादृशं उपसंहरति तदा तस्य ज्ञाननिष्ठा वर्धते, आत्मज्योतिः प्रसीदति च।
**यदा संहरते कामान्कूर्मोऽङ्गानीव सर्वशः। तदाऽऽत्मज्योतिरचिरात् स्वात्मन्येव प्रसीदति॥** शा. प. २१. ०३
भगवद्गीतायाम् अपि समानार्थकश्लोको वर्तते –
"**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता॥** (भ. गी – २.५८)

द्वितीयस्तु भीतिः। ब्रह्मज्ञानिनो न बिभ्यति, कमपि न भाययन्ति। कथम्? यः द्वैतं पश्यति तस्य कामः जायते, स्वकीयपरिच्छिन्नस्य ज्ञानात्। तत्र भयं भवति, द्वैतात्। अपि च सः कामयते, काम्यमानः

उपलभ्यते वा न वा इति बिभेति। यः द्वैतं पश्यति, कामस्तं वशीकरोति। यः द्वैतं न पश्यति, सः कामं वशीकरोति। सः वीतरागी भवति। वीतरागी तु आत्मज्ञानस्य अधिकारी भवति। आत्मज्ञानात् सर्वात्मभावः सिद्ध्यति। तस्मात् कोऽपि न बिभेति।

**न बिभेति यदा चायं यदा चास्मान्न बिभ्यति। कामद्वेषौ च जयति तदाऽऽमानं च पश्यति॥** (शा.प. २१.०४)

तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यां सप्तमानुवाके "यदा ह्येवैष एतस्मिन्नदृश्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति।"[35] इति प्रमाणं दृश्यते।

**यदाऽसौ सर्वभूतानां न द्रुह्यति न काङ्क्षति। कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा॥**
(शा.प. २१.०५ / शा. प. २५१.०५)

ब्रह्मज्ञानिनः आचाराः बहुधा भवन्ति। केचित् निवृत्तिं स्वीकुर्वन्ति। केचित् तु प्रवृत्तिम्। केचित् उभयमपि। केचित् उपासनम्। यत्किमपि बहिराचारं ते आचरन्ति तत्र अर्थवत्त्वं नास्ति। तत् तेषां प्रारब्धवशात् एव प्रचलति। किन्तु, तेषाम् आन्तरस्थितिस्तु गुणवत्तरा भवति। कीदृशा गुणाः? अद्रोहः, सत्यवचनम् , संविभागः, दया, दमः, मार्दवम्, ह्रीः, अचापलम् इत्यादि भवति। **अद्रोहः** परजिघांसाऽभावः अर्थात् अहिंसा। अहिंसा परमो धर्मः, प्राणिनाम् अहिंसनम् ; न तु केवलं कायेन, किन्तु मनसा वाचा अपि।

**यदा न कुरुते भावं सर्वभूतेषु पापकम्। कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा॥** (शा. प. २५१.०६)

**दमः** बाह्यकरणानाम् उपशमः। **सत्यं** तु अप्रियानृतवर्जितं यथाभूतार्थवचनम्। दुःखितेषु भूतेषु कृपा **दया**। मृदुता अक्रौर्यं **मार्दवम्**। लज्जा **ह्रीः**। असति प्रयोजने वाक्पाणिपादादीनाम् अव्यापारयितृत्वम् **अचापलम्**।

**अन्ये साम प्रशंसन्ति व्यायाममपरे जनाः। नैकं न चापरं केचिद् उभयं च तथा परे॥** (शा. प. २१.०७)

**केचित् सर्वं परित्यज्य तूष्णीं ध्यायन्त आसते। राज्यमेके प्रशंसन्ति प्रजानां परिपालनम्॥** (शा. प. २१.०९)

**हत्वा छित्त्वा च भित्त्वा च केचिदेकान्तशीलिनः। एतत् सर्वं समालोक्य बुधानामेष निश्चयः॥** (शा.प. २१.१०)

**अद्रोहेणैव भूतानां यो धर्मः स सतां मतः। अद्रोहः सत्यवचनं संविभागो दया दमः॥** (शा. प. २१.११)

**प्रजनं स्वेषु दारेषु मार्दवं ह्रीरचापलम्। एवं धर्मं प्रधानेष्टं मनः स्वायम्भुवोऽब्रवीत्॥** (शा. प. २१.१२)

समानश्लोकः भगवद्गीतायाम्—

**"अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायास्तप आर्जवम्॥**
**अहिंसा सत्यमक्रोधः त्यागः शान्तिः अपैशुनम्। दया भूतेषु अलोलुप्त्वं मार्दवं ह्रीरचापलम्॥**"भ.गी.१६.१,२

---

[35]तैतिरीयोपनिषद् – २.७.०१

इदानीं दृष्टान्तद्वयम् उदाहरामि।

प्रथमदृष्टान्तः- मिथिलापुरीभूपालस्य जनकस्य आचारः। महाराजस्य जनकस्य महत्त्वम् अन्येभ्यः संन्यासि-शिष्येभ्यः प्रदर्शयितुं गुरुः मिथिलापुरी अग्निना दहति इव इन्द्रजालं कृतवान्। तद्दृष्ट्वा सन्यासिशिष्याः सर्वे तेषां कौपीनवस्त्ररक्षणार्थं धावन्ति। किन्तु, जनकस्तु “अत्र मम किमपि न दह्यते” इति मत्वा तत्रैव तिष्ठति। तदा ब्रह्मज्ञानिनः स्वभावः भवति। यत्किमपि विपत्तिः भवति, तेषां समतायां कथञ्चिदपि क्लेशः न भवति।

**अपि च भवति मैथिलेन गीतं नगरमुपाहितमग्निनाभिवीक्ष्य।**

**न खलु मम हि दह्यतेऽत्र किंचित् स्वयमिदमाह किल स्म भूमिपालः॥** (शा. प. २१९.५०)

द्वितीय-दृष्टान्तस्तु समुद्रस्य स्वभावः। यद्वद् अद्भिः आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः सर्वतः प्रविशन्त्यपि स्वात्मस्थम् अविक्रियं तिष्ठति, तद्वत् सर्वतः इच्छाविशेषाः कामाः विषयसन्निद्धौ अपि आपः समुद्रम् इव अविकुर्वन्तः प्रविशन्ति आत्मनि एव प्रलीयन्ते न स्वात्मवशं कुर्वन्ति। तादृश्यवस्था एव ब्रह्मज्ञानिनः स्वभावः भवति।

**आपूर्यमाणम् अचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।**

**तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी॥** (शा. प. २५१.०९, भ. गी २.७०)

**उपसंहारः**

भजगोविन्दे “भोगरतो वा योगरतो वा सङ्गरतो वा सङ्गविहीनः” इति कोटिद्वयं प्रदर्श्य “यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव॥” इति उपसंहरति। शास्त्रे यत्र वयं कोटिद्वयं पश्यामः किम् अवगन्तव्यम् इत्युक्ते तत्र कोटिद्वयेऽपि शास्त्रस्य तात्पर्यं नास्ति इति; यदा अस्माकं मनसि एककोट्याम् अभिप्रायः वर्तते तस्य निवारणार्थमेव एतादृशकोटिद्वयं पङ्क्तिं रचयन्ति। ब्रह्मविषयेऽपि “अणोरणीयान् महतो महीयान्” इत्यादिकं वर्णनं वर्तते। तस्य तात्पर्यं ब्रह्म अणुः परिमाणं महत् परिमाणं द्वयमपि इति न; ब्रह्म अपरिच्छिन्नं निष्परिमाणं निर्गुणम् इति बोधनार्थमेव तादृशप्रयोगाः दृश्यन्ते। एवमेव भोगरतो वा योगरतो वा इति प्रयोगे “ब्रह्मज्ञानिनोऽपि भोगरतिः भवितुम् अर्हति इति पक्षस्य अङ्गीकरणम्” इति न अवगन्तव्यम्। तस्य आचाराः ब्रह्मज्ञानस्य अवान्तरफलात् उचितमेव भवति। किन्तु ब्रह्मज्ञानिनः आचारे शास्त्रस्य तात्पर्यं नास्ति इति बोधनार्थं तादृश कोटिद्वयप्रयोगः उपयुज्यते इति अस्माभिः अवगन्तव्यम्।

ब्रह्मज्ञानिनः स्वभावः तु , शुद्ध-ज्ञानस्वभावः एव, तस्य आचारस्तु देहादिधर्मस्य आरोप एव इति उपसंहरामि।

# महाभारते शान्तिपर्वणि योगविचारः

**Smt. Durgaparameshwari H.K.**
(Ph.D. Research Scholar)
Asst. Commissioner of Commericial Taxes (HQ)
Govt. of Karnataka

चित्तवृत्तिनिरोधः योगः इति। पञ्चसहस्रवर्षाणामैतिहासिकं शास्त्रमिदं प्राचीन भारतस्य चिन्तनशीलैः पतञ्जलिमहर्षिभिः प्रसारितमिति साधारं दृश्यते –

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तम् प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥**

अनेन श्लोकेन न केवलं योगशास्त्रे अपिच व्याकरणशास्त्रे, वैद्यशास्त्रेऽपि पतञ्जलिमहर्षेः योगदानमासीदिति सुस्पष्टम्। योगवासिष्ठे **मनः प्रशमनोपायः योगः** इत्युक्तम्। श्रीकृष्णः गीतायां (2-50) **योगः कर्मसु कौशलम्** इत्युक्तवान्। योगशास्त्रस्य प्रथमाध्याये पतञ्जलिः योगः समाधिः, योगः चित्तवृत्तिनिरोधः इति वदति। समाधिर्नाम चित्तस्य एकाग्रता। अत एव मनसः चाञ्चल्यमपाकृत्य एकाग्रतायाः साधनकर्म योगः इति योगशब्दस्य समीकरणम् कर्तुं शक्यते। रघुवंशे योगेनान्ते तनुत्यजामिति कालिदासोक्तरीत्या मनुष्यः भौतिकमिदं स्वशरीरम् अन्ते योगेनैव त्यजेदिति यदुक्तं तत् युक्तमेव। पतञ्जलिमहर्षेः पूर्वमेव योगस्य प्रस्तावः अनेकेषु ग्रन्थेषु कृतः सन्नपि पतञ्जलिमुनेः पूर्वाचार्यः हिरण्यगर्भः एव मूलयोगपुरुषः इति विश्वसन्ति शास्त्रकाराः। हिरण्यगर्भेनोक्तम् योगदर्शनं महापुरुषः पतञ्जलिः सूत्ररूपेण संयोजितवानिति प्राचीनग्रन्थैः ज्ञायते।

श्रीव्यासमहर्षिविरचितं महाभारताख्यं महाकाव्यं सार्वकालिकः नीतिग्रन्थः इत्यत्र नास्ति संशीतिः। सांसारसागरे प्रवहन् प्रत्येकोऽपि पुरुषः नित्यदैनन्दिनसङ्कटैः मुञ्चितुं पठ्यमाना भगवद्गीता यस्मिन् महाभारते अस्ति तत्रैव बहुषु स्थलेषु मुक्तिसाधनपरः योगः अपि प्रस्तावितः। मुख्यरूपेण महाभारतस्य शान्तिपर्वणि ध्यानयोगस्य प्रस्तावः अनेकत्र दृश्यते। शान्तिपर्वणि अश्वमेधपर्वणि च श्रीकृष्णः प्रप्रथमवारं विवस्वते योगं बोधितवानिति ज्ञायते। शान्तिपर्वणि 105 तमे अध्याये राजधर्मानुशासनपर्वणि बृहस्पतिः एवं वदति – **असंशयं दैवपरः क्षिप्रमेव विनश्यति। याजयैनं विश्वजिता सर्वस्वेन वियुज्य तम्॥** (रा/प-105/22) **ततो गच्छसि सिद्धार्थः पीड्यमानं महाजनम्। योगधर्मविदं पुण्यं कश्चिदस्योपवर्णयेत्॥** (रा/प-105/23) **अपि त्यागं बुभूषेत कच्चिद् गच्छेदनामयम्।**

**सिद्धेनौषधियोगेन सर्वशत्रुविनाशिना ॥** (रा/प-105/24) **नागानश्वान् मनुष्यांश्च कृतकैरुपघातयेत्। एते चान्ये च बहवो दम्भयोगाः सुचिन्तिताः ॥ शक्या विषहताः कर्तुं पुरुषेण कृतात्मना ॥** (रा/प-105/25)

शान्तिपर्वणि 110 तमे अध्याये दुःखनिवारणोपायाः प्रतिपादिताः दृश्यन्ते। सहचारेण, ईश्वरप्रणिधानेन च कथं भवसागरः पार्यते इति भीष्मः युधिष्ठिराय उपदिशति - **आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः। वर्तन्ते संयतात्मनो दुर्गाण्यतितरन्ति ते ॥** (शा/प-110/2)

चतुराश्रमेषु उक्तः धर्मः आचर्यते चेत् तच्च अष्टाङ्गयोगोक्त **यमनियमासनप्राणायाम प्रत्याहारधारणध्यानसमाधयः** (यो/सू-1-29) इति अष्टाङ्गान्यन्तर्गतानि। स्वाध्यायात् तपोमार्गे गत्वा, तपोमार्गात् भवसागरतरणम् कथं करणीयमिति विषये उच्यते - **अनध्यायेषु ये विप्राः स्वाध्यायं नेह कुर्वते। तपोनिष्ठाः सुतपसो दुर्गाण्यतितरन्ति ते॥** (शा/प-110/13) **ये तपश्च तपस्यन्ति कौमारब्रह्मचारिणः। विद्यावेदव्रतस्नाता दुर्गाण्यतितरन्ति ते॥** (शा/प-110/14) **ये च संशान्तरजसः संशान्ततमसश्च ये। सत्वे स्थिता महात्मानो दुर्गाण्यतितरन्ति ते ॥** (शा/प-110/15)

अस्मिन्नेवाध्याये मनोनिग्रहविषये मनःप्रशान्तिविषये च कथयन् स्थिमितमनसा दुःखशरधिमपि पारं कर्तुं शक्यते इत्युक्तम् - **ये क्रोधं संनियच्छन्ति क्रुद्धान् संशमयन्ति च। न च कुप्यन्ति भूतानां दुर्गाण्यतितरन्ति ते ॥** (शा/प-110/21) **ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययम्। भक्ता नारायणं देवं दुर्गाण्यतितरन्ति ते॥** (शा/प-110/24) शान्तिपर्वणि मोक्षधर्मविचारे ध्यानयोगः, योगमार्गाः, तपोबलात् लभ्यमानः आनन्दः, मोक्षसाधनमित्यादि विषयाणां वर्णनम् दृश्यते। भीष्मः युधिष्ठिरादिभ्यः ध्यानयोगविचारं तस्य विधान् च वर्णयति – **हन्त वक्ष्यामि ते पार्थ ध्यानयोगं चतुर्विधम्। यं ज्ञात्वा शाश्वतीं सिद्धिं गच्छन्तीह महर्षयः ॥** (मो/प-195/1) कथं ध्यायेत् तस्य विधानं च किमिति विषये - **तत्र ध्यानेन संश्लिष्टमेकाग्रं धारयेन्मनः। पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः॥** (मो/प-195/5) **शब्दं न विन्देच्छ्रोत्रेण स्पर्शं त्वचा न वेदयेत्। रूपं न चक्षुषा विद्याज्जिह्वया न रसांस्तथा॥** (मो/प-195/6) **घ्रेयाण्यपि च सर्वाणि जह्याद् ध्यानेन योगवित्। पञ्चवर्गप्रमाथीनि नोच्छेच्चैतानि वीर्यवान्॥** (मो/प-195/7) शुभाशुभं कर्म कृतं यदन्यत् तदेव प्रत्याददते स्वदेहे। मनोऽनुवर्तन्ति परावराणि जलौकसः स्रोत इवानुकूलम्॥ (मो/प-205/5). 236 तमे अध्याये ध्यानयोग्यः योगः, तस्य फलं, सप्तविधानि धारणानि च व्यासमुनिभिः एवं प्रोच्यते - त्यागसूक्ष्मानुगः क्षेम्यः शौचगो ध्यानगोचरः। जीवयुक्तो रथो दिव्यो ब्रह्मलोके विराजते॥ (मो/प-

236/12), विक्रमाश्चापि यस्यैते तथा युक्तेषु योगतः। तथा योगस्य युक्तस्य सिद्धिमात्मनि पश्यतः॥ (मो/प-236/16), यथा योगाद् विमुच्यन्ते कारणैर्यैर्निबोध तत्। योगैश्वर्यमतिक्रान्तो यो निष्क्रामति मुच्यते॥ (मो/प-236/40)

योगेन परमात्मानं प्राप्तं महात्मानं व्यासमुनिः 240 तमे अध्याये वर्णयति। आत्मेच्छया बुद्धिपूर्वकेनापि शौचः आचरणीयः। विद्वद्भिरुक्तनां पञ्चविधानां योगदोषानाम् अशौचनिवारणेन शौचः साध्यः भवति। एते पञ्चविधाः योगदोषाः के इत्युक्तौ - **कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम्। क्रोधं शमेन जयति कामं संकल्पवर्जनात्॥** (मो/प-240/5)

अत्र क्रोधः शान्तमनसा सहिष्णुतया च जेतव्यः। कामः केवलं सङ्कल्पमात्रेणैव जेतुं शक्यते। इत्युक्तम्। मनोनियन्त्रणमेव कामं त्यक्तुं अवशिष्टः एकैकः उपायः। अन्यत्र भीष्मः अपि एतत्तुल्यवाक्यमेव वदति - कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम्। परित्यज्य निषेवेत यतवाग् योगसाधनान्॥ (मो/प-274/14) ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा। शौचमाहारतः शुद्धिरिन्द्रियाणां च संयमः॥ (मो/प 274/15) इन्द्रियान् संयम्य मनसः एकाग्रतां साधयित्वा मनः कमपि उद्वेगवशमकृत्वा क्रियमाणं तपः अथवा साधना एव योगः - संनियम्येन्द्रियग्रामं कोष्ठे भाण्डमना इव। एकाग्रं चिन्तयेन्नित्यं योगान्नोद्वेजयेन्मनः॥ (मो/प-240/26) साङ्ख्ययोग-पातञ्जलयोगयोर्मध्ये स्थितस्यान्तरस्य प्रतिपादनसमये योगमार्गस्य तस्य स्वरूपदर्शनस्य च प्राप्तिविषयेऽपि भीष्मः वदति - **रागं मोहं तथा स्नेहं कामं क्रोधं च केवलम्। योगाच्छित्त्वा ततो दोषान् पञ्चैतान् प्राप्नुवन्ति तत्॥** (मो/प-300/11) **आत्मनां च सहस्राणि बहूनि भरतर्षभ। योगः कुर्याद् बलं प्राप्य तैश्च सर्वैर्महीं चरेत्॥** (मो/प-300/26)

इत्थं योगसाधनप्रकारः तस्य विधानं रीतिः तेन प्राप्स्यमानं फलमित्यादि विषये महाभारते बहुषु स्थलेषु उक्तमस्ति। एवम् योगः कस्यापि वैयक्तिकं संपद् नास्ति। तस्य आचरणं वर्णलिङ्गभेदराहित्येन केनापि कर्तुं तस्य फलञ्च भोक्तुं शक्यते।

आहत्य शान्तिपर्वणि बहवः अध्यायाः बहवः श्लोकाश्च योगविषयस्य कृते निर्दिष्टाः दृश्यन्ते। तत्र च योगस्य महत्वं तस्य उपयोगश्च विशदीकृतमस्ति। पातञ्जलदर्शने प्रतिपादितः अष्टाङ्गयोगः शान्तिपर्वण्युक्त ध्यानयोगो वा सर्वेषाम् आध्यात्मिक साधनायाः कृते अत्यावश्यकः इत्यत्र संशयः नास्ति। यस्मिन्नपि दर्शने उद्दिष्टस्य तत्त्वस्य साक्षात्कारः एव प्रत्येकस्यापि दार्शनिकस्य इच्छा भवति। तद्रीत्या महाभारतीयस्थाः योगसम्बन्धी विचाराः अत्यन्तं उपकारकाः भवन्तीति स्पष्टम्।

# आधुनिकराजनीतिसन्दर्भे शान्तिपर्वस्था विषयाः

**डा. वि. यमुना देवी**

सहायकाचार्या , कुप्पुस्वामिशास्त्रिशोधसंस्था , चेन्नै

**व्यासगिरां निर्यासं सारं विश्वस्य भारतं वन्दे ।**

**भूषणतयैव संज्ञां यदङ्कितां भारती वहति ॥**[३६]

**कलशब्दमहाहंसं महाख्यानपराम्बुजम् ।**

**कथाविस्तीर्णसलिलं कार्ष्णं वेदं महाह्रदम् ॥** (मार्कण्डेय पु. १. ११)

महाभारतं नाम विबुधानां कवीनाञ्च जीवातुः इति ख्यातिर्वर्तते। महाभारतं हि विविधानां साङ्ख्य-योगादिशास्त्राणां वर्णाश्रमादिधर्माणाञ्च आकरः[३७] ग्रन्थः इति सुप्रसिद्धम्। युधिष्ठिरस्य पट्टाभिषेकमनु सर्वे पाण्डवाः श्रीकृष्णेन समं पितामहात् नानाधर्मशुश्रूषवः भीष्मं द्रष्टुमभिजग्मुः। वासुदेव-युधिष्ठिरयोरनुरोधेन भीष्मः शान्तिपर्वणि राजधर्मादिविविधधर्मान् व्याचष्टे। साक्षात् लोक-विख्यातजगद्गुरुश्रीकृष्णस्य समक्षं तथा व्यासनारदादीनां च संमुखे सर्वधर्मज्ञेन भीष्मेण इमे धर्माः प्रोक्ता इति एते महद्गौरवं यान्ति। अतः भारतस्य पञ्चमवेदत्वञ्च।

प्रजातन्त्रयुगेऽस्मिन् महाभारतस्य शान्तिपर्वणः राजनीतयः प्रवर्तेरन् वा इति सामान्यचिन्तनं भवत्येव। अत्र शान्तिपर्वोपलब्धराजनीतेः आधुनिकराजनीतौ सामञ्जस्यं द्रष्टुं केचनांशाः स्थाली-पुलाकन्यायेन परिशील्यन्ते। राज्यस्य सप्ताङ्गानि, तेभ्यः - राज्ञः गुणाः, अमात्यमण्डलविचारः, कोशवर्धनं, दण्डनीतिश्चेति एतान्येवात्र उद्धृताः सन्ति।

---

36 सुभाषितरत्नभाण्डागारः

37 मार्कण्डेय पुराणे I . 7-8

धर्मशास्त्रमिदं श्रेष्ठमर्थशास्त्रमिदं परम्। कामशास्त्रमिदं चाग्र्यं मोक्षशास्त्रं तथोत्तमम्॥

चतुराश्रमधर्माणामाचारस्थितिसाधनम्। प्रोक्तमेतन्महाभाग वेदव्यासेन धीमता ॥

राजनीतिप्रतिपादकधर्मशास्त्रग्रन्थः राजधर्मः - राजशास्त्रम् - नृपशास्त्रम् - दण्डनीतिः[३८] - अर्थशास्त्रमित्यादिनामभिः व्यवह्रियते। राजनीतिर्नाम शासक-शासनव्यवस्थैव । भीष्मेनोक्तं च यत्-

**यैर्यैरुपायैर्लोकास्तु न चलेदार्यवर्त्मनः।**

**तत्सर्वं राजशार्दूल नीतिशास्त्रेऽभिवर्णितम्॥** म ॥ शा ५९ .७४

**असतां प्रतिषेधश्च सतां च परिपालनम्।**

**एष राज्ञां परो धर्मः समरे चापलायनम्॥** म ॥शा १४. १६ इति।

शान्तिपर्वणि राजधर्मस्य बहुरूपता तथा तस्य मुख्यांशाः च साररूपेण राराजन्ते। शान्तिपर्वणि ५६ तः १३० अध्यायपर्यन्तं राजनीतिर्विंशदात्मकतया तथा १३१ तः १७२ अध्यायावधि तत्र तत्र राजनीतिः निगदिता।

राजधर्मान्तर्गतराज्यस्य सप्ताङ्गानीति नीतिशास्त्रप्रवर्तकानामैकमत्यं दृश्यते। तानि च -

१॥ राजा २॥ अमात्यः ३॥ जनपदो ४॥ दुर्गः ५॥ कोशः ६॥ दण्डः ७॥ मित्रम् चेति। भीष्मेनाप्युक्तम् यत् (69 . 64 - 68)

**राज्ञा सप्तैव रक्ष्याणि तानि चैव निबोध मे।**

**आत्मामात्याश्च कोशाश्च दण्डो मित्राणि चैव हि॥**

**तथा जनपदाश्चैव पुरं च कुरुनन्दन।**

**एतत् सप्तात्मकं राज्यं परिपाल्यं प्रयत्नतः॥**

I. **राजा अथवा स्वामी** - The King or the Ruler

१॥ **राजन्** शब्दस्य व्युत्पत्तिर्नैरुक्तकारैः **राजते राजा** इति दीप्त्यर्थे उक्ता। शान्तिपर्वणि (59.125) तु प्रजारञ्जनार्थे त्राणार्थे च बोधिता, यथा **रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते**॥ तथा **ब्राह्मणानां क्षतत्राणात् ततः क्षत्रिय उच्यते** इति। [३९]

---

38 म शा 59. 78 - दण्डेन नीयते चेदं दण्डं नयति वा पुनः। दण्डनीतिरिति ख्याता त्रींल्लोकानभिवर्तते॥
अर्थशास्त्रेऽपि I.4 - आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः। तस्य नीतिर्दण्डनीतिः।

39 रघुवंशेऽपि महाभारतमनुसृत्य VI.12- " राजा प्रकृति रञ्जनात् " इति।
रघुवंशे II.53 - क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।

२ ॥ राज्ञः गुणनिरूपणे च (शा. 57)- **प्रत्यक्षा च परोक्षा च वृत्तिश्चास्य भवेत् समा। 'न यस्य कूटं कपटं न माया न च मत्सरः।' 'सतां वर्त्मानुगस्त्यागी ' 'गुणवान्शीलवान्दान्तो मृदुर्धर्म्यो जितेन्द्रियः। सुदर्शः स्थूललक्ष्यश्च ...** इत्याद्यनेकराजगुणान् [४०] भीष्मः विवृणोति।

आधुनिकराजनीतावपि एवंगुणसम्पन्नाः मन्त्रिणः जनहृदयेषु राराजन्ते। आसन्नस्माकं देशेऽपि महानायकाः। यथा -

**महात्मा गान्धीजी** - लोकविदितमेव तस्य सत्यशीलता त्यागश्च।

**राजाजी**- अमत्सरः - यः स्ववेतनं सर्वम् अकिञ्चनेभ्यः अददात् तथा वस्त्रद्वयमात्रं शतरूप्यकाणि च केवलमवशिष्टं तस्य स्वत्वेन।

**कामराजः**- राजनीतिकुशलः नीतिज्ञः राजनीतिविषयेष्वनुपृष्टः सदा `पश्याम' इत्येव प्रत्यवदत् ।

राजा च सर्वदा जागरूको भवेदित्यादि नानानियमानुपदिशति, तेषु (120.14)ः

**न जह्याच्च तनुत्राणं रक्षेदात्मानमात्मना।**

**चारभूमिष्वनभिगतान् पाशांश्च परिवर्जयेत्**॥ इति ॥

अद्यापि राष्ट्रपति-प्रधानमन्त्रि- प्रभृतयः तनुत्राणं धरन्ते। **चारभूमिष्वनभिगतान् परिवर्जयेत्** इत्ययमुपदेशः **राजीवगान्धिप्राणाभिघातम्** अथवा **दुर्मरणम्** स्मारयति।

३ ॥ अराजको देशश्च सद्यः एव विनाशमेतीति उररीकरोति पितामहः एवम्(67.16)ः -

**राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः।**

**जले मत्स्यानिवाभक्ष्यन् दुर्बलं बलवत्तरः॥** इति।

आधुनिके लोकतन्त्रसमाजावपि एतदन्वेति यतः इदमिदानीमस्मदीय मुख्यमन्त्रिणः निधनमनु भारतीय-संविधाननियमानुसारेण आशु सभानुमोदनेन नवीन-मुख्यमन्त्री नियोजितोऽभूत्।

यद्यपि महाभारतकाले राज्यभरणं क्षत्रियाणां परम्परागतराजपदवी तथा कुलधर्मश्चासीत् तथापि गणतन्त्रराज्यस्य उल्लेखः महाभारते उपलभ्यते।

---

40 एतान् गुणानेव आधुनिकसंस्थासु "Management principles" इति अपेक्षन्ते ।

४ ॥ **गणतन्त्रराज्यवर्णनम्**(Republics)-शान्तिपर्वणि १०७तमेऽध्याये गणतन्त्रराज्यस्यापि नीतिः तथा वर्णनमुपलभ्यते। गणाः भेदे अवश्यं विनाशं यान्ति अतः ते सर्वदापि संघातयोगेन प्रयतेरन्निति। अथैवोच्यते -

**कुलेषु जाताः कलहाः कुलवृद्धैरुपेक्षिताः।**

**गोत्रस्य नाशं कुर्वन्ति गणभेदस्य कारकम्॥** इति।

तथा चास्माकं जनतन्त्रभारतेऽपि यदा यदा प्रान्ताः नदीसीमादिषु विषयेषु मिथः कलहायमानेषु मध्यमन्त्रिपरिषदः अनुशासनं मार्गदर्शनञ्च भवति। यद्येवं मध्यमन्त्रिपरिषदः अनुरोधं न प्रवर्तेत तर्हि भिन्नाः प्रान्ताः अवश्यमरिवशा भवेयुः इत्यत्र नास्ति सन्देहलेशोऽपि।

गणतन्त्रराज्यस्य च जयः गणानां संघातशरणेनैव इति च निर्णीतं महाभारते यत् लोकतन्त्रराज्यस्यापि विषये प्रान्तानामैक्ये एव देशस्य जयः प्रगतिर्वा।

II. **अमात्याः** - Ministers

अमात्येषु अपेक्षिताः गुणाः, अपि च के मन्त्रिपदवीमलंकर्तुं योग्याः इति शान्तिपर्वणि (58) प्रतिपादिताः। राजा तु पर्याप्तवचनान्-वीरान्-प्रतिपत्तिविशारदान्- कुलीनान्- सत्यसम्पन्नान् -इङ्गितज्ञान् - अनिष्ठुरानेव मन्त्रिपदवीषु नियोजयेत्।

आधुनिक दुष्टाचारादि-अराजकीयपरिस्थितिः परिवर्तनीया चेत् महाभारते यथा उक्तं तथा 'गुण-शील-ज्ञानसम्पन्नाः एव मन्त्रिपदवीमलङ्कर्तुं योग्याः' इति नियमः अस्माकं शासने अपि योजनीयः।

मन्त्रिपरिषदि सप्तत्रिंशत् सभासदाः भवेयुरित्यपि निर्णीतं शान्तिपर्वणः षडशीतितमे अध्याये।

आधुनिकभारते 'काबिनेट्' आख्यमन्त्रिपरिषदि अपि न्यूनातिन्यूनं जनसंसदस्य पञ्चदशप्रतिशतम् भवेदिति नियमो वर्तते।

III. **दुर्गः**- Fortified City

राज्ञः आवासयोग्यः पुरः कीदृशो वा स्यादिति युधिष्ठिरेण पृष्टः भीष्मः नृपवस्तव्यं पुरमधिकृत्य सुविस्तरमवर्णयत् शान्तिपर्वस्थ ८६ तमाध्याये । राजावासयोग्यपुरे अवश्यंभाविषु सः पुरः दुर्गसंपन्नः धान्यायुधसमन्वितः कोशबलादियुतश्च भवेत्। पुरे जनपदे चैव व्यवहारं वर्धयेत्

सर्वदोषान् च निवर्तयेत् इति। राजपुरश्च शूराढ्यजनसंपन्नो समाजोत्सवसंपन्नश्च भवेदित्याद्यनेकान् विषयान्प्रतिपादयति भीष्मः।

संप्रत्यपि राजधानयः अमात्यमण्डलभूषिताः राजभवनादिशोभिताः विश्वविद्यालययुताः त्रिबलसम्पन्नाः उच्चन्यायालययुताश्च कोशागारसमृद्धाश्च वर्तन्ते।

IV. **कोशः** - Treasury

कोशाद्धि धर्मः कौन्तेय राज्यमूलः प्रवर्तते। (131.1) इति कोशवृद्धिधर्मान् च बोधयति भीष्मः युधिष्ठिराय। तथाहि च करादानः प्रजाहितायैव भवेदिति उररीकरोति शान्तनवः (66.24)-

**आददीत बलिं चैव प्रजाभ्यः कुरुनन्दन।**

**षड्भागममितप्रज्ञस्तासामेवाभिगुप्तये॥** [४१]

इति वचनात् करः षड्भागमेव तदपि मधुदोहवद्भवेदिति ज्ञायते। करादाने तारतम्यं च उक्तम्। यथा वणिजां करनिर्णयावसरे परिशीलनीयाः विषयाश्च के (87.15) -

**विक्रयं क्रयमध्वानं भक्तं च सपरिच्छदम्।**

**योगक्षेमं च संप्रेक्ष्य वणिजां कारयेत् करम्॥**

तथैव शिल्पिनाञ्च (87.16)-

**उत्पत्तिं दानवृत्तिं च शिल्पं सम्प्रेक्ष्य चासकृत्।**

**शिल्पं प्रति करानेवं शिल्पिनः प्रति कारयेत्॥**

इत्यादि विविधकरादानोच्चावचान् नियमान् प्रस्थापयति गाङ्गेयः। अपि च करादाने प्रजानां पीडा न भूयादिति च नियमः।

आधुनिके भारतेऽपि विंशत्यधिकाः उच्चावचकराः प्रायः इमान् नियमाननुसृत्यैव वर्तन्ते।

अपि च वैश्याः स्ववाणिज्य-कृषिकर्मभिः च देशं प्रभावयन्ति। ते देशस्य आर्थिक-आधारस्तम्भाः इति कृत्वा बोधितं भीष्माचार्यैः यद् (87.39) -

**तस्माद् गोमिषु यत्नेन प्रीतिं कुर्याद् विचक्षणः।**

**दयावानप्रमत्तश्च करान् संप्रणयन्मृदून्॥**

---

41 रघुवंशे I.18 - सहस्रगुणमुत्स्रष्टुमाधत्ते हि रसं रविः।

अद्यापि लोकतन्त्रभारते संस्थानां कृते विशेषसौलभ्यान् यच्छति सर्वकारः॥

**गूढविभवः**

**अगूढविभवा यस्य पौरा राष्ट्रनिवासिनः।**

**नयापनयवेत्तारः स राजा राजसत्तमः** ॥म ॥शा ५७।३४

इति भीष्मवचनात् महाभारतकालेऽपि धननिगूहनमासीदिति ज्ञायते। प्रायः राज्यात् इति स्वीकृते चेत् Blackmoney? अस्माकं देशे प्रवृत्तं निगूढधननिष्कासनं राजधर्मान्तर्गतमेवेति।

V. दण्डः - Punishment

दण्डशब्दस्यार्थः शान्तिपर्वणि एवमुदितः अस्ति -

**यस्माददान्तान् दमयत्यशिष्टान् दण्डयत्यपि।**

**दमनाद् दण्डनाच्चैव तस्माद् दण्डं विदुर्बुधाः** ॥ म ॥शा १५। ८

दण्डस्य आवश्यकतां च बोधयन्नाह -

**राजदण्डभयादेके पापाः पापं न कुर्वते। यमदण्डभयादेके परलोकभयादपि** ॥ म ॥शा १५।५

**परस्परभयादेके पापाः पापं न कुर्वते। एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम्** ॥ म ॥शा १५ ॥ ६

**यत्र श्यामो लोहिताक्षो दण्डश्चरति सूद्यतः। प्रजास्तत्र न मुह्यन्ते नेता चेत् साधु पश्यति** ॥ म शा १५।११

दण्डपातेऽपि क्रमशः वाग्दण्डं धिग्दण्डं धनदण्डं वेधनादिदण्डं तथा च अन्तिमे एव वधदण्डः भवेदिति अनुशास्ति भीष्मः [४२] ।

बहुषु देशेषु यत्र तीक्ष्णदण्डः निपात्यन्ते। तत्र प्रजाः पापं कर्तुं बिभ्यतीति सत्यमेव। यथा सिङ्गप्पूर् देशे मार्गाशौचादि-अपराधे उत्तमसाहसदण्डो विधीयते इति कारणात् जनाः मार्गान् स्वच्छतया संरक्षन्ते। अरबूदेशेषु च चौर्यस्य हस्तच्छेदः इति तीक्ष्णदण्डपाताद् चोराणामभावः इत्यस्मात्स्पष्टं यत् **सर्वं दण्डे प्रतिष्ठितम्**।

दण्डस्य बहुरूपतां वर्णयन्नाह भीष्मः यत् सुखदुःखार्थानर्थधर्माधमादि द्वन्द्वाश्च दण्डाः एवेति अवधेयः विषयः। अपि च निरपराधिनः न कदाचिदपि दण्डभाजः भवेयुरित्यपि निर्दिष्टः।

---

42 म ॥शा २६७ ॥१९-२० अपि च मनुस्मृतौ ८ ॥ १२९-

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्। तृतीयं धनदण्डं तु वधदण्डमतः परम्॥

मनुस्मृतौ ८ ॥ १२८ चोक्तम्-

**अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।**

**अयशो महदाप्नोति नरकं चैव गच्छति ॥** इति ।

**वधदण्डविचारः**

अपि च शान्तिपर्वणि वधदण्डस्य विषये द्युमत्सेन-सत्यवतोः सम्वादात् सुस्पष्टं भवति यत् गरीयांसस्य तथा पुनः पुनः आचरितस्यापराधस्यापि चरमदण्डो न भवेदिति ।

**उद्वेजनेन बन्धेन विरूपकरणेन च । वधदण्डेन ते क्लिष्या न . . .** ॥ २६७ । १३

मरणदण्डेन च अपराधिनः निर्दुष्टः कुटुम्बः आधाररहितः विनाशं प्राप्नुयादिति अपि च स एव अपराधी कदाचित् शीलयुक्तोऽपि भवेदिति शान्तिपर्वणि । म ॥शा २६७ । १०-११ -

**दस्यून् निहन्ति वै राजा भूयसो वाप्यनागसः ।**

**भार्या माता पिता पुत्रो हन्यन्ते पुरुषेण ते ॥**

**परेणापकृते राजा तस्मात् सम्यक् प्रधारयेत् ।**

**असाधुश्चैव पुरुषो लभते शीलमेकदा ॥**

आधुनिकानुशासनेनापि मरणदण्डो देशद्रोहिणामेव विधीयते। दण्डनिश्चयेऽपि बहूनां मोचनमपि अभूत् गणतन्त्रदिनमहोत्सवेषु ।

आधुनिकशासने विद्यमानैः शीलरहितैः कतिचननेतृभिः अपराधिनः आततायिनश्च तीव्रतरदण्डार्हाः अपि मोचिताः सन्तः निर्भयं पुनः क्रौर्ये हानिकरकर्मणि प्रवर्तन्ते। अतः उक्तं महाभारते राजा कालस्य कारणमिति ।

अत्र साररूपेण याः राजनीतयः प्रोक्ताः तास्सर्वाः अपि सांप्रतेऽपि सामञ्जस्यमुद्वहन्ते। अतः एवोक्तमस्ति - **यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचिदि**ति तथा पुरापि नवमिति महाभारतस्थ विषयाः तदात्वेऽपि आयत्यामिति च निरूपिताः ।

****इति शम् ****

गो–रक्षा भवेद् ध्रुवम्

**Dr. Sathyanarayana H.K.**
Asst Prof of Hindi, Madras Sanskrit
College, mylapore, Chennai-4.

**पंच गावः समुत्पन्ना मथ्यमाने महोदधौ।**
**तासां मध्ये तु या नन्दा तस्यै देव्यै नमो नमः।**

सनातन वैदिक धर्म एवं संस्कृति का मूल है गोमाता। वेद, उपनिषद्, पुराण, स्मृति आदि धर्मशास्त्रों में और इतिहास–काव्यों में भी सर्वत्र गोमाता की महिमा एवं दिव्य वर्णन उपलब्ध है। ऋग्वेद के गोसूक्त (6.28.1–8), अथर्ववेद के विश्वरूप गोसूक्त में गोमाता की महिमा का विशेष तथा विश्वरूप का वर्णन करते हुए उसके अंग–प्रत्यंग में समस्त देवता सान्निध्य को प्रतिपादित किया गया है– ***एतद्वै विश्वरूपं सर्वरूपं गोरूपम्, गौः मे माता ऋषभः पिता मे।*** इस वेदवाणी के चलते समूचे भारतवर्ष में लोग आदिकाल से ही गोमाता की पूजा करते आ रहे हैं। इसलिए यह भारतीयों का धर्म बन गया है। धर्म को संपूर्ण विश्व की प्रतिष्ठा माना गया है–**धर्मो विश्वस्य जगतः प्रतिष्ठा।** यह धर्म केवल आचरण से ही उत्पन्न होता है – ***आचारप्रभवो धर्मः।*** स्वयं भगवान् अच्युत ही इस सनातन धर्म के प्रभु हैं – ***धर्मस्य प्रभुरच्युतः।*** गोमाता के बिना सनातन धर्म का कोई भी अंग अपूर्ण रह जाता है। गर्भाधान से लेकर मरणोत्तर क्रिया पर्यंत और श्राद्धादि कर्म तक गोमाता एवं गव्य पदार्थों की अनिवार्यता है। घी के महत्व के बारे में यूँ कहा गया है– ***ऋणं कृत्वापि घृतं पिबेत्।*** अंततो गत्वा किसी ने यह भी कह डाला कि ***घृतं न श्रूयते कर्णे दधि स्वप्नेपि दर्लभम्। मुग्धे दुग्धस्य का वार्ता तक्रं शक्रस्य दुर्लभम्।*** गव्य पदार्थों की उपयोगिता के महत्व के बारे में इससे अधिक और क्या कहा जाए। वस्तुतः शास्त्रों ने, ऋषियों ने या फिर देवादियों ने भी गोमाता का वर्णन संपूर्ण रूप से नहीं कर पाये हैं। इससे गोमाता के अचिन्त्य माहात्म्य को समझ सकते हैं। देव–देवताओं का पोषण भी गोमाता के हव्यकव्यादि से ही होता है – ***धारयन्ति प्रजाश्चैव पयसा हविषा तथा।*** परम तपोधन ब्रह्मर्षि वसिष्ठ ने गोमाता का महत्व यूँ समझाया है –

***गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा गावोस्माकं वयं तासां यतो गावस्ततो वयम्।***

गोमाता की रक्षा के लिए सहस्रों वर्षों से न केवल मनुष्य, अपितु देवताएँ भी प्रयासशील हैं। श्रीकृष्ण पर कुपित होकर इन्द्रदेव ने जब भीकर वर्षा बरसायी थी, तब गोमाता और गोपालकों की रक्षा के लिए श्रीकृष्ण ने गोवर्धनगिरि को उठाकर उन्हें आश्रय दिया था।

तिरुपति को भू–वैकुण्ठ कहने के पीछे वही गोमाता की रक्षा से सम्बंधित कथा है। कौशिक राजा विश्वामित्र बनने के पीछे शबला की गोकथा है। निःसंतानवाले सूर्यवंश के राजा दिलीप ने नन्दिनी की सेवा–शुश्रूषा के फल से ही अपनी संतान का वर प्राप्त किया था। कौरवों ने अज्ञातवासी पाण्डवों का पता लगाकर, फिर से 14 वर्ष का वनवास करवाने के लिए उत्तरगोग्रहण की आयोजना कर जब विराट देश पहुँचे तब अपने अज्ञातवास की और संभाव्य अगले 14 वर्ष के अज्ञातवास का भी परवाह किये बिना केवल गोमाता की रक्षा के लिए धनुष उठाने के लिए मजबूर होने की कथा महाभारत में है।

प्रथम स्वातंत्र्य संग्राम में मंगल पाण्डे के उस बलिदान के पीछे का मूलकारण गौ की रक्षा ही था। हमारा आहार–चक्रसंपूर्णतः गौ पर ही निर्भर है। पाश्चात्य देशों में आज भी गोक्षीर को एक परिपूर्ण एवं समृद्ध आहार माना जाता है। कृषि के लिए गौ आधार है। आर्थिकता के लिए गौ का योगदान बहुत बड़ा है। भारत का ऐसा कोई भी भाषा–साहित्य नहीं है जिसमें गौ के बारे में नहीं बताया गया हो। शास्त्रों का कहना है कि गौ के शरीर में तैंतीस करोड देवताओं का वास होता है। आध्यात्मिक साधना के लिए गौ सहायक होता है। गोमाता ही चलने–फिरनेवाला मंदिर है –

***गावो ममाग्रतो नित्यं गावः पृष्ठतः एव च। गावश्च सर्वगात्रेषु गवां मध्ये वसाम्यहम्।***

इसलिए गौ की रक्षा करना अत्यावश्यक है। क्योंकि कहा गया है ***गावो यज्ञार्थमुत्पन्ना यज्ञो वै विश्वजीवनम्। श्रौत–स्मार्तेन यज्ञेन गवां रक्षा भवेद् ध्रुवम्।*** सन् 1526 में बाबर ने भारत में गोहत्या का निषेध किया था। दिनांक 11–1–1529 को उन्होंने अपने पुत्र हुमायून को लिखी चिट्ठी में कहा था "भारतीयों के प्राण गोमाता में बसे हैं, इसलिए गोमाता की अच्छी देखभाल करने से पूरे भारतीयों का दिल जीत सकोगे और भारत को शासन करने की राजनीति भी यही है"। उनकी इस राजनीति को उनके पुत्र अकबर ने भी अपनायी थी। मराठा छत्रपति शिवाजी के पुत्र सांभाजी ने अपने राज्य में हुई गोहत्या के अपराधी को उचित दण्ड नहीं देने के कारण उस न्यायाधीश को सेवा से बर्खास्त किया था। उन्होंने पुर्तगालियों को अपने राज्य में गोहत्या नहीं करने की करार पर वहाँ रहने की अनुमति दी थी। सन् 1775 में पुणे में गोवध करनेवाले दो अपराधियों को फांसी की सजा दी गयी थी। सन् 1793 में पे**श**वे माधवराय ने गोवध करनेवाले 3 अपराधियों का हाथ काटने की आज्ञा दीथी। सिख धर्मगुरु रणजित सिंह ने गोहत्या का निषेध किया था। इन सबके पीछे का कारण एक ही हो

सकता था जिसे उन्होंने वेदवाक्य–तुल्य समझा था – ***गोषु प्रनष्टमानासु यज्ञो नाशं गमिष्यति। यज्ञे नष्टे देवनाशस्ततः सर्वं प्रणश्यति।*** प्रायः भारतीय सनातन धर्म के पाँच प्राण बताये गये हैं – ***गीता गंगा च गायत्री गौश्च गोविन्द एव च। सनातनस्य धर्मस्य पंच प्राणाः प्रकीर्तिताः।*** इन सभी की रक्षा अत्यावश्यक है। इनमें से कोई भी एक चीज़ नष्ट हो जाए तो मानो संपूर्ण सनातन–सांस्कृतिक परंपराओं से भरपूर हमारे भारतवर्ष का भविष्य समाप्त हो जाएगा। इसलिए इन सबकी रक्षा प्रत्येक भारतीयों का आद्य कर्तव्य है। ***सर्वकामदुघे देवि सर्वतीर्थाभिषेचिनि पावनी सुरभिश्रेष्ठे देवि तुभ्यं नमो नमः।*** अतः आएं और गोरक्षा–मुहिम में किसी तरह अपना योगदान दें।